454

रघुवंशः In complete

Raghuvamsha		: Title
Kālidāsa		: Author
with Mallināth's commen-		: Editor
Cantos, 4, 14, 15, 16		: Year, Vols. 10m
17, 18 + 19		: Publisher
454		: Remarks

रघुवंश १९सर्ग

रघुवं॰टी॰स॰ १ ॥श्रीगणेशाय नमः॥ ॥शारदा शारदांभोजवदना वदनांबुजे॥ सर्वदा सर्वदास्माकं संनिधिं संनिधिं सं- स॰ न॰ ४
धिं क्रियात्॥१॥ ॥सः रघुः गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म प्रजापालनात्मकं॥ पुरोहितत्वदिवा-
धिकं॥ प्रतिपद्य प्राप्य दिनांते सायंकाले सवित्रा सूर्येण निहितं तेजः प्रतिपद्य हुताशनो ऽग्निरि-
व अधिकं बभौ॥ सौरं तेजः सायमग्निं संक्रमते॥ आदित्यो वा अस्तं यन्तमग्निमनुप्रविशति॥

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ॥ दिनांते निहितं तेजः सवित्रेव हुताशनः॥ १॥
न्यस्ताशस्त्रं दिलीपं च तं च शुश्रूषुषां पतिं॥ राज्ञामुद्धतनाराचे हृदि शल्यमिवार्पितं॥ २॥
दिलीपानंतरं राज्ये तं निशम्य प्रतिष्ठितं॥ पूर्वं प्रधूमितो राज्ञां हृदये ऽग्निरिवोत्थितः॥ २॥

अग्निर्वादित्य॥ सायं प्रविशतीत्यादिश्रुतिः प्रमाणं॥१॥ दिलीपेति॥ ॥दिलीपानंतरं राज्ये प्रतिष्ठित-
मवस्थितं तं रघुं निशम्याकर्ण्य पूर्वं दिलीपकाले राज्ञां हृदये प्रकर्षेण धूमो ऽस्य संजातः प्रधूमितो- राम॰ १
ऽग्निः संतापाग्निरुत्थित इव प्रज्वलित इव॥ पूर्वादप्यधिकः संतापो ऽभूदित्यर्थः॥ राजकर्तृकस्या-
पि निशामनस्य योग्योपचारात् [illegible]मान कर्तृकत्वविरोध इत्यर्थः॥ २॥

पुरुहूतेति॥ ॥पुरुहूतध्वजः इंद्रध्वजः स किल हृष्यद्भिः राजभिः पूज्यत इत्युक्तं भविष्योत्तरे॥ ए-
वं यः कुरुते यात्रामिंद्रकेतोर्युधिष्ठिर॥ पर्जन्यः कामवर्षी स्यात्तस्मिन्राज्ये न संशय इति॥
पुरुहूत[ध्व]जस्येव तस्य रघोर्नवाभ्युत्थानमभ्युन्नतिमभ्युदयं च नवाभ्युत्थानदर्शिन्यः॥ ऊर्ध्वं
प्रस्थिताः हर्षसिताश्च नयनपंक्तयो यासां ताः सप्रजाः नताः संतताः प्रजा स्यात् संततौ जन-

पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः॥ नवाभ्युत्थानदर्शिन्यो
ननंदुः सप्रजाः प्रजाः॥३॥ सममेव समाक्रांतं द्वयं द्विरदगा-
मिना॥ तेन सिंहासनं पित्र्यमखिलं चारिमंडलं॥ ४॥ ॥

इत्युभयत्राप्यमरसिंहः ननंदुः॥३॥ ॥ सममिति॥ ॥द्विरद इव द्विरदेश्च वा गच्छतीति द्वि-
रदगामिना॥ कर्तर्युपमाने सुप्यजातविति णिच्॥ तेन रघुणा सममेव युगपदेव द्वयं स-
माक्रांतमधिष्ठितं॥ किं तद्द्वयं॥ पितुरागतं पित्र्यं॥ पितुर्यदिति यत्प्रत्ययः॥ सिंहासनम-
खिलं अरीणां मंडलं राष्ट्रं च॥ ४॥ ॥

थसिंहासनारोपणानंतरं तस्य लक्ष्मीसन्निधानमाह ॥ ॥छायेति॥ ॥अत्र रघोर्लेजोविशे
षेण स्वयसन्निहितया लक्ष्म्या छत्रधारणं कृतमित्युत्प्रेक्ष्यते ॥ पद्मा लक्ष्मीः ॥ लक्ष्मीः पद्मालया पद्मा कमला श्रीहरिप्रिया इत्यमरः ॥ स्वयमदृश्या किलेति संभावनायां ॥ दृ
ती पाछायामंडललक्ष्येण कांतिपुंजानुमेयेन तु स्वरूपतोऽदृश्येन ॥ छायामंडलमित्य

छायामंडललक्ष्येण तमदृश्या किल स्वयं ॥
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितं ॥ ५ ॥

नेन आतपत्रानंदृश्यते ॥ छाया सूर्यप्रिया कांतिः प्रतिबिंबमनातप इत्यमर ॥ तेन पद्मातपत्रेणापद्ममेवातपत्रं तेन कारणभूतेन साम्राज्ये एकमणिमंडलाधि
पत्ये दीक्षितमभिषिक्तं तं भेजे ॥ अन्यथा कथमेतादृशी कांतिसंपत्तिरितिभावः ॥ ५ ॥

मं प्रति सरस्वती सान्निध्यमाह ॥ ॥परिकल्पितेति ॥ ॥सरस्वती काले काले सर्वेष्वपि योग्यकालेषु नित्य
वीप्सयोरिति वीप्सायां द्विर्वचनं ॥ बंदिषु परिकल्पितसांनिध्या कृतसंनिधाना सती स्तुत्यं स्तोत्रा
र्हं रघुं अर्थ्याभिरर्थादनपेताभिः ॥ धर्मपथ्यर्थन्यायादिति यत्प्रत्ययः ॥ स्तुतिभिः स्तोत्रैरुपतस्थे ।
देवताबुध्या पूजितवतीत्यर्थः ॥ देवतात्वं च नाविष्णुः पृथिवीपतिरिति वा लोकपालैः

परिकल्पितसांनिध्या काले काले च बंदिषु ॥ स्तुत्यं स्तुतिभिरर्थ्याभिरुपत
स्थे सरस्वती ॥ ६ ॥ मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ॥ ॥

त्मकत्वाद्वेत्यनुसंधेयं ॥ एवं सति उपाद्देवपूजासंगतिकरणमित्यत्र करणपाथ
यिति वक्तव्ये मा नादात्मनेपदं सिध्यति ॥ ६ ॥ ॥मन्विति ॥ ॥वसुधरां मनुप्रभृतिभिर्मन्वादि
भिर्मान्यैः पूज्यैः राजभिः भुक्ता यद्यपि भुक्तैवेत्यर्थः यद्यपीत्यवधारणे ॥ ॥ ॥

अप्यर्थेयदिवार्थेस्यादितिकेशवः ॥ तथापितस्मिन्राज्ञिअन्यःपूर्वोयस्याःसाअन्यपूर्वाअन्य
पूर्वानभवतीत्यनन्यपूर्वाअनन्योपभुक्तेवासीत् ॥ तत्स्वयमपधिकेवानुरक्तवतीत्यर्थः ॥७॥
अत्रकारणमाह ॥ ॥सइति ॥ ॥ यस्मात्कारणात्सरघुः युक्तदंडतयापापराधदंडतया सर्वलो
कस्यमनःआददेजहार ॥ कथमिवश्वतिशीतोअत्युष्णोनभवतीतिनातिशीतोस्सः ॥ न

तथाप्यनन्यपूर्वैवतस्मिन्नासीद्वसुंधरा ॥ ७ ॥ सहिसर्वस्यलोकस्ययुक्त
दंडतयामनः ॥ आददेनातिशीतोष्णोनभस्वानिवदक्षिणः ॥ ८ ॥ ॥

अर्पस्यनशब्दस्यसुप्सुपेतिसमासः ॥ दक्षिणोदक्षिणादिग्भवोनभस्वान्वायुरिवमल
यानिलइवेत्यर्थः ॥ युक्तदंडतयेत्यत्रकामंदकः ॥ उद्वेजयतितीक्ष्णेनमृदुनापरिभूयते ॥
दंडेनतत्पतिस्तस्माद्युक्तदंडःप्रशस्यतइति ॥ ८ ॥ ॥

मंदेति ॥ ॥ तेनरघुणाप्रजाःगुरोर्दिलीपेविषयेसहकारोअतिसौरभःचूतः ॥ आम्रश्चूतोरसालोसौ
सहकारोतिसौरभइत्यमरः ॥ तस्यफलेनपुष्पोद्गमेपुष्पोदयइवततोपिगुणाधिकतयाहेतुनामं
दोत्कंठाः ॥ अत्यौत्सुकाःकृताःगुणान्तरश्चउत्तरोविषयःपूर्वंविस्मापयतीतिभावः ॥ ९ ॥ ॥ नये
ति ॥ नयविदिजिन्नीतिज्ञस्तस्मिन्नवेतस्मिन्राज्ञिविषयेतमधिरूढेत्यर्थः ॥ सधर्मयुधादिकंच

पेचानामपिभूतानामुत्कर्षंपुपुषुर्गुणाः ॥ नवेतस्मिन्महीपालेसर्वंनवमिवाभवत् मंदोत्कंठाः
कृतास्तेनगुणाधिकतयागुरौ ॥ फलेनसहकारस्यपुष्पोद्गमइवप्रजाः ॥ ९ ॥ नयविद्भिर्नवेरा
ज्ञिसदसच्चोपदर्शितं ॥ पूर्वएवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ॥ १० ॥

सत्कृत्युधादिकंचोपद
र्शितेतस्मिन्राज्ञिपूर्वएवपक्षअभवत् ॥ संक्रांतइत्यर्थः ॥ उत्तरःपक्षोनाभवत्तनसंक्रांतइ
त्यर्थः ॥ तत्रसदसतोर्मध्येसदेवाभिमतंनासत्तत्तत्ज्ञानंतुदानार्थमिवेत्यर्थः ॥ पक्षःसा
धनयोग्यार्थः ॥ पक्षःपार्श्वगरुत्साध्यसहायबलभित्तिषुइतिकेशवः ॥ १० ॥ ॥

पंचानामिति॥ ॥पृथिव्यादीनां पंचानां भूतानामपि गुणाः गंधादयः उत्कर्षं अतिशयं पुपुषुः॥ अ
त्रोत्प्रेक्षते॥ तस्मिन् रघौ॥ नाम॥ नवे महीपाले सति सर्ववस्तुजातं नवमिवाभवत्॥ तदेवभूता
जातं इदानीं अपूर्वगुणयोगादपूर्वमिवाभवदिति भावः॥ ११॥ ॥यथेति॥ ॥यथा चंद्रयत्याल्हा
दयतीति चंद्रः इंदुः॥ चदि धातोरौणादिको रप्रत्ययः॥ प्रल्हादनादाल्हादकरणादन्वर्थोऽन्व

पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः॥ नवे तस्मिन्महीपाले सर्वं नवमिवाभवत्॥
११॥ यथा प्रल्हादनाच्चंद्रः प्रतापात्तपनो यथा॥ तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजना
त्॥ १२॥

र्थ गतार्थमानामकोऽभूत्ययथा च॥ तथा च॥ तपतीति तपनः सूर्यः॥ नंद्यादित्वा
ल्युप्रत्ययः॥ प्रतापात् संतापजननादन्वर्थः॥ तथैव स राजा प्रकृतिरंजनादन्वर्थः साध
कः राजशब्दो भूत्॥ यद्यपि राजशब्दो राजतेर्दीप्त्यर्थात्कनिन्प्रत्ययांतो न तु रंजेः॥ तथा
पि धातूनामनेकार्थत्वाद्रंजनाद्राजेत्युक्तं कविना॥ १२॥ ॥

कामिति॥ ॥विशाले तस्य रघोर्लोचने कामं कर्णांतयोर्विश्रांते कर्णांतप्राप्ते तथापि चक्षुष्मत्ता तु चक्षुः
फलं त्विलर्थः॥ सूक्ष्मान् कार्यार्थान् नियंत्याद्यान् दर्शयतीति प्रकाशयतीति॥ सूक्ष्मकार्यार्थदर्शिना॥ शा
स्त्रेण वशास्त्रदर्शिविवेकिनामिति भावः॥ १३॥ ॥लब्धेति॥ ॥अथ लब्धस्य राज्यस्य प्रशमनेन परिपं
थिनामनुरंजनप्रतीकाराद्या स्थिरीकरणेन स्वस्थं समाहितचित्तं एनं रघुं कमललक्षणपद्मचिह्ना श्री

कामं कर्णांतविश्रांते विशाले तस्य लोचने॥ चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना॥ १३॥
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता॥ पार्थिवश्रीर्द्वितीयेव शरत्पंकजलक्षणा॥ १४॥ निर्वृ
ष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः॥ प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः॥ १५॥

द्योविविशे
पणमेतत्॥ शरद् द्वितीया पार्थिवश्रीः राजलक्ष्मीरिव समुपस्थिता प्राप्ता॥ १४॥ ॥निर्वृष्टेति॥ ॥नि
र्वृष्टा निर्वृष्टाः कृतवर्षाः॥ अत एव लघवस्तैर्मेघैर्मुक्तवर्त्मा त्यक्तमार्गः॥ अत एव सुदुःसहः तस्य
रघोः भानोश्च प्रतापः पौरुषमातपश्च॥ प्रतापौ पौरुषातपाविति यादवः॥ युगपद्दिशो व्यानशे व्या
प॥ १५॥ ॥

वार्षिकमिति॥॥इंद्रोवर्षासुभवंवार्षिकं॥वर्षानिमित्तमित्यर्थः॥वर्षाभ्यष्ठगितिठक्प्रत्ययः॥धनुःसं
जहार॥रघुःजैत्रंजयशीलं॥जेतृशब्दात्तृन्नंतात्प्रज्ञादिभ्यश्चेतिस्वार्थेअण्प्रत्ययः॥धनुर्दधौ॥हिय
स्मात्तौ॥इंद्ररघूप्रजानामर्थस्यप्रयोजनस्यवृष्टिविजयलक्षणसाधनेविषयेपर्यायेणउद्यतेकार्मुके
याभ्यांतौपर्यायोद्यतकार्मुकौ॥पाठांतरे॥पर्यायेणोद्यमोविश्रमश्चययोस्तौपर्यायोद्यमविश्रमौ

अधिज्यमायुधंकर्तुंसमयोऽयंरघोरिति॥स्वंधनुःशंकितेनेवसंजह्रेशतमन्युना॥१६॥वार्षिकं
संजहारेंद्रोरघुर्जैत्रंधनुर्दधौ॥प्रजार्थसाधनेतौहिपर्यायोद्यतकार्मुकौ॥१७॥पुंडरीकातप
त्रस्तंविकसत्काशचामरः॥ऋतुर्विडंबयामासनपुनःप्रापतच्छ्रियं॥१८॥द्वयोःपर्यायिकरपाद

न्नेरितिभावः॥१६॥पुंडरीकेति॥पुंडरीकंसितांभोजमेवातपत्रंयस्यसः॥तथोक्तः॥विकसंतिकाशा
निकाशाख्यतृणकुसुमान्येवचामराणियस्यसः॥तथोक्तः॥ऋतुःशरदृतुःपुंडरीकनिभातपत्रंकाशा
निभचामरंतंरघुंविडंबयामासअनुकारतस्यरघोःश्रियंपुनःशोभांतुनप्राप॥राज्ञांसंपत्तिःप
ह्यासुलक्ष्मीःश्रीरिवहस्पतेरितिशाश्वतः॥१७॥

प्रसादेति॥॥प्रसादेनसुमुखेतस्मिन्रघौविशदप्रभेनिर्मलकांतौचंद्रेचद्वयोर्विषयेतदाचक्षुष्म
तांप्रीतिरनुरागःसमरसासमस्वादातुल्यभोगेतियावत्॥रसोगंधेरसःस्वादइतिविश्वः॥आ
सीत्॥१८॥हंसेति॥॥हंसानांश्रेणीषुपंक्तिषुतारासुनक्षत्रेषुकुमुदानियेषुसंतीतिकुमुद्वंति॥

प्रसादसुमुखेतस्मिंश्चंद्रेचविशदप्रभे॥तदाचक्षुष्मतांप्रीतिरासीत्समरसाद्वयोः॥१८॥
हंसश्रेणीषुतारासुकुमुद्वत्सुचवारिषु॥विभूतयस्तदीयानांपर्यस्तायशसामिव॥१९॥

कुमुद्प्रायेष्वित्यर्थः॥कुमुद्वान्कुमुद्प्रायइत्यमरः॥कुमुदनडवेतसेभ्योड्मतुप्॥तेषु
वारिषुचतदीयानांरघुसंबंधिनांयशसांविभूतयःसंपदःपर्यस्ताइवप्रसारिताः॥किमि
त्युत्प्रेक्षा॥अन्यथाकथमेषांएषधवलिमेतिभावः॥१९॥ ॥

इच्छिति॥॥ इक्षूणां छाया इक्षुच्छायं॥ छाया बाहुल्य इति नपुंसकत्वं॥ तत्र निषण्णा इक्षुच्छायानिषादिन्य
स्त्रीलिंगपाठे इक्षो छायेति विग्रहः॥ अन्यथा बहुत्वेन नपुंसकत्वप्रसंगात्॥ शालीन् गोपायंतीति
रक्षंतीति शालिगोप्यः॥ सस्यपालिकाः स्त्रियः॥ कर्मण्यण्॥ टिड्ढाणञित्यादिना ङीप्॥ गोप्तुः रक्ष
कस्य तस्य रघोः गुणेभ्य उदयो यस्य तद्गुणोदयं गुणोत्पन्नं॥ आकुमारं कुमारानारभ्य कथोद्घात
कथारंभो यस्य तत्॥ कुमारैरपि स्तूयमानमित्यर्थः॥ यशो जगुः॥ गायंति स्म॥ अथवा कुमार

इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयं॥ आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः॥
॥२०॥

स्य सतो रघोः यः कथाः इक्ष्वाकुविजयादयः तत आरभ्य॥ आकुमारकथं तत्राप्यनिविधावव्य
यीभावः॥ आकुमारकथामुद्घातो यस्मिन् कर्मणि गानक्रियाविशेषणमेतत्॥ स्यादभ्यादानमुद्
घात आरंभ इत्यमरः॥ आकुमारको भूतमिति पाठे॥ कुमारस्य सतस्तस्य कथा निचरितैरुत्
तयद्यशः तद्यशः आरभ्य यशो जगुरिति व्याख्येयं॥२०॥

प्रससादेति॥॥ महौजसः कुंभयोनेरगस्त्यस्य॥ अगस्त्यः कुंभसंभव इत्यमरः॥ उदयादंभः प्रससा
द प्रसन्नं बभूव महौजसो रघोरुदयात् अभिभवाशंकि द्विषतां मनः चुक्षुभे क्षोभं प्राप॥ अगस्त्योद
ये जलानि प्रसीदंतीत्यागमः॥२१॥॥ मदेति॥॥ मदोदग्रा मदोद्धताः ककुदेषामस्तीति ककुद्मंतः म
हाककुद इत्यर्थः॥ यवादित्वान्मकारस्य वत्वाभावः॥ सरितां कूलानि उद्रुजंतीति कूलमुद्
तस्य गोप्तुर्द्विरेफाणां कर्णोत्पलनिपातिनां॥ स्वरसंवादिभिः कंठैः शालिगोप्यो जगुर्यशः॥२१
प्रससादोदयादंभः कुंभयोनेर्महौजसः॥ रघोः परिभवाशंकि चुक्षुभे द्विषतां मनः॥२१॥
मदोदग्राः ककुद्मंतः सरितां कूलमुद्रुजाः॥ लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं॥२२॥
जाः॥ उदि कूले रुजिवहोरिति खश्प्रत्ययः॥ अरुर्द्विषेत्यादिना मुमागमः॥ महांत उक्षाणः
पाः महोक्षाः॥ अचतुरेत्यादिना निपातनादकारांतत्वं॥ लीलाखेलं विलाससुभगं तस्य रघोः
उत्साहवतो वृषभस्य तोः परंतपस्य विक्रमं शौर्यमनुप्रापुः अनुचक्रुः॥ २२॥ ॥

रघुवं॰टी॰
७

सर्ग॰४

प्रसवैरिति॥ ॥मदस्येव गंधो येषां तैर्मदगंधिभिः॥ उपमानाच्चेति समासांत इकारः॥ सप्तपर्णानां वृक्षवि
शेषाणां॥ सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यमरः॥ प्रसवैः पुष्पैराहतास्तत्स्पर्धयोन्ना
गाः गजाः॥ गजेपि नागमातंगावित्यमरः॥ असूययेवाहतनिमित्तयोन्नस्पर्धयेव सप्तधैव प्र
सुस्रुवुः॥ मदं ववृषुः॥ प्रतिगजगंधाभिमानादिति भावः॥ करात्कटाभ्यां मेढ्राच्च नेत्राभ्यां मदस्रु

प्रसवैः सप्तपर्णानां मदगंधिभिराहताः॥ असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः॥२३॥ स
रितः कुर्वती गाधाः पथश्चाश्यानकर्दमान्॥ यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत्॥२४

३

तिः पालकाप्ये॥ करान्नासारंध्राभ्यामित्यर्थः॥२३॥ ॥सरित इति॥ ॥सरितो गाधाः सुप्रतराः
कुर्वती पाथो मार्गान् आश्यानकर्दमान् शुष्कपंकान् कुर्वती॥ संयोगादेरातो धातोर्यण्वत
इति श्यायतेर्निष्ठानत्वं॥ शरदृतुः॥ तं रघुं शक्तेः उत्साहशक्तेः प्रथमं प्राक् यात्रायै दंडयात्रायै चोद
यामास॥ प्रभुमंत्रशक्तिसंपन्नस्य शरत्स्वयं उत्साहमुत्पादयामासेत्यर्थः॥२४॥ ४

राम
७

तस्मा इति॥ ॥वाजिनामश्वानां नीराजनाविधौ नीराजनाख्ये शांतिकर्मणि सम्यक् विधिवद्धुतो होमसं
मिद्धो वह्निः प्रागतात् दक्षिणं प्रदक्षिणं तिष्ठद्गुप्रभृतित्वादव्ययीभावः॥ प्रदक्षिणं यदर्चिः ज्व
ला तस्य व्याजेन हस्तेनेव तस्मै जयं ददौ॥ उक्तं महायात्रायां॥ इध्मः प्रदक्षिणगतो हुतभुक् च
पश्चाद्धात्रीं समुद्रवसनां वशगां करोति॥ इति वाजिग्रहणं गजादीनामप्युपलक्षणं॥ तेषामपि नी

तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ॥ प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ॥२५॥
स गुप्तमूलप्रत्यंतः शुद्धपार्ष्णिरयान्वितः॥ षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया॥२६॥

राजनाविधानात्॥२५॥ ॥स इति॥ ॥गुप्तो मूलं स्वनिवासस्थानं प्रत्यंतः प्रांतदुर्गं च येन स गुप्तमूल
प्रत्यंतः॥ शुद्धपार्ष्णिः पृष्ठशत्रुः सेनया रक्षितः पृष्ठदेशो वा अयान्वितः शुभदैवान्वितः
अयः शुभावहो विधिरित्यमरः॥ स रघुः षड्विधं मौलभृत्यादिरूपं बलं सैन्यं॥ मौलं भृत्यं
सुहृच्छ्रेणी द्विषदाटविकं बलमिति कामंदकः॥ आदाय दिशां जिगीषया जेतुमिच्छया प्रत
स्थे॥२६॥

अवाकिरन्निति ॥ ॥वयसा वृद्धाः पौरयोषितः तं रघुं प्रयातं लाजैः मंदरोद्धूतैः पृषतैः बिंदुभिः ॥ क्षीरोर्म
यः क्षीरसमुद्रोर्मयः अच्युतं विष्णुमिव ॥ वाकिरन् पर्यक्षिपन् ॥२७॥ ॥स इति ॥ ॥प्राचीनबर्हि
नमकं स्विन्महाराज इति केचित् ॥ इंद्रः पर्जन्यो मघवा वृषा हरिहयः प्राचीनबर्हिस्तथेतीन्द्रप

अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः ॥ पृषतैर्मंदरोद्धूतैः क्षीरोर्मय इवाच्युतं ॥२७॥
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ॥ अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥२८॥

र्यायेषु हलायुधाभिधानात् ॥ तेन तुल्यः स रघुः ॥ अनिलेनानुकूलवातेनोद्धूतैः केतुभिर्ध्व
जैः ॥ अहितान् रिपून् तर्जयन्निव भर्त्सयन्निव ॥ तर्जिभर्त्स्योरनुदात्तत्वेपि चक्षिङो ङित्करणे
नानुदात्तत्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमिति वामनः ॥ प्रथमं प्राचीं दि
शं ययौ ॥२८॥ ॥

रघुर्जोभिरिति ॥ ॥किं कुर्वन् स्यंदनोद्धूतैः रजोभिः घनसन्निभैर्वर्षितैः क्रियातः परिणामतश्च मेघ
तुल्यैः गजैश्च यथाक्रमं ॥ व्योम आकाशं भुवस्तलमिव भूतलं च व्योमेव कुर्वन् ययाविति पूर्वे
णसंबंधः ॥२९॥ ॥प्रताप इति ॥ ॥अग्रे प्रतापः तेजोविशेषः सप्रभावः प्रतापः प्रभावश्च यत्तेजः कोश
दंडजमित्यमरः ॥ ततः शब्दः सेनाकलकलः तदनंतरं परागो धूलिः परागः पुष्परजसि धूलि

रजोभिः स्यंदनोद्धूतैर्गजैश्च घनसन्निभैः ॥ भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलं ॥२९॥
प्रतापोऽग्रे ततः शब्दः परागस्तदनंतरं ॥ ययौ पश्चाद्रथादीति चतुःस्कंधेव सा चमूः ॥३०॥

स्नानीययोरपीति विश्वः ॥ पश्चाद्रथाश्वादि रथाश्वादिकं चतुरंगबलं इतीत्थं चतुःस्कंधेव
चतुर्व्यूहेव ॥ स्कंधः प्रकांडे कायेंसे विज्ञानादिषु पंचसु ॥ नृपे समूहे व्यूहे चेति हैमः ॥ सा
चमूर्ययौ ॥ रथानीकमिति पाठे शब्दाद्याहारेण योज्यं ॥३०॥ ॥

घुवं॰टी॰ ९

मर्दितैः॥ ॥सरघुः शक्तिमत्वात्समर्थत्वात् मरुपृष्ठानि निर्जलस्थानानि॥ समानौ मरुधन्वानावित्यमरः॥ सर्ग॰ ४
उदंभांसि उद्धृतजलानि चकार॥ नाव्याः नौभिस्तार्या नदीः॥ नाव्यं त्रिलिंगं नौतार्ये इत्यमरः॥ नौवयो
विषमूल्लेत्यादिना यत्प्रत्ययः॥ सुप्रतराः स्वेन तार्याश्चकार विपिनानि अरण्यानि॥ अटव्यरण्यं
विपिनं कान्तारं गहनं वनमित्यमरः॥ प्रकाशानि दृश्यानि चकार॥ तस्यागम्यं किमपि नास्तीति स

मरुपृष्ठान्युदंभांसि नाव्याः सुप्रतरा नदीः॥ विपिनानि प्रकाशानि शक्तिमत्वाच्चकार सः॥
३१॥ पुरोगैः कलुषास्तस्य सह प्रस्थायिभिः कृताः॥ पश्चात्प्रयायिभिः पंकाश्चक्रिरे मार्गनि
म्नगाः॥ ३२॥ स सेनां महतीं कर्षन्पूर्वसागरगामिनीं॥ बभौ हरजटाभ्रष्टां गंगामिव भगीरथ ॥३३॥

थः॥ ३१॥ ॥स इति॥ ॥महतीं सेनां पूर्वसागरगामिनीं कर्षन्सरघुः हरस्य जटाभ्यो भ्रष्टां राम॰ ९
भ्रष्टां गंगां कर्षन्॥ सापि पूर्वसागरगामिनी भगीरथ इव बभौ॥ भगीरथो नाम कश्चित्कपिलद
ग्धानां सागराणां नप्ता तत्पावनाय हरकिरीटात् गंगां प्रवर्तयिता राजा यत्संबंधात् गंगा च
भागीरथीति गीयते॥ ३२॥ ॥

त्याजितैरिति॥ ॥फलं बलात्संगृह्य पक्षे प्रसवं च त्याजितैः॥ त्यजेर्ण्यंतात् द्विकर्मकात् प्रधाने कर्म
णि क्तः॥ उत्खातैः स्वपदाच्चावितैरन्यत्रोत्पाटितैर्बहुधा भग्नैः रणे जितैरन्यत्र छिन्नैः नृपैः पाद
पैर्दंतिनो गजस्येव तस्य रघोर्मार्ग उल्बणः प्रकाश आसीत्॥ प्रकाशं प्रकटं स्पष्टमुल्बणं
विशदं स्फुटमिति यादवः॥ ३३॥ ॥पौरस्त्यानिति॥ ॥जयी जयनशीलः॥ जिदृक्षिविश्र्येण्वमे

त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः॥ तस्यासीदुल्बणो मार्गः पा
दपैरिव दंतिनः॥ ३३॥ पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी॥
प्राप तालीवनश्याममुपकंठं महोदधेः॥ ३४॥

त्यादिना इनिप्रत्ययः सरघुरे
वं पुरोभवान्पौरस्त्यान्प्राच्यान्॥ दक्षिणापश्चात्पुरसस्त्यगिति त्यक्प्रत्ययः॥ तांस्ता
न्सर्वानित्यर्थः॥ वीप्सायां द्विरुक्तिः॥ जनपदान् देशान् आक्रमत॥ तालीवनैः
श्याममं महोदधेरुपकंठं अंतिकं प्राप॥ ३४॥

अनम्राणामिति ॥ ॥ अनम्राणां कर्मणि षष्ठी ॥ समुद्धर्तुरुन्मूलयितुस्तस्माद्रघोः सकाशात्
नीचाश्चानां भयहेतुरिति अपादानात्पंचमी ॥ सिंधुरयान्नदीवेगादिव जिमुलैः सुह्मदेशी
यैः सुह्मादयः शब्दा जनपदवचनाः क्षत्रियमाचक्षते ॥ वैतसीं वेतससंबंधिनीं वृत्तिं प्रणतिमिति
त्यर्थः आश्रित्यात्मा संरक्षितः ॥ अत्र कौटिल्यः बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेत

अनम्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव ॥ आत्मा संरक्षितः सुह्मै
र्वृत्तिमाश्रित्य वैतसीं ॥ ३५ ॥ वंगानुत्खाय तरसा नेता नौसाधनोद्य
तान् ॥ निचखान जयस्तंभान्गंगास्रोतोंतरेषु सः ॥ ३६ ॥ ॥

तसधर्ममातिष्ठेदिति ॥ ३५ ॥ ॥ वंगानिति ॥ ॥ नेता नायकः स रघुः नौभिः साधनैरुद्य
तान्संनद्धान् वंगान्नराजः तरसा बलेन ॥ तरसा बलरंहसीति यादवः ॥ उत्खायोन्मूल्य
गंगायाः स्रोतसां प्रवाहाणामंतरे द्वीपेषु जयस्तंभान्निचखान स्थापितवानित्यर्थः ॥ ३६ ॥

आपादपद्म इति ॥ ॥ आपादपद्मं अंघ्रिपद्मपर्यंतं प्रणताः नम्राः अत एवोत्खाताः ॥ एवमुद्धृता अपि
प्रतिरोपिताः पश्चात्स्थापिताः ते वंगाः कलमा इव शालिविशेषा इव ॥ शालयः कलमाद्याश्च ष
ष्टिकाद्याश्च पुंस्यमी इत्यमरः ॥ तेपि आपादपद्मं मूलपर्यंतं ॥ पादो बुध्नतुरीयांशशैलप्रत्यंतप
र्वते ॥ इति विश्वः ॥ उत्खातप्रतिरोपिताः रघुं फलैर्धनैरन्यत्र सस्यैः संवर्धयामासुः ॥ फले धा
न्ययोः स्पष्टविरूपाणां तेन केरलयोपितां ॥ अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ३७ ॥ आ
पादपद्मप्रणताः कलमा इव ते रघुं ॥ फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥ स
तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ॥ उत्कलादर्शितपथः कलिंगाभिमुखो ययौ ॥ ३८ ॥
तेवाजेनिष्पन्नौ नौगजानयोः सस्यप्रतिकेशावः ॥ ३७ ॥ ॥ स इति ॥ ॥ स रघुर्बद्धाः द्विरदा
एव सेतवो यैस्तैः सैन्यैः कपिशां नाम नदीं करमामिति केचित्पठंति तीर्त्वा उत्कलैः राज
भिः आदर्शितपथः ॥ संदर्शितमार्गः सन् कलिंगाभिमुखो ययौ ॥ ३८ ॥ ॥

सइति ॥ ॥ स रघुर्महेंद्रस्य कुलपर्वतविशेषस्य ॥ महेंद्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥ विंध्यश्च
पारियात्रश्च सप्तात्र कुलपर्वताः इति विष्णुपुराणात् ॥ मूर्ध्नि तीक्ष्णं दुःसहं प्रतापं यंता सारथिर्गं
भीरवेदिनो द्विपस्य गजविशेषस्य मूर्ध्नि तीक्ष्णां निशितां अंकुशमिव न्यवेशयत् निक्षिप्तवान् ॥ ब
ग्वेदात्तु श्रोणितस्रावात् मांसस्य व्यथनादपि ॥ आत्मानं यो न जानाति स स्यात् गंभीरवेदितेति राज

स प्रतापं महेंद्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ॥ अंकुशं द्विरदस्येव यंता गंभीरवेदिनः ॥ ३९ ॥
प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनः ॥ पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥

पुत्रीये चिरकालेन यो वेत्ति शिक्षां परिचितामपि ॥ गंभीरवेदी विज्ञेयः स गजो गजवेदिभि
रिति स्तगवर्मीये ॥ ३९ ॥ ॥ प्रतीति ॥ ॥ गजसाधनः सन् कालिंगः कलिंगानां राजा ॥ द्व्यञ्म राम
गधकलिंगसूरमसादण् इत्यण्प्रत्ययः ॥ अस्त्रैरायुधैस्तं रघुं पक्षाणां छेदे उद्यतं उद्युक्तं श ११
क्रं शिलावर्षी पर्वत इव प्रतिजग्राह अभियुक्तवान् ॥ ४० ॥ ॥

द्विषामिति ॥ ॥ काकुत्स्थो रघुः तत्र महेंद्राद्रौ द्विषां नाराचदुर्दिनं नाराचानां बाणविशेषाणां दुर्दि
नं लक्षणया वर्षमुच्यते ॥ विषह्य सहित्वा सत्पपाशं स्त्रं मंगलस्नात इव विजयसंमंग
ल्यार्थमभिषिक्त इव जयश्रियं प्रपेदे प्राप ॥ यत्तु स वौषधिस्नानं तन्मंगलस्नानमरोचकमिति

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनं ॥ सन्मंगलस्नात इव प्रतिपेदे जयश्रियं ॥
४१ ॥ वायव्यास्त्रविनिर्धूतात्पक्षाद्विधात्महोदधेः ॥ गजानीकात्स कालिंगं तार्क्ष्यः
सर्पमिवाददे ॥ ४२ ॥ तांबूलीनां दलैस्तत्र रचितापानभूमयः ॥ नालिकेरासवं योधाः शा
त्रवं च पपुर्यशः ॥ ४३ ॥

पाददे ॥ ४२ ॥ तांबूलीनामिति ॥ तत्र महेंद्राद्रौ युध्यंते इति योधाः प
चाद्यच् ॥ रचिताः कल्पिताः आपानभूमयः पानयोग्यप्रदेशाः यैस्ते तथोक्ताः संतः ना
रिकेलासवं नारिकेलमद्यं तांबूलीनां नागवल्लीनां दलैः पपुः ॥ तत्र विजक्तुरित्यर्थः ॥
शात्रवं यशश्च पपुर्जह्रुरित्यर्थः ॥ ४२ ॥ ॥

गृहीतेति॥ ॥धर्मविजयी धर्मार्थं विजयशीलः स नृपो रघुः गृहीतश्चासौ प्रतिमुक्तस्तस्य महेंद्रना
थस्य कालिंगस्य श्रियं जहार॥ धर्मार्थमिति भावः॥ मेदिनीं तु न जहार॥ शरणागतवात्स
ल्यादिति भावः॥ ४३॥ ॥ततइति॥ ॥ततः प्राचीविजयानंतरं फलवत्पूगमालिना फलित

गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः॥ श्रियं महेंद्रनाथस्य ज
हार न तु मेदिनीं॥ ४३॥ ततो वेलातटेनैव फलवत्पूगमालिना॥
अगस्त्याचरितामाशामनाशास्यजयो ययौ॥ ४४॥ ॥

क्रमुकश्रेणिमता॥ व्रीह्यादित्वादिनिः॥ प्रत्ययः॥ वेलायाः समुद्रकूलस्य तटेनोपांतेनैवाग
स्त्येनाचरितामाशां दक्षिणां दिशं अनाशास्यजयः॥ अयत्नसिद्धत्वादप्रार्थनीयजयः सन्य
यौ॥ अगस्त्यो दक्षिणामाशामाश्रित्य नभसि स्थितः वरुणस्यात्मजो योगी विंध्यवातापिमर्दन इति
ब्रह्मपुराणे॥ ४४॥ ॥

स इति॥ ॥स रघुर्गजानां दानेन मदेन सुगंधिना सुरभिगंधिना॥ गंधस्येत्यादिना इकारादेशः स
मासांतः॥ यद्यपि गंधस्येत्त्वे तदेकांतग्रहणं कर्तव्यमिति॥ नैसर्गिकगंधविवक्षायामेव इकारादे
शस्तथापि निरंकुशाः कवयः॥ तथा माघकाव्ये॥ ववुरयुक्छदगुच्छसुगंधयः सततगास्तत
गा नगिरो सिभिः॥ नैषधे च॥ अपांहि तृप्ताय न वारिधाराः स्वादुः सुगंधिः स्वदते तुषारेति॥ न

स सैन्यपरिभोगेन गजदानसुगंधिना॥ कावेरीं
सरितां पत्युः शंकनीयामिवाकरोत्॥ ४५॥ ॥

कर्मधारयान्मत्वर्थीय इति निषेधादिनिप्रत्ययपक्षोपि जघन्य एव॥ सेनायां समवेताः सै
न्याः सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते इत्यमरः॥ सेनाया वा इति ण्यप्रत्ययः॥ सैन्या
नां परिभोगेन उपभोगेन कावेरीं नाम सरितं सरितां पत्युः समुद्रस्य शंकनीयामविश्वस
नीयामिवाकरोत्॥ संभोगलिंगदर्शनात्तद्भर्तुरविश्वासो भवतीति भावः॥ ४५॥ ॥

बलैरिति॥ ॥विजिगीषोर्विजेतुमिच्छोर्गताध्वनस्तस्य रघोर्बलैः सैन्यैः॥ बलं शक्तिर्बलं सैन्यमिति यादवः
मरीचेषु मरीचवनेषु उद्भ्रांताः परिभ्रांताः हारीताः पक्षिविशेषा यासु ताः॥ तेषां विशेषो हारीतानाम
कुः कारंडवः प्लव इत्यमरः॥ मलयाद्रेरुपत्यका आसन्नभूमयः॥ उपत्यकाद्रेरासन्ना भूमिरित्य
मरः॥ उपाधिभ्यां त्यकन्नित्यादिना त्यकन्प्रत्ययः॥ अध्युषिताः उपत्यकास्तैरुषितमित्यर्थः॥ उ

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः॥ मरीचोद्भ्रांतहारीता मलयाद्रेरुपत्यकाः॥४६॥
ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः॥ तुल्यगंधिषु मत्तेभकटेषु फलरेणवः॥४७॥

पान्वध्याङ्ग सङ्इतिकर्मत्वं॥४६॥ ॥ससंजुरिति॥ ॥अश्वैः क्षुण्णानामेलानामेलालतानां उत्पति
ष्णवः उत्पतनशीलाः॥ अलंकृञित्यादिना इष्णुच् प्रत्ययः॥ फलरेणवः फलरजांसि॥
तुल्यगंधिषु समानगंधेषु॥ सर्वधनीति वदिनंतो बहुव्रीहिः॥ मत्तेभानां कटेषु गंडेषु ससं
जुः सक्ताः॥ गजगंडः कटिः करावित्यमरः॥४७॥ ॥

भोगीति॥ ॥चंदनानां चंदनद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनानां निम्नेषु समर्पितं संजितं त्रिपदी
छिदिनां पादशृंखलच्छेदकानां अपि त्रिपदीपादबंधनमिति यादवः॥ करिणां ग्रैवा सुजवं ग्रैवं कंठ
बंधनमिति॥ ग्रीवाभ्योऽण् चेत्यण् प्रत्ययः॥ नास्रंसत न स्रस्तं अभूत्॥ द्युद्भ्यो लुङीति परस्मैपदं॥ पु
षादित्वाद्ङ् अनिदितमित्यादिना नकारलोपः॥४८॥ दिशीति॥ ॥दक्षिणस्यां दिशि रवेरपि तेजो
मंदायते मंदं भवति॥ लोहितादित्वात् क्यष्प्रत्ययः॥ वा क्यष इत्यात्मनेपदं॥ दक्षिणायने ते

भोगिवेष्टनमार्गेषु चंदनानां समर्पितं॥ नास्रंसत्करिणां ग्रैवं त्रिपदीच्छेदिनामपि॥४८॥
दिशि मंदायते तेजो दक्षिणस्यां रवेरपि॥ तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे॥४९॥

जो मांद्यादिति भावः॥ तस्यामेव दिशि पांड्याः पांडूनां जनपदानां राजानः पांड्याः॥ पांड्यो
ड्युण्वक्तव्यः॥ रघोः॥ प्रतापं न विषेहिरे न सोढवंतः॥ सूर्यविजयिनोपि विजितवानिति
नायकस्य महानुत्कर्षो गम्यते॥४९॥

ताम्रपर्णीति॥ ॥ तेपांड्याः ताम्रपर्ण्यानद्याः समेतस्य संगतस्य महोदधेः संबंधि संचितं मुक्तासारं मौक्तिक
वरं सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिष्वित्यमरः॥ स्वस्य कीयं संचितं यशः इव तस्मै रघवे निपत्य
प्रणिपत्य ददुः॥ पराशः ऋतुत्वादौ पम्य ताम्रपर्णीसंगमे मौक्तिकोत्पत्तिरिति प्रसिद्धं॥ ५०॥ ॥ स्
इति॥ ॥ असह्येति युग्ममेतत्॥ ॥ असह्यविक्रमः स रघुः तटेषु सानुषु आलीनचंदनौ व्याप्तचंदनौ
ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः॥ ते निपत्य ददुस्तस्मै यशः स्वमिव संचितं॥ ५०॥ स निर्वि
श्य यथाकामं तटेष्वालीनचंदनौ॥ स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ॥ ५१॥ असह्य
विक्रमः सह्यं दूरान्मुक्तमुदन्वता॥ नितंबमिव मेदिन्याः स्रस्तांशुकमलंघयत्॥ ५२॥ स्तनपक्षे अं
तेषु आप्तचंदनानुलेपौ तस्याः दक्षिणस्याः दिशः स्तनाविव स्थितौ मलयदर्दुरौ नाम शैलौ यथाकामं यथे
च्छं निर्विश्य उपभुज्य निवेशो भृतिभोगयोरित्यमरः॥ ५१॥ असह्येति उदकानि अस्य संतीति उदन्वा
न् उदधिः॥ उदन्वानुदधौ चेति निपातः॥ उदन्वता दूरान्मुक्तं दूरतस्त्यक्तं॥ स्तोकांतिकदूरा
र्थकृच्छ्राणि क्तेनेति समासः॥ पंचम्याः स्तोकादिभ्य इत्यलुक् स्रस्तांशुकं मेदिन्या नितंबमिव स्थि
तं सह्यं सह्याद्रिमलंघयत् प्राप्तः अतिक्रांतो वा॥ ५२॥

संप्रति प्रतीचीं दिशं जिगीषया यातीत्याह॥ ॥ तस्येति॥ ॥ अपरांतानां पाश्चात्यानां जये उद्यतै र
घुसैन्यैः अपरांताः पाश्चात्याः ते च सूर्पारकादय इति यादवः॥ विसर्पद्भिर्गच्छद्भिस्तस्य रघो
रनीकैः सैन्यैः॥ अनीकं तु रणे सैन्ये इति विश्वः॥ अर्णवो रामस्य जामदग्न्यस्य अस्त्रेणोत्सा
रितोऽपसारितोऽपि सह्यलग्न इवासीत्॥ सैन्यं द्वितीयोऽर्णव इवाभूदिति भावः॥ ५३

तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः॥ रामास्त्रोत्सारितो
प्यासीत्सह्यलग्न इवार्णवः॥ ५३॥ भयोत्सृष्टविभूषाणां तेन के
रलयोषितां॥ अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥ ५४॥

भयेति॥ ॥ तेन रघुणा भयेनोत्सृष्टविभूषाणां परिहृतभूषणानां केरलयोषिता
मलकेषु चमूरेणुः सेनारजः चूर्णस्य कुंकुमादिरजसः प्रतिनिधीकृतः॥ एतेन
योषितां पलायनं चमूनां च तदनुधावनं ध्वन्यते॥ ५४॥ ॥

मरुलेति॥ ॥मुरला नाम केरलदेशेषु काचिन्नदी॥मुरचीति केचित्पठंति॥तस्या मारुतेनउ
धूतं उत्थापितं कैतकं केतकी संबंधि रजः तद्योधवारवाणानां रघुभटकंचुकानां॥कंचुको वार
बाणो स्त्रीत्यमरः॥अयत्नपटवासतां अयत्नसिद्धवस्त्रवासनाऽस्त्वं अगमत्॥पिष्टातः
पटवासकः इत्यमरः॥ ५५॥ ॥अभ्यभूयतेति॥ ॥चरतां गच्छतां वाजिनां वाहानां॥वा

मरुलामारुतोधूतमगमत्कैतकं रजः॥तद्योधवारबाणानामयत्नपटवासतां॥५५॥
अभ्यभूयत वाहानां चरतां गात्रसिंजितैः॥वर्मभिः पवनोधूतराजतालीवनध्वनिः॥५६

जिवाहार्वगंधर्वहयसैंधवसप्तयइत्यमरः॥गात्रसिंजितैः॥गात्रेषु शब्द्यमानैः॥कृतरि
क्तः॥संजितैरितिपाठः॥सजतेर्प्यंतात्कर्मणिक्तः॥वर्मभिः कवचैः पवनेनोधूतानां कंपि
पितानां राजतालीवनानां ध्वनिरभ्यभूयत तिरस्कृतः॥५६॥ ॥ ॥

राम १५

खर्जूरीति॥ ॥खर्जूरीणां तृणद्रुमविशेषाणां॥खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमा इत्यम
रः॥स्कंधेषु प्रकांडेषु॥अस्त्री प्रकांडः स्कंधः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः॥नद्धानां ब(द्ध)ा
नां करिणां मदोद्गारेण मदस्रावेण सुगंधिषु॥गंधस्येत्वादिनाऽकारः॥कटेषु गंडेषु पुंनागेभ्यः
नागकेसरेभ्यः॥पुंनागपुष्पाणि विहाय ल्यब्लोपे पंचमी॥शिलीमुखाः अलयः पेतुः॥अ

खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु॥कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः॥५७
अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ॥अपरांतमहीपालव्याजेन रघवे करं॥५८॥॥

लिवाणोशिलीमुखावित्यमरः॥ततोपि सौगंध्यातिशयादिति भावः॥५७॥अवकाशमिति भावः॥
५७॥अवकाशमिति॥ ॥उदन्वानुदधिः रामाय जामदग्न्याय अभ्यर्थितः याचितः सन्नवकाशं स्था
नं ददौ॥रघवे तु अपरांतमहीपालव्याजेन करं बलिं ददौ॥बलिहस्तांशवः करा इत्यमरः॥अ
परांतानां समुद्रमध्यदेशत्वात्तैर्दत्ते करे समुद्रदत्तत्वोपचारः॥करदानेन तु नीत्या न तु याञ्चेति
रामाद्राघोरुत्कर्षः॥५८॥ ॥

मत्तेति ॥ तत्र स रघुर्मत्तानां इभानां रदनोत्कीर्णानि दंतक्षतान्येव व्यक्तानि स्फुटा
नि विक्रमलक्षणानि पराक्रमचिन्हानि विजयवर्णावलिस्थानानि यस्मिन् तं तथोक्तं ॥ त्रि
कूटमेवोच्चैर्जयस्तंभं चकार ॥ गाढप्रकाराद्धि त्रिकूटोद्रि रेवोत्कीर्णवर्णस्तंभ इव रघोर्जय

मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं ॥ त्रिकूटमेव तत्रोच्चैर्ज
यस्तंभं चकार सः ॥ ५९ ॥ पारसीकांस्ततो जेतुं प्रतस्थे स्थ
लवर्त्मना ॥ इंद्रियाख्यानिव रिपूंस्तत्वज्ञानेन संयमी ॥ ६० ॥

स्तंभकोभूदित्यर्थः ॥ ५९ ॥ पारसीकानिति ॥ ॥ ततः स रघुः संयमी योगी तत्वज्ञानेनेंद्रिया
ख्यान् इंद्रियनामकान् रिपून् इव पारसीकान् राज्ञो जेतुं स्थलवर्त्मना प्रतस्थे ॥ न तु नेदिष्टे
नापि जलपथेन समुद्रयानस्य निषिद्धत्वात् इति भावः ॥ ६० ॥ ॥

यवनीति ॥ ॥ स रघुः यवनीनां यवनस्त्रीणां ॥ जातेरस्त्रीविषयादिति ङीप् ॥ मुखान्येव पद्मानीव मुखपद्मा
नि ॥ उपमितसमासः ॥ तेषां मधुना मद्येन यो मदो मदरागः ॥ कार्यकारणभावयोरभेदेन निर्देशः ॥
तं न सेहे ॥ कथमिव अकाले प्रावृट्व्यतिरिक्तकाले जलदोदयः ॥ प्रावृषि पद्मविकासस्याप्रसक्तेर्ल
द्मजानां संबंधिनं बालातपमिव ॥ अब्जहिततया दब्जसंबंधितं सौरातपस्य ॥ ६१ ॥ ॥ संग्राम इति ॥

यवनीमुखपद्मानां सेहे मधुमदं न सः ॥ बालातपमिवाब्जानामकाल
जलदोदयः ॥ ६१ ॥ संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाध
नैः ॥ शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥ ॥

तस्य रघोरश्वसाधनैः पश्चाद्भवैः पाश्चात्यैर्यवनैः सह ॥ दक्षिणापश्चात्पुरसस्त्यक् ॥ सहार्थे
तृतीया ॥ शृंगाणां विकाराः शार्ङ्गाणि धनूंषि तेषां कूजितैः ॥ अथवा शार्ङ्गं शृंगसंबंधिभिः कू
जितैः विज्ञेया अनुमेयाः ॥ प्रतियोधाः प्रतिभटाः ॥ यस्मिन् तस्मिन् रजसि तुमुलः संग्रामः स
ङ्कुलयुद्धमभूत् ॥ तुमुलं रणसंकुलमिति विश्वः ॥ ६२ ॥ ॥

रघुवं. टी.
१७

सर्ग. ४

भल्लेति॥ ॥स रघुः भल्लापवर्जितैर्बाणविशेषकृत्तैः॥ स्नुही दल फल्गो भल्ल इतियादवः॥ श्मश्रुलैः प्र
वृद्धश्मश्रुरवरोमवद्भिः॥ सिध्मादित्वाल्लच्प्रत्ययः॥ तेषां पाश्चात्यानां शिरोभिः सरघाभिर्मधुमक्षिका
भिर्व्याप्तैः॥ सरघा मधुमक्षिकेत्यमरः॥ क्षुद्राः सरघाः क्षुद्राभ्रमरानदीवेरपा सरघा कटकारिकेत्यम
रः॥ तद्रम्बतो क्षुद्राभिः कृतानि क्षौद्राणि मधूनि॥ क्षौद्रं मधुनि पानीये इत्यमरः॥ क्षुद्रा भ्रमरव

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीं॥ तस्तार सरघाव्याप्तैः स क्षौद्रपट
लैरिव॥६३॥ अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः॥ प्रणिपातप्रती
कारः संरंभो हि महात्मनां॥६४॥

टरवातपादिति संज्ञायामञ्प्रत्ययः॥ ते
षां पटलैस्तवकैरिव महीं तस्तारछादयामास॥६३॥ ॥अपनीतेति॥ ॥शेषाः हतावशिष्टाः
अपनीतशिरस्त्राणाः अपसारितशीर्षण्याः सन्तः शरणागतलक्षणमेतत्॥ तं रघुं शरणं य
युः॥ तथाहि॥ महात्मनां संरंभः संक्षोभः प्रणिपातः प्रणतिरेव प्रतीकारो यस्य सहि महतां पर
कीयमौद्धत्यमेवासह्यं न तु जीवितमिति भावः॥६४॥॥

राम
५

विनयंत इति॥ ॥तस्य रघोर्योधाः भटाः आस्तीर्णान्यजिनरत्नानि चर्मश्रेष्ठानि यासु द्राक्षावलयानां
भूमिषु॥ मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति चेत्यमरः॥ मधुभिर्द्राक्षाफलप्रकृतिकैर्मद्यैः
विजयश्रमं युधखेदं विनयंते स्म अपनीतवंतः॥ कर्तृस्थे चाशरीरे कर्मण्यात्मनेपदं॥ लट्स्म
इति भूतार्थे लट्॥६५॥ ॥तत इति॥ ॥ततो रघुर्भास्वान् सूर्य इव शरैर्बाणैः उस्रैः किरणै

विनयंते स्म तद्योधा मधुभिर्विजयश्रमं॥ आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु॥६५॥
ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशं॥ शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव॥६६॥
जितान जय्यस्तानेव कृत्वा रथपुरःसरान्॥ महार्णवमिवौर्वाग्निः प्रविवेशोत्तरापथं॥६७॥

रिव॥ किरणोस्रमयूखांशुगभस्तिघृणिरश्मय इत्यमरः॥ उदीच्यान् उदग्भवान् नृपान्
रसान् उदकानीवोद्धरिष्यन् कौबेरीं कुबेरसंबंधिनीं दिशमुदीचीं प्रतस्थे॥ अनेके वशा बे
नेपमुपमायपाद्ददं डीए कानेके वशा दत्वा त्वावाक्योपमा द्विधेति॥६६॥ ॥ ॥

विनीतेति॥ ॥सिंधुर्नामिकाश्मीरदेशेषु कश्चिन्नदीविशेषः॥ देशे नदविशेषेऽब्धौ सिंधुर्ना सरिति स्त्रियामि
त्यमरः॥ सिंधोस्तीरे विचेष्टनैरंगपरिवर्तनैर्विनीता अध्वश्रमास्तस्य रघोर्वाजिनोऽश्वाः लग्नाः कुंकु
मकेसराः कुंकुमकुसुमकिंजल्का येषां तान्॥ पद्म॥ लग्नकुंकुमकेसराः सटाः येषां तान् स्कंधा
न् दुधुवुः कंपयंतिस्म॥ ६७॥ ॥तत्रेति॥ ॥तत्रोदीच्यां दिशि भर्तृषु व्यक्तविक्रमं जातं वधेन स्फुट

विनीताध्वश्रमास्तस्य सिंधोस्तीरविचेष्टनैः॥ दुधुवुर्वाजिनः स्कंधाल्लग्न
कुंकुमकेसरान्॥ ६७॥ तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमं॥
कपोलपाटलादेशि बभूव रघुचेष्टितं॥ ६८॥ ॥ ॥

पराक्रममित्यर्थः॥ रघुचेष्टितं रघुव्यापारः हूणाः जनपदाः क्षत्रियाः तेषामवरोधाः
अंतःपुरस्त्रियः तेषां कपोलेषु पाटलस्य पाटलिम्नः ताडनादिकृतारुण्यस्य आदेशि उ
पदेशकं बभूव॥ अथवा पाटलआदेशो आदेशो यस्य तत् बभूव। स्वपतिवधात् इत्यर्थ
॥६८॥

कांबोजा इति॥ ॥कांबोजा राजानः समरे तस्य रघोर्वीर्यं सोढुमनीश्वराः अशक्ताः संतः गजानामाला
नं बंधनं॥ नावेलुदि विजाषालीयतेरिमात्तं॥ तेन परिक्लिष्टैः परिक्षतैरक्षोटैः वृक्षविशेषैः सार्ध
मानताः॥ ६९॥ ॥तेषामिति॥ ॥तेषां कांबोजानां सदश्वैः भूयिष्ठास्तुंगाः द्रविणानां हिरण्या

कांबोजाः समरे सोढुं तस्य वीर्यमनीश्वराः॥ गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः॥
६९॥ तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः॥ उपदा विविशुः शश्वन्नोत्सेकः कोशलेश्वरं॥
॥ ७०॥

नां॥ हिरण्यं द्रविणं द्युम्नमित्यमरः॥ राशयः उपदाः उपायनानि॥ उपायनमुपग्राह्यमुप
हारं तथोपदेत्यमरः॥ कोशलेश्वरं रघुं शश्वत् असकृत् विविशुः॥ मुहुर्मुहुः पुनः शश्वदभी
क्ष्णमसकृत्समा इत्यमरः॥ उत्सेकाः गर्वास्तु न विविशुः॥ सत्यपि गर्वकारणे न जगर्वेत्यर्थः॥ ७०॥

ततइति॥ ततोनंतरं अश्वसाधनः स रघुः गौर्याः गुरुं पितरं शैलं हिमवंतं उद्धूतैरश्वखुरोद्धूतैर्धातूनां गै
रिकादीनां रेणुभिस्तत्कूटान् तस्य शृंगाणि॥ कूटोऽस्त्री शिखरं शृंगमित्यमरः॥ वर्धयन्निव आरुरोह।
उत्पतद्धूलिदर्शनाच्छिखरवृद्धिबुद्धिर्भ्रमो जायते इति भावः॥७१॥ शशंसेति॥ तुल्य
सत्त्वानां सैन्यैः समानबलानां गुहासु शेरते इति गुहाशयाः॥ अधिकरणे शेतेरित्यच् प्रत्य

ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः॥ वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः॥७१॥
शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमं॥ गुहाशयानां सत्त्वानां परिवृत्यावलोकितं॥७२॥

यः॥ तेषां सिंहानां संबंधि परिवृत्य परावृत्य वा॥ लोकितं शयित्वैव ग्रीवाभंगेनावलोकनं कर्तृ सैन्यघो
षेपि तावत्कलकले संभ्रमकारणे सत्यपि॥ असंभ्रमं अंतःक्षोभविरहं॥ नञः प्रसज्यप्रतिषेधेपि
समास इष्यते॥ शशंस कथयामास॥ सैन्येन्य इत्यर्थः गम्यते बाह्यचेष्टितमेव मनोवृत्तेरनुमापक
मिति भावः॥ असंभ्रमत्वे हेतुः॥ तुल्यसत्त्वानामिति न हि समबलः समबलाद्बिभेतीति भावः॥७२॥

भूर्जेष्विति॥ भूर्जेषु भूर्जपत्रेषु॥ भूर्जपत्रो भुजो भूर्जो मिडत्वक्चर्मिकामतेति यादवः॥ मर्मरः शुष्क
पर्णध्वनिः॥ मर्मरः शुष्कपर्णध्वनिः॥ मर्मरः शुष्कपर्णानामिति यादवः॥ अयं च शुक्लादिशब्दवद्गुणि
न्यपि वर्तते प्रयोगस्तेच॥ मर्मरैरगरुधूपगंधिभिरिति॥ अतो मर्मरीभूताः मर्मरशब्दवंतो भूता इत्य
र्थः॥ कीचकानां वेणुविशेषाणां ध्वनिहेतवः॥ श्रोत्रसुखावहा इति भावः॥ गंगाशीकरिणः शी

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः॥ गंगाशीकरिणो मार्गे मरुतस्तं सिषेविरे॥७३॥
विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः॥ दृषदो वासितोत्संगा निषण्णमृगनाभिभिः॥७४॥

तज्जा इत्यर्थः॥ मरुतो वाताः मार्गे तं सिषेविरे॥७३॥ विशश्रमुरिति॥ सैनिकाः सेनायां
समवेताः॥ प्राग्वहतीयष्ठक्॥ प्रत्ययः॥ नमेरूणां सुरपुंनागानां छायासु निषण्णानां दृष
दुपविष्टानां कस्तूरीमृगाणां नाभिभिर्वासितोत्संगाः सुरभिततलाः दृषदः शिलाः अ
ध्यास्याधिष्ठाय विविशुर्विश्रांताः॥७४॥

सरलेति॥॥सरलेषुदेवदारुविशेषेषुआसक्तानियानिमातंगानांगजानांग्रैवाणिग्रैवेयाणिकंठश्रृं
खलानि॥ग्रीवाभ्यश्चेतिचकाराड्ढञ्प्रत्ययः॥तेषुस्फुरितत्वचः प्रतिफलितभासःऔषधयःनक्तं
चेतोलताविशेषाः॥नेतुर्नायकस्यरघोरस्नेहदीपिकाः॥तैलनिरपेक्षाःप्रदीपाःआसन्॥७५

सरलासक्तमातंगग्रैवेयस्फुरितत्विषः॥आसन्नोषधयोनेतुर्नक्तमस्नेहदीपिकाः॥७५॥
तस्योत्सृष्टनिवासेषुकंठरज्जुक्षतत्वचः॥गजवर्ष्मकिरातेभ्यःशशंसुर्देवदारवः॥७६॥

तस्येति॥तस्यरघोरुत्सृष्टेषुकल्पितेषुनिवासेषुसेनानिवेशेषुकंठरज्जुभिर्गजग्रैवेयैःक्षताः
निष्पिष्टाःत्वचोयेषांतेदेवदारवःकिरातेभ्योवनचरेभ्योगजानांवर्ष्मप्रमाणं॥वर्ष्मदेहप्रमा
णयोरित्यमरः॥शशंसुःकथितवंतः॥देवदारुस्कंधत्वक्क्षतेर्गजानामौन्नत्यंअनुमीयत
इत्यर्थः॥७६॥

पार्वतीयैः॥

तत्रेति॥॥तत्रहेमाद्रौरघोःपर्वतेभवैःपार्वतीयैःपर्वतादिभ्यश्छप्रत्ययः॥गणैरुत्सवसंकेताख्यैःसप्तभिःसह॥
गणानुत्सवसंकेतानजयत्सप्तपांडवइतिमहाभारते॥नाराचानांबाणविशेषाणांक्षेपणीयानांभिंडि
पालानांअश्मनांचनिष्पेषेणसंघर्षेणउत्पतिताअनलायस्मिन्तत्पोक्तं॥क्षेपणीयोभींडिपालोस्त्रगो
दीर्घमहाफलइतियादवः॥घोरंभीमंजन्यंयुद्धंअभूत्॥युधमायोधनंजन्यमित्यमरः॥७७॥

तत्रजन्यंरघोर्घोरंपार्वतीयैर्गणैरभूत्॥नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं॥७७॥
शरैरुत्सवसंकेतान्सकृत्वाविरतोत्सवान्॥जयोदाहरणंबाह्वोर्गापयामासकिंनरान्॥७८॥
परस्परस्यविज्ञातस्तेषूपायनपाणिषु॥

शरैरिति॥सरघुःशरैर्बाणैःउत्सवसंकेतान्नामगणा
न्विरतोत्सवान्कृत्वाजितइत्यर्थः॥किंनरान्बाह्वोर्भुजयोःजयोदाहरणंजयख्यापकंप्रबंधंवि
शेषंगापयामास॥गतिबुद्धीत्यादिनाकिंनराणांकर्मत्वं॥७८॥॥परस्परेणेति॥तेषुगणेषुउपायन
युक्ताः॥पाणयोयेषांतेषुसत्सुपरस्परेणान्योन्यंराज्ञःहिमवतःसारोधनरूपोविज्ञातः॥ ॥

हिमाद्रिपारात्तःसारोबलरूपोविज्ञातः॥एतेनतत्रत्यवस्तूनामनर्घ्यत्वंगणानामस्तूतपूर्वःपराज
यइतिध्वन्यते॥७९॥तत्रेति॥सरघुःतत्रहिमाद्रौअक्षोभ्यमप्रधृष्यंयशोराशिंनिवेश्यनिधायपौ
लस्त्येनरावणेनतुलितस्यचालितस्यअद्रेःकैलासस्याह्रियमादधानोजयन्निवारुरोहअवतता
र॥कैलाशमगत्वेवप्रतिनिवृत्तइत्यर्थः॥नहिशूराःपरेणपराजितंअभियुंजतेइतिभावः॥८०

राज्ञाहिमवतःसारोराज्ञःसारोहिमाद्रिणा॥७९॥तत्राक्षोभ्यंयशोराशिंनिवेश्यावरुरोहसः॥पौलस्त्यतुलितस्याद्रेरादधानइवह्रियं॥८०॥चकंपेतीर्णलौहित्येतस्मिन्प्राग्ज्योतिषेश्वरः॥तद्गजालानतांप्राप्तैःसहकालागरुद्रुमैः॥८१॥॥

चकंपेति॥॥तस्मिन्रघौतीर्णलौहित्यानामनदीयेनतस्मिन्तीर्णलौहित्येसतिप्राग्ज्योति
षाणांजनपदानांईश्वरः॥तस्यरघोर्गजानामालानतांप्राप्तैःकालागरुद्रुमैःकृष्णागरु
वृक्षैःसहचकंपेकंपितवान्॥८१॥ ॥

नेति॥॥सःप्राग्ज्योतिषेश्वरः॥रुद्धार्कमावृत्तसूर्यंप्रधारावर्षंततदुर्दिनंचधाराहवृष्टिविनादु
र्दिनीनूतेऽश्वस्यरघोरथवर्त्मरजोपिनप्रसेहे॥पाताकिनीकृतएवप्रसेहेनकुतोपीत्यर्थः
८२॥तमिति॥॥कामरूपाणांनामदेशानांप्रभुः॥अत्याखंडलविक्रममतीन्द्रपराक्रमंतं

नप्रसेहेसरुद्धार्कमधारावर्षदुर्दिनं॥रथवर्त्मरजोप्यस्यकुतएवपताकिनीं॥८२॥तमीशःकामरूपाणामत्याखंडलविक्रमं॥भेजेभिन्नकटैर्नागैरन्यां[illegible]नुपरुरोधयैः॥८३॥ ॥

रघुंभिन्नाःस्रवन्मदाःकटाःगंडाःयेषांतैर्नागैःगजैःसाधनैर्भेजे॥नागान्दत्वाशरणंगतइ
त्यर्थः॥कीदृशैर्नागैःयैर्नागैरन्यान्रघुव्यतिरिक्तान्नृपाननुपरुरोध॥शूराणामपिशूरोरघुरितिभावः॥
८३

कामरूपेति ॥ कामरूपेश्वरो हेमपीठस्याधिदेवतां तस्य रघोः पादयोः छायां कनकमयपादपीठव्यापि
नीं कांतिं रत्नान्येव पुष्पाणि तेषामुपहारेण समर्प्पणेनानर्च अर्चयामास ॥ ८४ ॥ इतीति ॥ जि
ष्णुः जयनशीलः ॥ ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः ॥ स रघुः इत्थं दिशो जित्वा रथै रुद्धतरजः छत्रशू
न्येषु रघोरेकछत्रकत्वादिति भावः ॥ राज्ञां मौलिषु विश्रमयन् संक्रामयन्नित्यर्थः ॥ न्यवर्त्तत निवर्त्त

म कामरूपेश्वरस्तस्य हेमपीठाधिदेवतां ॥ रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥ ८४ ॥ इति
जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतं ॥ रजो विश्रमयन् राज्ञां छत्रशून्येषु मौलिषु ॥ ८५ ॥ स
विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणं ॥ आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८६ ॥

८५ ॥ स रघुः सर्वस्वं दक्षिणा यस्य तं सर्वस्वदक्षिणं ॥ विश्वजित् सर्वस्वदक्षिण इति श्रुतेः ॥ विश्व
जितं नाम यज्ञं आजह्रे कृतवानित्यर्थः ॥ युक्तं चैतदित्याह ॥ सतां साधूनां वारिमुचां मेघानामिव
आदानमर्जनं विसर्गाय त्यागाय ॥ पात्रविनियोगायेत्यर्थः ॥ ८६ ॥ ॥

सत्रांत इति ॥ काकुत्स्थो रघुः सत्रांते यज्ञांते ॥ सत्रमाच्छादने यज्ञे सदादाने धनेपि चेति विश्वः ॥
सचिवानां सखा सचिवसखः सन् तेषामात्यंतानुसरणद्योतनार्थं राज्ञः सचिवत्वव्यपदेशः ॥
राजाहः सखिभ्यष्टच् ॥ गुर्वीभिर्महतीभिः पुरस्क्रियाभिः पूजाभिः शमितपराजयेन यद्व्य

सत्रांते सचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान् ॥ काकु
त्स्थश्चिरविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवर्त्तयेनुमेने ॥ ८७ ॥

लीकं दुःखं वैलक्ष्यं वा येषां तान् ॥ दुःखे वैलक्ष्ये व्यलीकमिति यादवः ॥ चिरविरहेणोत्कंठिताः
उत्सुकाः अवरोधाः अंतःपुरांगना येषां तान् ॥ राज्ञोऽपत्यानि राजन्याः क्षत्रियास्तान् ॥ रा
जश्वशुराद्यदिति जातौ यत्प्रत्ययः ॥ मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराडित्यमरः ।
स्वपुरं प्रति निवृत्तये प्रतिगमनायानुमेनेऽनुज्ञातवान् ॥ ८७ ॥ ॥

तइति॥ ॥तेराजानंरेखाश्चध्वजाश्चकुलिशानिचातपत्राणिच।ध्वजाद्याकारोरेखाइत्यर्थः।
तानिचिह्नानियस्मिन्तयोक्तं॥प्रसादेनैवलभ्यंप्रसादलभ्यं॥सम्राजःसार्वभौमस्यरघोःचर

तंरेखाध्वजकुलिशातपत्रचिह्नंसम्राजश्चरणयुगंप्रसादलभ्यं॥प्रस्था
नप्रणतिभिरंगुलीषुचक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं॥ ८८॥ ॥

णयुगंप्रस्थानेप्रयाणसमयेयाःप्रणतयोनमस्काराःताभिःकरणैःअंगुलीषुमौलिषुकेश
बंधेषुयाःस्रजःमाल्यानिताभ्यश्च्युतैर्मकरंदैःपुष्परसैःरेणुभिःपरागैश्चगौरंगौरवर्णंच
क्रुः॥८८॥

इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथविरचितायांरघुवंशसमाख्या

इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौ
रघुदिग्विजयोनामचतुर्थःसर्गः॥ ४॥ ॥

यांसंजीविनीचतुर्थःसर्गःसमाप्तः॥ ४॥ ॥श्रीरामचंद्रायनमः॥

ग·भा·

२४

सं·गी·

राम

२४

॥श्रीगणेशाय नमः॥ ॥संजीवनं मैथिलकन्यकायाः सौंदर्यसर्वस्वमहानिधानं॥ शशांकपंकेरु
हयोः समानं रामस्य वंदे रमणीयमास्यं॥ १॥ ॥भर्तुरिति॥ ॥अथ दाशरथी रामलक्ष्मणौ उपघ्नत
राश्रयवृक्षस्य॥ उपघ्न आश्रय इति निपातः॥ तस्य छेदात् व्रतत्यौ लते इव॥ वल्ली तु व्रततीर्लतेत्य
मरः भर्तुः प्रणाशात् शोचनीयं दशांतरं प्रपन्ने मातृजनन्यौ कौशल्यासुमित्रे तत्र साकेतोपवने समं

भर्तुः प्रणाशादथ शोचनीयं दशांतरं तत्र समं प्रपन्ने॥ अपश्यतां दाशरथी जनन्यौ
छेदादिवोपघ्नतरोर्व्रतत्यौ॥१॥ उभावुभाभ्यां प्रणतौ हतारी यथाक्रमं विक्रमशो
भिनौ तौ॥ विस्पष्टमस्रांधतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलंभात्॥ २॥ ॥

युगपदपश्यतां॥ १॥ ॥उभाविति॥ ॥यथाक्रमं स्वस्वमातृपूर्वकं प्रणतौ नमस्कृतवंतौ ह
तारी हतशत्रुकौ विक्रमशोभिनौ तावुभौ रामलक्ष्मणौ उभाभ्यां मातृभ्यां अस्रैरश्रुभिरंध
तया हेतुना॥ अस्रमश्रु च शोणितमिति यादवः॥ विस्पष्टं न दृष्टौ किंतु सुतस्पर्शेन यत्सु
खं तस्योपलंभात् ज्ञातौ॥ २॥

आनंदज इति॥ ॥तयोर्मात्रोरानंदजः शिशिरो बाष्पः शोकजमशीतमुष्णमश्रु उष्णतप्तं ग्रीष्म
तप्तं गंगासरय्वोर्जलं कर्म अवतीर्णो हिमाद्रेर्निष्यंदो निर्झर इव बिभेद॥ आनंदेन शोकस्ति
रस्कृत इत्यर्थः॥ ३॥ ॥ते इति॥ ॥ते मातरौ पुत्रयोरंगे शरीरे नैरृतशस्त्राणां राक्षसशस्त्रा

आनंदजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद॥ गंगासरय्वोर्जलमुष्णतप्तं
हिमाद्रिनिःस्यंद इवावतीर्णः॥ ३॥ ते पुत्रयोर्नैरृतशस्त्रमार्गानार्द्रानिवांगे सदयं
स्पृशंत्यौ॥ अपीप्सितं क्षत्रकुलांगनानां न वीरसूशब्दमकामयेतां॥ ४॥ क्लेशावहा
भर्तुरलक्षणाहं सीतेति नाम स्वमुदीरयंती॥

णां राक्षसशस्त्राणां मार्गान् व्रणान्
आर्द्रानिव सदयं स्पृशंत्यौ क्षत्रकुलांगनानामीप्सितमिष्टमपि वीरसूर्वीरमा
तेति शब्दं नाकामयेतां॥ वीरप्रसवो दुःखहेतुरित्यर्थः॥ ४॥ ॥क्लेशावहेति॥ ॥आवह
तीत्यावहा भर्तुः क्लेशावहा क्लेशकारिणी॥ अत एव अलक्षणाहं सीतेति स्वं नाम उदी
रयंती॥॥

रघुवं.टी.सं. २

स्वर्गः प्रतिष्ठा आस्पदं तस्य स्वर्गस्थितस्य गुरोः श्वशुरस्य महिष्योः श्वश्र्वोः। वध्वः स्नुषा वधूः स्नु सर्ग.१४
षा वधूर्जायेत्यमरः॥ अनंतरंक्रिनेदेनववंदे॥ स्वर्गप्रतिष्ठस्य इत्यनेन श्वश्रूवैधव्यदुःखं सूचय
ति॥५॥ उत्तिष्ठेति॥ ॥ ननु वत्सोत्तिष्ठ असौ सानुजो मत्तस्तुचिनात वैव वृत्तेनेन महत्कृच्छ्रं दुःखं

स्वर्गप्रतिष्ठस्य गुरोर्महिष्यावनंतरक्रिनेदेन वधूर्ववंदे॥ ५॥ उत्तिष्ठ वत्से ननु सानुजो
सौ वृत्तेन भर्ता शुचिना तवैव॥ कृच्छ्रं महत्तीर्ण इति प्रियार्हां तामूचतुस्ते प्रियमप्य
मिथ्या॥ ६॥ अथाभिषेकं रघुवंशकेतोः प्रारब्धमानंदजलैर्जनन्योः॥ निवर्त्त
यामासुरमात्यवृद्धास्तीर्थाहृतैः कांचनकुंभतोयैः॥७॥ तीर्थ्यैः तीर्थ्यकानां इति प्रि
यार्हां तां वधूं प्रियमप्यमिथ्या सत्यं तथा ते श्वश्र्वौ ऊचतुः॥ उत्तरमर्यवचनमिति भावः॥६॥
अथेति॥ ॥ अथ जनन्यो रानंदजलैरानंदबाष्पैः प्रारब्धं उपक्रांतं रघुवंशकेराम स्याभिषेकं राम २
आमात्यवृद्धास्तीर्थेभ्यो गंगाप्रभृतिभ्य आहृतैरानीतैः कांचनकुंभतोयैर्निर्वर्त्तयामासुः नि
ष्पादयामासुः॥७॥

सरिदिति॥ ॥ रक्षः कपींद्रैः सरितो गंगाद्याः समुद्रान् पूर्वादीन् सरसीः मानसादीश्च गत्वा उप
पादितानि उपनीतानि जलानि जिष्णोर्जयनशीलस्य॥ ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः॥ तस्य
रामस्य विंध्यस्य विंध्याद्रेः मूर्ध्नि मेघप्रभवा आप इव आपतन्॥८॥ ॥ तपेति॥ ॥ ॥ यो रामस्तपस्वि

सरित्समुद्रान् सरसीश्च गत्वा रक्षः कपींद्रैरुपपादितानि॥ तस्यापतन्मूर्ध्नि ज
लानि जिष्णोर्विंध्यस्य मेघप्रभवा इवापः॥ ८॥ तपस्विवेषक्रियया पि तावद्यः
प्रेक्षणीयः सुतरां बभूव॥ नरेंद्रनेपथ्यविधानरम्यो जातस्योदितासासुनरु
क्तदोषा॥ ९॥ स मौलरक्षोहरिभिः ससैन्यस्तूर्यस्वनानंदितपौरवर्गः॥ ॥ ॥

वेषक्रियया पि तपस्विवेषरचनयापि सुतरां प्रेक्षणीयस्तावद्दर्शनीयो बभूव॥ तस्य राजेंद्र
नेपथ्यविधानेन राजवेषरचनया उदिता शोभा सा पुनरुक्तनामदोषो यस्याः सा पुनरु
क्तदोषा आसीत्॥ द्विगुणा आसीत्॥ ९॥ स इति॥ ॥ स रामः ससैन्यः तूर्यस्वनैरानंदित
पौरवर्गः सन् मूले भवाः मौलाः मे॥

विरुद्धाः तैरक्षौभिः हरिभिश्च सह सौधैरुपशोभितां जनपदमुत्तोरणामन्वयराजधानीं विवेश प्रविष्टवान् ॥१०॥ सौमित्रिणेति॥ ॥ सावरजेन शत्रुघ्नयुक्तेन सौमित्रिणा मंदमाधूतेवालव्यजने चामरे यस्य स रथस्थः भरतेन धृतातपत्रः ॥ एवं चतुर्व्यूहो रामः प्रवृद्धः साक्षा

विवेश सौधोद्भासितजनपदमुत्तोरणामन्वयराजधानीं ॥१०॥ सौमित्रिणा सावरजेन मंदमाधूतबालव्यजनो रथस्थः ॥ धृतातपत्रो भरतेन साक्षादुपायसंघात इव प्रवृद्धः ॥११॥ ॥युग्मं॥ ॥श्वश्रूजनानुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीं ॥ प्रासादवातायनदृश्यबंधैः साकेतनार्योंजलिभिः प्रणेमुः ॥१२॥ ॥

उपायानां संघातः समष्टिरिवेति पूर्वेण संबंधः ॥११॥ श्वश्रूजनेति ॥ ॥श्वश्रूजनेति॥ ॥श्वश्रूजनेनानुष्ठितचारुवेषां कृतसौम्यनेपथ्यां ॥ आकल्पवेषौ नेपथ्यमित्यमरः ॥ कर्णीरथः स्त्रीयोग्योऽल्परथः ॥ कर्णीरथः प्रवहणं डयनं रथगर्भक इति यादवः ॥ तत्रस्थां रघुवीरपत्नीं सीतां साकेतनार्यः ॥ प्रासादवातायनेषु दृश्यबंधैर्लक्षितपुटैरंजलिभिः प्रणेमुः ॥१२॥ ॥

स्फुरदिति ॥ ॥ स्फुरत्प्रभामंडलमानसूयं अनसूयं अनसूयया यद्दत्तं शाश्वतं तेन अंगरागं बिभ्रती सा सीता मध्ये स्वपुर्यै शुद्धेति संदर्शिता पुनर्वह्निगतेव रराज ॥१३॥ ॥ वेश्मानीति ॥ ॥ सुहृदः भावः सौहार्दं सौजन्यं ॥ हृद्भगसिंध्वंते पूर्वपदस्येत्युभयपदवृद्धिः ॥ सौहार्दनिधिः रामः सुग्रीवादिभ्यः परिबर्हवंति उपकरणवंति वेश्मानि विश्राण्य दत्वा आलेख्यशेषस्य पि

स्फुरत्प्रभामंडलमानसूयं सा बिभ्रती शाश्वतमंगरागं ॥ रराज शुद्धेति पुनः स्वपुर्यै संदर्शिता वह्निगतेव भर्त्रा ॥१३॥ वेश्मानि रामः परिबर्हवंति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः ॥ बाष्पायमानो बलिमन्निकेतमालेख्यशेषस्य पितुर्विवेश ॥१४॥ प्रासादकालागरुधूमराजिस्तस्याः पुरो वायुवशेन भिन्ना ॥

तुरालेख्यशेषस्य पितुः बलिमत् पूजायुक्तं निकेतनं गृहं बाष्पायमाणो बाष्पमुद्वमन् विवेश ॥ बाष्पोष्मभ्यामुद्वमन इति क्यङ्प्रत्ययः ॥१४॥ ॥ प्रसादेति ॥ ॥ वायुवशेन भिन्ना प्रासादेयः कालागुरुधूमस्तस्य राजिरेखा ॥ ॥

रघुवं० टी० सं ४

वनान्निवृत्तेन रघूद्वहेन रामेण स्वयं मुक्ता तस्याः पुरः पुर्याः वेणिरिवाबभासे॥ पुरोपि पतिव्रतासमा सर्ग १४
धिरूढः॥ न प्रोषिते तु संस्कुर्यान्न वेणीं च प्रमोचयेदिति हारीतः॥१५॥ ॥कृतांजलिरिति॥ गतत्रनिके
तने कृतांजलिः स नूरामः॥ हे अंब नो गुरुः पिता स्वर्गः फलं यस्य तस्मात् सत्यात् न भ्रश्यत न भ्रष्ट
न्न इति यदभ्रंशनं चिंत्यमानं विचार्यमाणं तव सुकृतं इत्येवं प्रकारेण भरतस्य मातुः कैकेय्याः

वनान्निवृत्तेन रघूद्वहेन मुक्ता स्वयं वेणिरिवाबभासे॥१५॥ कृतांजलिस्तत्र यदंब सत्यान्ना
भ्रश्यत स्वर्गफलाद्गुरुर्नः॥ तच्चिंत्यमानं सुकृतं तवेति जहार लज्जां भरतस्य मातुः॥१६॥
तथैव सुग्रीवविभीषणादीनुपाचरत्कृत्रिमसंविधाभिः॥ संकल्पमात्रोदितसिद्धय
स्ते क्रांता यथा चेतसि विस्मयेन॥१७॥ लज्जां जहार अपोनयत्॥ राज्ञां प्रतिज्ञापरिपालनं स्व
र्गसाधनमित्यर्थः॥ भरतग्रहणं तदपेक्षया पि कैकेय्यनुसरणं इति द्योतनार्थं॥१६॥ ॥तथेति॥ त राम
था सुग्रीवविभीषणादीन् संविधीयंत इति संविधाः भोग्यवस्तूनि कृत्रिमसंविधाभिस्तथा तेन प्र ४
कारेण उपाचरत्॥ यथा संकल्पमात्रेण इच्छामात्रेणोदितसिद्धयस्ते सुग्रीवादयश्चेतसि विस्मयेन
क्रांता आक्रांताः॥१७॥ ॥

समाजनायेति॥ ॥सः रामः समाजनाय अभिवादनाय उपगतान् दिव्यान् दिविभवान् मुनीन्
अगस्त्यादीन् पुरस्कृत्य पूजयित्वा हतस्य शत्रो रावणस्य प्रभवादि जन्मादिकं स्वविक्रमे गौ
रवमुत्कर्षमादधानं वृत्तं तेभ्यः मुनिभ्यः शुश्राव श्रुतवान्॥ विजितोत्कर्षाज्जेतुरुत्कर्ष इ
त्यर्थः॥१८॥ प्रतीति॥ ॥तपोधनेषु मुनिषु प्रतिनिवृत्त्य गतेषु सत्सु सुखादविज्ञात एव गतो

समाजनायोपगतान् स दिव्यान्मुनीन्पुरस्कृत्य हतस्य शत्रोः॥ शुश्राव तेभ्यः प्रभवा
दि वृत्तं स्वविक्रमे गौरवमादधानः॥१८॥ प्रतिप्रयातेषु तपोधनेषु सुखादविज्ञात
गतार्धमासान्॥ सीतास्वहस्तोपहृताग्र्यपूजान् रक्षःकपींद्रान्विससर्ज रामः॥
१९॥ तच्चात्मचिंतासुलभं विमानं हृतं सुरारेः सहजीवितेन॥ धर्मासोपेषां तानंतरं सी

तायाः स्वहस्तेन॥ प्रकृता दत्ता अग्र्यपूजा उत्तमसंभावना येभ्यस्तान्॥ एतेन सौहार्दमिति
ज्ञायते कः॥ रक्षः कपींद्रान् रामो विससर्ज विसृष्टवान्॥१९॥ ॥तच्चेति॥ ॥आत्मचिंतासुल
भं स्वेच्छामात्रलभ्यं सुरारेः रावणस्य जीवितेन सह हृतं दिवः पुष्पं पुष्पकं वदान्नरणांतं पुष्प

कं नृपः पुनरपि कैलासनाथस्य कुबेरस्योद्वहनाय अन्वमंस्त अनुज्ञातवान्॥ मन्यते र्लुङ्।
नृपो ग्रहणेन पूर्वमप्येतत्कौबेरमेवेति सूच्यते॥ २०॥ ॥पितुरिति॥ ॥रामः एवं पितुर्नियोगा
त् वनात् सनाद्वनवासं निस्तीर्य अनंतरं प्रतिपन्नराज्यः सन् धर्मार्थकामेषु यथा तथैवावरजे
कैलासनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमंस्त॥ २०॥ पितुर्नियोगाद्वनवा
समेवं निस्तीर्य रामः प्रतिपन्नराज्यः॥ धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजे
षु वृत्तिं॥ २१॥ सर्वासु मातृष्वपि वत्सलत्वात्स निर्विशेषप्रतिपत्तिरासीत्॥ षडाननापी
पीतपयोधरासु नेता चमूनामिव कृत्तिकासु॥ २२॥ षु नुजेषु समां वृत्तिं प्रपेदे॥ २१॥
सर्वास्विति॥ ॥स रामो वत्सलत्वात्स्निग्धत्वान्नतु लोकप्रतीत्यर्थं॥ स्निग्धस्तु वत्सल इ
त्यमरः॥ सर्वासु मातृषु अपि निर्विशेषप्रतिपत्तिः तुल्यसत्कारः आसीत्॥ कथमिव॥ च
मूनां नेता षण्मुखः षड्भिराननैरापीताः पयोधराः स्तना यासां तासु कृत्तिकास्विव॥ २२॥

तेनेति॥ ॥लोकः लोभपराङ्मुखेन वदान्येन तेन रामेण कृत्स्नं अर्थवान् धनिकः आसन् बभूव॥
तिऽतप्रतिरूपकमव्ययमेतत्॥ विघ्नस्योन्मथं घ्नता नुदता तेन क्रियावान् नुष्ठानवान् विने
त्रा नियामकेन तेन पितृमान् पितृवन्नियच्छतीत्यर्थः॥ शोकमपनुदतीति शोकापनुदः तेन
मुखस्याहर्नानुदशोकयोः परिमृजापनुदोरिति कप्रत्ययः॥ तेन पुत्री पुत्रवानास॥ पुत्र
तेनार्थवान् लोभपराङ्मुखेन तेन घ्नता विघ्नमयं क्रियावान्॥ तेनास लोकः पि
तृमान्विनेत्रा तेनैव शोकापनुदेन पुत्री॥ २३॥ स पौरकार्याणि समक्ष्य काले रेमे वि
देहाधिपतेर्दुहित्रा॥ उपस्थितश्चारुवपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्याः
वदानेदयतीत्यर्थः॥ २३॥ स इति॥ ॥स रामः काले ऽवसरे पौराणां कार्याणि ॥२४॥
प्रयोजनानि समीक्ष्य विदेहाधिपतेर्दुहित्रा सीतया उपभोगोत्सुकया अत एव तदीयं
सीतासंबंधि चारुवपुः कृत्वा स्थितया लक्ष्म्येव उपस्थितः संगतः सन् रेमे॥ उपसंस्था
ने संगतिरिति यादवः॥ २४॥

रघुवं.टी.सं.
६

तयोरिति॥ ॥चित्रवत्सु वनवासवृत्तांतलेख्यवत्सु सद्मसु यथाप्रार्थितं यथेष्टं इंद्रियार्था सर्ग १४
नृ इंद्रियविषयान् शब्दादीन् आसेदुषोः प्राप्तवतोस्तयोः सीतारामयोः दंडकेषु दंडका
रण्येषु प्राप्तानि दुःखान्यपि विरहविलापान्वेषणादीनि संचिंत्यमानानि स्मर्यमा
णानि सुखान्यभूवन्॥ स्मारकं तु चित्रदर्शनमिति द्रष्टव्यं॥२५॥ ॥अथेति॥ ॥अथसी

तयोर्यथाप्रार्थितमिंद्रियार्थानासेदुषोः सद्मसु चित्रवत्सु॥ प्राप्तानि दुःखान्य
पि दंडकेषु संचिंत्यमानानि सुखानीव भूवुः॥२५॥ अथाधिकस्निग्धविलोचनेन मु
खेन सीता शरपांडुरेण॥ आनंदयित्री परिणेतुरासीदनक्षरव्यंजितदोहदेन॥२६॥

ता अधिकस्निग्धविलोचनेन॥ स्मेतमसृणविलोचनेन शरवत् तृणविशेषवत् पांडुरे
ण॥ तत एवानक्षरं अवाग्व्यापारं यथा तथा व्यंजितं दोहदं गर्भो येन तेन मुखेन राम.
परिणेतुः पत्युरानंदयित्री आसीत्॥२६॥ ६

नामिति॥ प्रतीतः गर्भज्ञानात् प्रीतः रमयतीति रमणः प्रियः कृशांगयष्टिं वर्णांतरेण नीलिम्ना आ
क्रांतपयोधराग्रां विलज्जमानां तां रामां रहस्यंकमारोप्याभिलाषं मनोरथं पप्रच्छ॥ एतच्च दोह
दस्याप्रदानेन गर्भदोषमवाप्नुयादिति शास्त्रात् न तु लौल्यादित्यनुसंधेयं॥२७॥ ॥सेति॥ ॥सा
सीता हिंस्रैर्दृष्टानि नीवारा एव बलयो येषु तानि तिर्यक्भिक्षुकादिदानं बलिः कृतसंबंधाः कृतस

तामंकमारोप्य कृशांगयष्टिं वर्णांतराक्रांतपयोधराग्रां॥ विलज्जमानां रहसि प्रतीतः
पप्रच्छ रामां रमणोभिलाषं॥२७॥ सा दृष्टनीवारफलानि हिंस्रैः संबद्धवैखानसकन्य
कानि॥ इयेष भूयः कुशवंति गंतुं भागीरथीतीरतपोवनानि॥२८॥ तस्यै प्रतिश्रुत्य र
घुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः॥

ख्याः वैखानसानां कन्यका येषु तानि कुशवं
ति भागीरथीतीरतपोवनानि भूः पुनरपि गंतुं इयेष अभिललाष॥२८॥ ॥तस्या इति॥
रघुप्रवीरो रामस्तस्यै सीतायै तत्पूर्वोक्तं मनोरथं ईप्सितं प्रतिश्रुत्य पार्श्वचरैः तत्कालो
चितैरनुयातः॥

सन्नमुदितामयोध्यामालोकयन्नभ्रंलिहमभ्रंलिहमभ्रंकषंप्रासादमारुरोह॥ वहाभ्रेलिहि
इतिखश्प्रत्ययः॥ अरुर्द्विषेत्यादिनामुमागमः॥२९॥ ॥कृधाकणमिति॥॥ सरामः कृधाःस
मृधाः आपणाः पण्याःसयोयस्मिन्नतंराजपथंपौनैर्नौभिः समृद्धवाहिनोत्रिर्विगात्यमानोसर
यूंचपौरेरैर्विलासिभिरध्युषितानिपुरोपकंठोपवनानिपश्यन्नरेमेविलासिन्यश्चविलासि

आलोकयिष्यन्मुदितामयोध्यांप्रासादमभ्रंलिहमारुरोह॥२९॥ कृधापणंराजपथं
सपश्यन्विगाह्यमानांसरयूंचनौभिः॥ विलासिभिश्चाध्युषितानिपौरैः पुरोप
कंठोपवनानिरेमे॥३०॥ सकिंवदंतीवदतांपुरोगः स्ववृत्तमुद्दिश्यविशुद्धवृत्तः॥
सपार्थिवराजोरुभुजोपसर्पंपप्रच्छभद्रंविजितारिभद्रः॥३१॥ ॥नृश्चविलासिभिः॥पु

मान्स्त्रियेत्येकशेषः॥३०॥ ॥सइति॥॥ वदतांवाग्मिनांपुरोगः श्रेष्ठः विशुद्धवृत्तः सपार्थि
राजः शेषस्तद्वद्रुरुभुजोयस्यसः॥ विजितारिभद्रः विजितारिश्रेष्ठः॥ सरामः स्ववृत्तमुद्दिश्यभद्र
मद्रनामकंअपसर्पंचारंकिंवदंतीजनवादंपप्रच्छ॥ अपसर्पश्चरः स्पृशइत्यमरः किंवदंतीजन

पुतिस्त्रियसमरः॥३१॥

राम· ७

निर्बंधेति॥॥ निर्बंधेनपृष्टः सोपसर्पः जगादकिमिति॥ हेमानवदेवरक्षोभवनेउषितायाःस्थि
तायाः देव्याः सीतायाः परिग्रहात्स्वीकारादन्यत्रइतरांगेतेवर्जयित्वेत्यर्थः॥ त्वदीयं
सर्वंचरितंपौराः स्तुवंति॥ ॥एवंकलत्रनिंदागुरुणाउर्वहेणकीर्तिविपर्ययेणापकीर्ति

निर्बंधपृष्टः सजगादसर्वंस्तुवंतिपौराश्चरितंत्वदीयं॥ अन्यत्ररक्षोभवनोषितायाः
परिग्रहान्मानवदेवदेव्याः॥३२॥ कलत्रनिंदागुरुणाकिलैवमभ्याहतंकीर्तिवि
पर्ययेण॥ अयोघनेनायइवाभितप्तंवैदेहिबंधोर्हृदयंविददे॥३३॥ किमात्मनिर्वा
दकथामुपेक्षेजायामदोषामुतसंत्यजामि॥ यो॰ऽभ्याहतंवैदेहिबंधोवैदेहिवल्लभ

स्यबंधुर्नरिवांधवेइतिविश्वः अयोघः संज्ञाछंदसोर्बकुलमितिकृत्स्वः॥ काव्यिदा
सइतिवत्॥ हृदयंअयोघनेनाभिहतंअभितप्तंअयइवविददे विदीर्णंकर्तरिलिट्॥
३३॥ ॥किमिति॥ आत्मनोनिर्वादएवकथातामुपेक्षेउतअदोषामपिजायांसंत्यजा
मिउभयत्रापिप्रश्नेलोट्॥॥

इत्येकपक्षाश्रये न्यतरपक्षपरिग्रहे विक्लवत्वात्स रामो दोलाचलचित्तवृत्तिर्यस्य स आसीत्॥ स
निश्चित्येति॥॥ किंच वाच्यमपवादं त्यागेन त्यागातिरिक्तो पायेन निवृत्तिर्यस्य नास्ति तदनन्य
निवृत्ति निश्चित्य पत्न्याः त्यागेन परिमार्ष्टुं परिहर्तुं ऐच्छत्॥ तथाहि यशोधनानां पुंसां स्वदे
हादपि यशः गरीयः गुरुतरं इंद्रियार्थात् स्रक्चंदनवनितादेरिंद्रियविषयात् गरीय इति किं

इत्येकपक्षाश्रयविक्लवत्वादासीत्स दोलाचलचित्तवृत्तिः॥ ३४॥ निश्चित्य चानन्यनि
वृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत्॥ अपि स्वदेहात्किमुतेंद्रियार्थाद्यशोध
नानां हि यशो गरीयः॥ ३५॥ स संनिपात्यावरजान्हतौजास्तद्विक्रियादर्शनलुप्त
हर्षान्॥ कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यं॥ ३६॥ ॥

मुवक्ष्ये॥ पंचमी सीता च इंद्रियार्थ एव॥ ५॥ स इति॥॥ हतौजाः निस्तेजस्कः स रामः तस्य रामस्य वि
क्रियादर्शनलुप्तहर्षान्॥ अवरजान् संनिपात्य समागमय्य आत्माश्रयं स्वविषयकं कौलीनं नि
दांतेभ्य आचचक्षे पुनरिदं वाक्यं उवाच च॥ ३६॥

राजर्षीति॥॥ रविः प्रसूतिर्जन्म यस्य राजर्षिवंशस्य सदाचारशुचेः सद्वृत्तात् शुद्धस्यान्तो
मत्सकाशात् दर्पणस्य पयोदवातादिवांजनः कणादित्यर्थः॥ कीदृशोयं कलंकः उपस्थि
तः प्राप्तः पश्यत॥ ३७॥ ॥पौरेष्विति॥॥ मोहं अपांतरंगेषु तैलविंदुमिव पौरेषु बहुलीभवं

राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोयं॥ मत्तः सदाचारशुचेः क
लंकः पयोदवातादिव दर्पणस्य॥ ३७॥ पौरेषु सोहं बहुलीभवंतमपां तरंगेष्वि
व तैलबिंदुं॥ सोढुं न तत्पूर्वमवर्णमीशे आलानिकं स्थाणुमिव द्विपेंद्रः॥ ३८॥

तं प्रसरंतं तदेव पूर्वं यस्य तत् तत्पूर्वमवर्णमपवादं॥ अवर्णाक्षेपनिर्वादपरिवादापवाद
वदित्यमरः॥ द्विपेंद्र आलानमेव आलानिकं॥ विनयादित्वात् स्वार्थे ठक्॥ अथवा आ
लानं बंधनप्रयोजनमस्येत्यालानिकं॥ प्रयोजनमिति ठक्॥ स्थाणुस्तंभमिव चूतवृ
क्षे इतिवत् समासव्यपि शेषणवाद पौनरुक्त्यं द्रष्टव्यं॥ सोढुं न ईशे न शक्नोमि॥ ३८॥

तस्येति॥ तस्यावर्णस्यापनोदाय फलप्रवृत्तौ अपत्योत्पत्तौ उपस्थितायां सत्यामपि निर्व्यपेक्षो
निःस्पृहः सन् वैदेहसुतां पुरस्तात्पूर्वं पितुराज्ञया समुद्रनेमिरिव नेमिर्यस्याः सा तां भूमिः
तामिव त्यक्ष्यामि॥३९॥ ननु सर्वथा साध्वीं कथं त्यजसीत्याह॥ अवैमीति॥ एनां सीतां

तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः॥ त्यक्ष्यामि वैदेहसु
तां पुरस्तात्समुद्रनेमिं पितुराज्ञयेव॥३९॥ अवैमि चैनामनघेति किं तु लोका
पवादो बलवान्मतो मे॥ छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्र
जाभिः॥४०॥

अनघां साध्वीति चावैमि॥ किंतु मे मम लोकापवादः बलवान्मतः॥ कु
तः हि यस्मात्प्रजाभिः भूमेः छाया प्रतिबिंबं शुद्धिमतो निर्मलस्य शशिनो मलत्वेन क
लंकत्वेनारोपिता अतो लोकापवाद एव बलवानित्यर्थः॥४०॥

तर्हि त्यागे तत्तदानयनक्लेशोऽनर्थक इत्याह॥ रक्ष इति॥ किं मे रक्षोवधांतः सः प्रयासो व्य
र्थो न किंतु वैरप्रतिमोचनाय वैरशोधनाय॥ निर्यातनं वैरशुद्धौ इत्यमरः॥ तथाहि॥ अमर्षणोऽ
सहनो द्विजिह्वः सर्पः पदा पादेन स्पृशंतं पुरुषं शोणितकांक्षया दशति किंतु वैरनिर्यातनाय॥

रक्षोवधांतो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय॥ अमर्षणः शोणितकांक्ष
या किं पदा स्पृशंतं दशति द्विजिह्वः॥४१॥ तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः
प्रतिषेधनीयः॥ यद्यर्थिता निर्हृतवाच्यशल्यान्प्राणान्मया धारयितुं चिरं वः॥४२॥

येत्यर्थः॥४१॥ तदिति॥ तत्तस्मादेष मे सर्गः निश्चयः॥ सर्गः स्वभावनिर्मोक्षनिश्चया
ध्यायसृष्टिषु इत्यमरः॥ करुणार्द्रचित्तैः भवद्भिर्न प्रतिषेधनीयः॥ निर्हृतं वाच्यमेव श
ल्यं येषां तान् प्राणान्मया चिरं धारयितुं धारणं कारयितुं वो युष्माकं अर्थिता ऽर्थित्वं
इच्छा यद्यस्तीति शेषः॥४२॥

इतीति ॥ ॥ इत्युक्तवंतं जनकात्मजायां विषये नितांतरूक्षाभिनिवेशमतिक्रूराग्रहमीशं स्वामिनं तेषु भ्रातृषु मध्ये कश्चनापि निषेधुं निवारयितुं अनुवर्त्तयितुं वा शक्तो नासीत् पक्षद्वयस्यापि प्रबलत्वादित्यर्थः ॥ ४३ ॥ ॥ स इति ॥ ॥ लोकत्रयगीतकीर्त्तिः यथार्थभाषी लक्ष्मणपूर्वजन्मा ल

इत्युक्तवंतं जनकात्मजायां नितांतरूक्षाभिनिवेशमीशं ॥ न कश्चन भ्रातृषु तेषु शक्तो निषेधुमासीदनुमोदितुं वा ॥ ४३ ॥ स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्त्तिः ॥ सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ॥ ४४ ॥ ॥

क्ष्मणपूर्वजन्मा लक्ष्मणाग्रजः स रामः निदेशे स्थितं आज्ञाकारिणं लक्ष्मणं विलोक्य हे सौम्य सुभगेत्याभाष्य पृथक्कृत्य । तद्भ्रातृभ्यां विनाकृत्य आदिदेश आज्ञापयामास ॥ ४४ ॥ ॥

प्रजावतीति ॥ ॥ दोहदो गर्भिणीमनोरथः तच्छंसिनी ते प्रजावती भ्रातृजाया ॥ प्रजावती भ्रातृजाया इत्यमरः ॥ तपोवनेषु स्पृहयालुरेव सस्पृहेव ॥ स्पृहिगृहीत्यादिना ऽऽलुच् प्रत्ययः ॥ स त्वं रथी सन् तद्व्यपदेशेन दोहदमिषेण वनं नेयां नेतव्यां एतां सीतां वाल्मीकेः पदं स्थानं प्राप्य गमयित्वा विजाषाथा इत्यया देशः ॥ त्यज ॥ ४५ ॥ स इति ॥ ॥ पितुर्नियोगात्तनूजसुनात भार्गवेण जामद
प्रजावतीं दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव ॥ स त्वं रथी तद्व्यपदेशनेयां प्राप्य वाल्मीकिपदं त्यजैनां ॥ ४५ ॥ स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत् ॥ प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ॥ ४६ ॥ ॥ ॥

ग्न्येन कर्त्रा न लोकेत्यादिना षष्ठीप्रतिषेधः ॥ मातरि द्विषत्यां वत् द्विषद्वत् तत्र तस्येति वतिप्रत्ययः ॥ प्रहृतं प्रहारं शुश्रुवान् श्रुतवान् ॥ भाषायां सदवसश्रुव इति क्वसुप्रत्ययः ॥ स लक्ष्मणस्तदग्रजशासनं प्रत्यग्रहीत् हि यस्मात् गुरूणां आज्ञा अविचारणीया ॥ ४६ ॥ ॥ ॥

अथेति॥ ॥असौ लक्ष्मणः अनुकूलश्रवणेन प्रतीतां हृष्टां कर्णन्नितुतुष्टां वैदेहसुतां अत्रस्नुभिरभीरुभिर्नि
र्जिणीवहनयोग्यैः॥ त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नु प्रत्ययः तुरंगैर्युक्तं धुरं सुमंत्रेण प्रति
पन्नरश्मिं गृहीतप्रग्रहं रथमारोप्य प्रतस्थे॥४७॥ ॥सेति॥ ॥सा सीता रुचिरान् प्रदेशान् नी
यमाना प्राप्यमाणा सती मेमम प्रियः प्रियंकरोतीति प्रियंकरः॥ प्रियकारीत्यनंदत्॥ मे

अथानुकूलश्रवणप्रतीतामत्रस्नुभिर्युक्तधुरं तुरंगैः॥ रथं सुमंत्रप्रतिपन्नरश्मिमा
रोप्य वैदेहसुतां प्रतस्थे॥४७॥ सा नीयमाना रुचिरान्प्रदेशान्प्रियंकरो मे प्रिय इ
त्यनंदत्॥ नाबुधकल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षं॥४८॥ ॥

मप्रियेति खच् प्रत्ययः॥ तं प्रियमात्मनि विषये कल्पद्रुमतां विहाय असिपत्रवृक्षं जातं ना
बुधनाज्ञासीत्॥ बुध्यतेर्लुङ्॥ असिपत्रः खड्गाकारदलः कोऽपि वृक्षविशेषः॥ अ
सिपत्रोऽनवे कोशाकारे च नरकांतर इति विश्वः॥ आसन्नघातुक इति भावः॥४८॥ राम॰ ११

जुगूहेति॥ ॥पथि लक्ष्मणः यद्दुःखं तस्याः सीतायाः जुगूह प्रतिसंहृतवान् तद्गुरु भाविन भविष्यद्दुःखं अ
त्यंतलुप्तं प्रियदर्शनं यस्य तेन स्फुरता सव्येतरेण दक्षिणेन अक्ष्णा अस्यै सीतायै॥ आख्यातं स्त्रीणां
दक्षिणाक्षिस्फुरणं दुर्निमित्तमाहुः॥४९॥ ॥सेति॥ ॥सा सीता दुर्निमित्तेन दक्षिणाक्षिस्फुरणरू
पेणोपगतात् प्राप्तात् विषादात् दुःखात् सद्यः परिम्लानमुखारविंदा सती सावरजस्य सानुजस्य रा मि

जुगोप तस्याः पथि लक्ष्मणो यत् सव्येतरेण स्फुरता तदक्ष्णा॥ आख्यातमस्यै गुरुभा
वि दुःखमत्यंतलुप्तप्रियदर्शनेन॥४९॥ सा दुर्निमित्तोपगमाद्विषादात् सद्यः परिम्ला
नमुखारविंदा॥ राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः॥५०॥
गुरोर्नियोगाद्वनितां वनांते साध्वीं सुमित्रातनयो विहास्यन्॥ ज्ञो रामस्य शिवं भूयादि

ति अबाह्यैः करणैः आशशंसे॥ शंसतेरपेक्षायामात्मनेपदमिष्यते॥ करणैरिति बहु
वचनं क्रियावृत्त्यभिप्रायं पुनः पुनराशशंसेत्यर्थः॥५०॥ ॥गुरोरिति॥ ॥गुरोर्ज्येष्ठस्य
नियोगात् साध्वीं वनितां मत्वा ज्यामित्यर्थः॥ वनांते विहास्यन् त्यक्ष्यन् सुमित्रातनयो लक्ष्मणः॥

पुरस्तादग्रेस्थितयाजह्नोर्दुहित्राआज्ञाकृत्याउच्छ्रितैर्वीचिहस्तैरवार्यतइवअकार्यमाकुर्वि
त्स्ववार्यतइवेत्युत्प्रेक्षा॥५१॥ ॥रथादिति॥ ॥सत्यसंधःसत्यप्रतिज्ञःसलक्ष्मणोयंत्रासारथि
नानिगृहीतवाहात्रथात्तांजातांजायांपुलिनेऽवतार्यआरोप्यनिषादेनकिरातेनाहृ
तनौविशेषः॥आनीतदृढनौविशेषःसन्गंगांसागरयोसंधांप्रतिज्ञामिवततार॥संध

निवार्यतेवोच्छ्रितवीचिहस्तैर्जह्नोर्दुहित्रास्थितयापुरस्तात्॥५१॥ रथात्सयंत्रप्र
तिपन्नवाहात्तांआत्तजायांपुलिनेवतार्य॥ गंगांनिषादाहृतनौविशेषस्ततारसं
धामिवसत्यसंधः॥५२॥ अथव्यवस्थापितवाक्कथंचित्सौमित्रिरंतर्गतबाष्पकंठः।
औत्पातिकंमेघइवाश्मवर्षंमहीपतेःशासनमुज्जगार॥५३॥ ॥ प्रतिज्ञामर्यादे इत्यमरः

५२॥ ॥अथेति॥ ॥अथेति॥ ॥अथकथंचित्कष्टेनव्यवस्थापिताप्रकृतिमापादितावाक्यस्य सः।
अंतर्गतबाष्पःकंठोयस्यसःकंठरुद्धपिताश्रुरित्यर्थःसौमित्रिर्महीपतेःशासनंउत्पातेभ
वंऔत्पातिकंमेघोअश्मवर्षंपंक्तिजांवर्षमिवोज्जगारउज्जगारवान्दारुणत्वेनावाच्यमु

ततइति॥ ॥ततोऽभिषंगःपराभवः॥दुष्टापेत्यभिषंगःपराभवइत्यमरः॥ सएवानिलस्तेन
विप्रविद्धाऽभिहताप्रभ्रश्यमानानिपतंतिआभरणान्येवप्रसूनानियस्याःसासीताल
तेवसहसास्वमूर्तिलाभस्यस्वशरीरलाभस्यप्रकृतिर्योनिर्योऽसौतैःकारणंधरित्रीजग
मसमीपपातेत्यर्थः॥स्त्रीणामापदिमातापवशरणमितिभावः॥५४॥ ॥इक्ष्वाकि

ततोऽभिषंगानिलविप्रविद्धाप्रभ्रश्यमानाभरणप्रसूना॥ स्वमूर्तिलाभप्रकृतिं
धरित्रींलतेवसीतासहसाजगाम॥५४॥ इक्ष्वाकुवंशप्रभवःकथंत्वांत्यजेद
कस्मात्पतिरार्यवृत्तः॥ इतिक्षितिःसंशयितेवतस्यैददौप्रवेशंजननीनतावत्॥ ॥५५॥

ति॥ ॥इक्ष्वाकुवंशप्रभवोमहाकुलप्रसूतइत्यर्थः॥आर्यवृत्तःसाधुचरितः
पतिर्भर्तात्वामकस्मादकारणात्कथंत्यजेत्॥असंभावितमित्यर्थः॥ इतिसंश
यितेवसंदिहानेवतावत्स्वागहेतुज्ञानावधेःप्रागित्यर्थः॥जननीक्षितिस्तस्यैसी
तायैप्रवेशमात्मनीतिशेषःनददौ॥५५॥ ॥

सेति॥ ॥ लुप्तसंज्ञा नष्टचेतना मूर्छिता सा दुःखं न विवेद॥ प्रत्यागतासुर्लब्धसंज्ञा सती अंतःसम
तप्यत दुःखेन दह्यते स्मेत्यर्थः॥ तपेः कर्मणि लङ्। कर्मकर्तरीति केचित् तत्र तपस्तपः कर्मकस्यैव
यङ् इति नियमात्॥ तस्याः सीतायाः सुमित्रात्मजयत्नलब्धः प्रबोधो मोहात् कष्टतरो दुःखदो
ऽभवत्॥ दुःखवेदनासंभवादिति भावः॥ ५६॥ ॥ न चेति॥ ॥ आर्या साध्वी सा सीता वृजिनादृते

सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतांतः॥ तस्याः सुमित्रात्मजयत्नलब्धो
मोहादभूत्कष्टतरः प्रबोधः॥ ५६॥ न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृ
तेऽपि॥ आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिंद॥ ५७॥ ॥

एन सा विनापि॥ कलुषं वृजिनैनोऽघमित्यमरः॥ अन्यारादितरर्तेरिति पंचमी॥ निराकरि
ष्णोः निरासकस्य॥ अलंकृञिति इष्णुच् प्रत्ययः॥ भर्तुरवर्णमपवादं न चावदत् नैवावादी
त्॥ किंतु स्थिरदुःखभाजं अतएव दुष्कृतिनं आत्मानं पुनः पुनर्निनिंद॥ ५७॥ ॥

श्वास्येति॥ ॥ रामावरजो लक्ष्मणः सतीं साध्वीं सीतामाश्वास्य आख्यात उपदिष्टो वाल्मीकेः नि
केतस्याश्रमस्य मार्गो येन स तथोक्तः सन् निघ्नस्य पराधीनस्य॥ अधीनो निघ्न आपन्न इत्य
मरः॥ मे भर्तुर्निदेशो नस्वाम्यनुज्ञया हेतुना यद्रौक्ष्यं पारुष्यं तत् हे देवि क्षमस्वेति नम्रः प्रणतो
बभूव॥ ५८॥ सीतेति॥ ॥ सीता तं लक्ष्मणं उत्थाप्य वाक्यं जगाद किमिति हे सौम्य साधो ते प्रीता

आश्वास्य रामावरजः स सीतामाख्यातवाल्मीकिनिकेतमार्गः॥ निघ्नस्य मे भर्तृनिदेश
रौक्ष्यं देवि क्षमस्वेति बभूव नम्रः॥ ५८॥ सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि ते सौ
म्य चिराय जीव॥ बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वं॥ ५९॥ श्वश्रू
जनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणाम॥ अस्मि चिराय चिरं जीव य॥ यद्यस्मा
दिडौजसा इंद्रेण विष्णुरुपेंद्र इव अग्रजेन ज्येष्ठेन भ्रात्रा इत्थं परतंत्रोसि॥ ५९॥ ॥ श्व
श्रूजनमिति॥ ॥ सर्वं श्वश्रूजनमनुक्रमेण प्रापितमत्प्रणामः सन् मत्प्रणामं मुक्त्वा इत्यर्थः॥

विज्ञापयति किमिति॥ निषिच्यते इति निषेकः॥ मयि वर्त्तमानं सूनोस्तत्पुत्रस्य प्रजानिषेकं ग
र्भं चेतसा अनुध्याय तच्छिवमस्त्विति चिंतयत इति॥ ६०॥ वाच्य इति॥ स राजा त्वया मद्वच
नान्मद्वचनमिति कृत्वा॥ ल्यब्लोपे कर्मण्यधिकरणे पंचमी॥ वाच्यो वक्तव्यः॥ किमिति श्रु
त आह॥ वह्नावित्यादिभिः सप्तभिः श्लोकैः॥ अक्ष्णोः समीपे समक्षे विशुद्धपि अत्वया

प्रजानिषेकं मयि वर्त्तमानं सूनोरनुध्याय तचेतसेति॥ ६०॥ वाच्यस्त्वया मद्वचना
त्स राजा वह्नौ विशुद्धामपि यत्समक्षं॥ मां लोकवादश्रवणादहासीः श्रुतस्य
किं तत्सदृशं कुलस्य॥ ६१॥

भाव॥ अन्वयाज्ञावेद्या रत्मप्रतिस्रः समासांतोऽच्
प्रत्ययः॥ समक्षमग्नौ वह्नौ विशुद्धामपि मां लोकवादस्य मिथ्यावादस्य श्रवणाद्धेतोरज
हासीत्याक्षीरिति यत्तत् श्रुतस्य प्रख्यातस्य कुलस्य सदृशं किं न सदृशमित्यर्थः॥ य
द्वा श्रुतस्य श्रवणस्य कुलस्य चेति योजना कामचार्यसीति भावः॥ ६१॥ ॥

कल्याणेति॥ ॥अथवा कल्याणबुद्धेः सुधियः तव कर्तुः मयि विषयेऽयं त्यागो न कामचारः इच्छा
याः करणं न शंकनीयः॥ कामचारशंकापि न क्रियत इत्यर्थः॥ किंतु ममैव जन्मांतरपातका
नां अप्रसह्यो विपच्यत इति विपाकः फलं स एव विस्फूर्जथुः अशनिनिर्घोषः स्फूर्जथुर्व

कल्याणबुद्धेरथवा तवायं न कामचारो मयि शंकनीयः॥ ममैव जन्मांतरपातका
नां विपाकविस्फूर्जथुरप्रसह्यः॥ ६२॥ उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सा
र्धमसि प्रपन्नः॥ त्वयास्पदं प्राप्य तयातिरोषात्सोढास्मि न त्वद्भवने वसंती॥ ६३॥

ज्रनिर्घोष इत्यमरः॥ ६२॥ ॥ उपस्थितामिति॥ ॥ पूर्वं उपस्थितां प्राप्तां लक्ष्मीं अपास्य
मया सार्धं वनं प्रपन्नोसि प्राप्तोसि॥ तस्मात्तया लक्ष्म्याः तिरोषात् त्वद्भवने आस्पदं प्र
तिष्ठां॥ आस्पदं प्रतिष्ठायामिति निपातः॥ प्राप्य वसंती अहं सोढा नास्मि॥ ६३॥ ॥

निशाचरेति॥ निशाचरैरुपप्लुताः पीडिताः भर्तारो यासां ताः निशाचरोपप्लुतभर्तृकाः॥ नद्यृ-
तश्चेति कप्प्रत्ययः। तासां तपस्विनीनां भवतः प्रसादात् अनुग्रहात् शरण्या शरणसमर्था भू-
त्वाऽद्य त्वयि दीप्यते प्रकाशमाने सत्येव शरणार्थमन्यं तपस्विनं कथं प्रपत्स्ये प्राप्स्यामि॥६४

निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात्। भूत्वा शरण्या शरणा-
र्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने॥ ६४॥ किं वा तवात्यंतवियोगमोघे कुर्यामुपे-
क्षां हतजीवितेऽस्मिन्॥ स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमंतर्गतमंतरायः॥ ६५॥

किंचेति॥ किं वाऽद्य वा तव संबंधिना अत्यंतेन पुनः प्राप्तिरहितेन वियोगेन मोघे निःफले-
ऽस्मिन् हतजीविते तुच्छजीविते उपेक्षां कुर्यां न कुर्यामेव रक्षणीयं रक्षणार्हं अंतर्गतं कु-
क्षिस्थं त्वदीयं तेजः शुक्रं गर्भरूपं॥ शुक्रं तेजोरेतसी च बीजवीर्येंद्रियाणि चेत्यमरः॥ मम
मातरायो विघ्नो न स्याद्यदि॥ ६५॥

सेति॥ साहं प्रसूतेरूर्ध्वं सूर्यनिविष्टदृष्टिः सती तथाविधं तपश्चरितुं यतिष्ये॥ यथा भूय-
स्तेन तपसा मे मम जननांतरेऽपि त्वमेव भर्ता वियोगश्च न स्यात्॥ ६६॥ नृपस्येति॥ वर्णा-
नां ब्राह्मणादीनां आश्रमाणां ब्रह्मचर्यादीनां च पालनं परिपालनं यत् स एव नृपस्य धर्मः

साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये॥ भूयो यथा मे जननांत-
रेऽपि त्वमेव भर्ता न च विप्रयोगः॥ ६६॥ नृपस्य वर्णाश्रमपालनं यत् स एव धर्मो मनु-
ना प्रणीतः॥ निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया॥ ६७॥ ॥

अत्र स तु मनुना प्रणीतः उक्तः॥ अतः कारणादेवं त्वया निर्वासिता निःकासितापि त्र्य-
हं तपस्विभ्यः सामान्यं साधारणं यथा भवति तथावेक्षणीया॥ कलत्रदृष्ट्याभावे-
पि वर्णाश्रमदृष्ट्या सीतायां कर्तव्यमित्यर्थः॥ ६७॥ ॥

तथेति॥ ॥तथेतितस्याः सीतायाः वाचं प्रतिगृह्यांगीकृत्य रामानुजे लक्ष्मणे दृष्टिपथं व्यतीते अतिक्रांते सति॥ सा सीता व्यसनातिभारात् दुःखातिभारात् दुःखातिरेकात् मुक्तकंठं यथा स्यात्तथा वाग्भृत्स्नेत्यर्थः॥ विग्ना भीता कुररीव क्रोशनीव॥ उत्क्रोशं चुक्रोश॥

तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते॥ सा मुक्तकंठं व्यसनातिभाराच्चक्रंद विग्ना कुररीव भूयः॥६८॥ नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः॥ तस्याः प्रपन्ने समदुःखभावमत्यंतमासीद्रुदितं वनेपि॥ ॥६९॥

क्रोशः कुररौ समाविलमरः॥ भूयोप्यधिकं चक्रंद चुक्रोश॥६८॥ ॥नृत्यमिति॥ ॥मयूराः नृत्यं विजहुः त्यक्तवंतः वृक्षाः कुसुमानि हरिण्यः उपात्तान् दर्भान्॥ इत्थं तस्याः सीतायाः समदुःखभावं प्रपन्ने तुल्यदुःखत्वं प्राप्ते वनेपि अत्यंतं रुदितमासीत्॥ यथा राममंगेहेपीत्यपिशब्दार्थः॥६९॥

तामिति॥ ॥कुशेध्माहरणाय यातः कविर्वाल्मीकिः रुदितानुसारी सन् तां सीतामभ्यगच्छत् अभिगमनं चक्रे कुरु अनुतयेत्याह॥ ॥निषादेन व्याधेन विद्धस्य अंडजस्य क्रौंचस्य दर्शनेनोत्थः उत्पन्नो यस्य शोकः श्लोकत्वमापद्यत श्लोकरूपेणाविर्बभूवेत्यर्थः॥ स च श्लोकः॥ मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः॥ यत्क्रौंचमिथुनादेकमवधीः काममोहितमितिति रश्चामपि दुःखं न सेहे

तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः॥ निषादविद्धांडजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः॥७०॥ तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद्विरता ववंदे॥ तस्यै मुनिर्दोहदलिंगदर्शी दत्वा सुपुत्राशिषमित्युवाच॥ ७१॥ ॥

किमुतान्येषामिति भावः॥७०॥ ॥तमिति॥ ॥सीता विलापाद्विरता सती नेत्रावरणं दृष्टिप्रतिबंधकमश्रु प्रमृज्य तं मुनिं ववंदे॥ दोहदलिंगदर्शी गर्भचिह्नदर्शी मुनिस्तस्यै सीतायै सुपुत्राशिषं तल्लाभहेतुभूतां दत्वा दातवान् इति वक्ष्यमाणप्रकारेणोवाच दाश्वान्साह्वान्मीढ्वांश्चेति क्वसुप्रत्ययांतो निपातः॥७१॥

जानइति ।। त्वां मिथ्यापवादेन क्षुभितेन भर्त्रा विसृष्टां त्यक्तां प्रणिधानतः समाधिदृष्ट्या जाने हे वै
देहि विषयांतरस्थं देशांतरस्थं पितुर्जनकस्य निकेतं गृहं प्राप्तासि तत्तस्मान्मा व्यथिष्ठाः मा व्य
थीः ।। व्यथेर्लुङ् नमाङ्योग इत्यडागमप्रतिषेधः ।। भर्त्रोपेक्षितानां पितृगृह एव वास उचित इ
तिभावः ।। ७२ ।। उत्खातेति ।। उत्खातलोकत्रयकंटकेपि रावणादिकंटकोद्धरणेपि सर्व

जानेविसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा ।। तन्मा व्यथिष्ठा विषयां
तरस्थं प्राप्तासि वैदेहि पितुर्निकेतं ।। ७२ ।। उत्खातलोकत्रयकंटकेपि सत्यप्रतिज्ञेप्य
विकत्थनेपि ।। त्वां प्रत्यकस्मात्कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे ।। ७३ ।। ।।

लोकोपकारिण्यपीत्यर्थः ।। सत्यप्रतिज्ञेपि सत्यसंधेपि अविकत्थनेपि अश्लाघिन्यपि त्वां
प्रति अकस्मादकारणात्कलुषप्रवृत्तौ गर्हितव्यापारे भरताग्रजे मम मन्युः कोपोऽस्त्ये राम.
व सर्वगुणाच्छादकोयं दोष इत्यर्थः ।। सीतानुनयार्थं रामोपालंभः ।। ७३ ।। ।। १७

तवेति ।। उरुकीर्त्तिर्विस्तृतयशाः श्वशुरो मे मम सखा ते पिता जनकः सतां विदुषां भवच्छेद
करः ज्ञानोपदेशादिना संसारदुःखध्वंसकारी त्वं पतिदेवतानां पतिव्रतानां धुरि अग्रे स्थि
ता येन निमित्तेन मम सानुकंप्या अनुग्राह्या नासि तत्किं न किंचिदित्यर्थः ।। ७४ ।। तपस्वीति ।। ।।

तवोरुकीर्त्तिः श्वशुरः सखा मे सतां भवोच्छेदकरः पिता ते ।। धुरि स्थिता त्वं पतिदेवतानां
किं तन्न येनासि ममानुकंप्या ।। ७४ ।। तपस्विसंसर्गविनीतसत्त्वे तपोवने वीतभया व
सास्मिन् ।। इतो भविष्यत्यनघप्रसूतेरपत्यसंस्कारमयो विधिस्ते ।। ७५ ।। ।।

तपस्विसंसर्गेण विनीतसत्त्वे शांतजंतुके अस्मिंस्तपोवने वीतभया निर्भीका वस ।।
इतोस्मिन् वने अनघप्रसूतेः ते अपत्यसंस्कारमयो जातकर्मादिरूपो विधिरनु
ष्ठानं भविष्यति ।। ७५ ।। ।।

अन्वेति॥ ॥ संनिविशंते येषु इति संनिवेशाः। उटजाः॥ अधिकरणार्थे घञ्॥ मुनीनां संनिवेशैरु
टजैरशून्यतीरां तमसः शोकस्य पापस्यापहंत्रीं॥ तमस्तु क्लीबे पापेन रकशोकयोरित्यमरः॥
तमसां नदीं विगाह्य तत्र स्नात्वा बलिक्रियापेक्षयापेक्षया पूर्वकाळता तस्याः सैकतोत्संगे
षु बलिक्रियाभिरिष्टदेवतापूजाविधिभिः ते मनसः प्रसादः संपत्स्यते भविष्यति॥७६॥ पु

अशून्यतीरां मुनिसंनिवेशैस्तमोपहंत्रीं तमसां विगाह्य॥ तत्सैकतोत्संगबलिक्रिया
भिः संपत्स्यते ते मनसः प्रसादः॥७६॥ पुष्पं फलं चार्तवमाहरंत्यो बीजं च बाले
यमकृष्टरोहि॥ विनोदयिष्यंति नवाभिषंगामुदारवाचो मुनिकन्यकास्त्वां॥७७

ष्पमिति॥ ऋतुरस्य प्राप्तमित्यार्तवं स्वकालमाप्तपुष्पं फलं चाकृष्टरोहि॥ अकृष्टक्षेत्रे रोहतीत्यकृ
ष्टपच्यं बलये हितं बालेयं पूजायोग्यं॥ छदिरुपधिवलेर्ढञिति ढञ् प्रत्ययः॥ बीजं नी
वारादिधान्यं चाहरंत्यः उदारवाचः प्रगल्भगिरः मुनिकन्यकाः नवाभिषंगां नूतनदुःखां
त्वां विनोदयिष्यंति॥७७॥ ॥

पय इति॥ ॥ स्वबलानुरूपैः स्वशक्त्यनुसारिभिः पयसामंजसां घटैः स्तनैरिति च ध्वन्यते॥ आश्रमबा
लवृक्षान् संवर्धयंती त्वं तनयोपपत्तेः प्राक् पूर्वमसंशयं यथा तथा॥ स्तनं धयति पिबतीति स्त
नंधयः शिशुः॥ नासिकास्तनयोर्ध्माधेटोरिति खश्प्रत्ययः॥ अरुर्द्विषेत्यादिना मुमागमः॥

पयोघटैराश्रमबालवृक्षान् संवर्धयंती स्वबलानुरूपैः॥ असंशयं प्राक्तनयोपपत्तेः
स्तनंधयप्रीतिमवाप्स्यसि त्वं॥७८॥ अनुग्रहप्रत्यभिनंदिनीं तां वाल्मीकिरादाय दया
र्द्रचेताः॥ सायं मगाध्यासितवेदिपार्श्वं स्वमाश्रमं शांतमृगं निनाय॥७९॥

तस्मिन् या प्रीतिस्तामवाप्स्यसि॥ ततः परं सुलभ एव विनोद इति भावः॥७९॥ ॥अनुग्र
ह इति॥ दयार्द्रचेता वाल्मीकिरनुग्रहं प्रत्यभिनंदतीति तथोक्तां तां सीतामादाय सायं मृ
गैरध्यासितवेदिपार्श्वमधिष्ठितवेदिप्रांतं शांतमृगं स्वमाश्रमं निनाय॥७९॥ ॥

तामिति ॥ ॥ स मुनिः शोकदीनां तां सीतां तस्याः सीतायाः आगमेन आगमनेन प्रीतिर्यासां तासु तापसी-
षु पितृभिरग्निष्वात्तादिभिर्निर्विष्टसारां भुक्तसारां हिमांशोरंत्यां अवशिष्टां कलां दर्शः अमावास्या काल
ओषधीष्विवार्पयामास ॥ अत्र पराशरः ॥ पिबंतु विमलं सोमं शिष्टा तस्य तु या कला ॥ सुधामृतमयी पु-
ण्यां तामिंदोः पितरो मुनेऽतिथिर्या सत्य ॥ अमायां तु सदा सोम ओषधीः प्रतिपद्यत इति ॥ ८०॥ ॥

तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु ॥ निर्विष्टसारां पितृभिर्हिमांशोरं-
त्यां कलां दर्श इवौषधीषु ॥ ८०॥ ता इंगुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमं-
तः ॥ तस्यै सपर्यानुपदं दिनांते निवासहेतोरुटजं वितेरुः ॥ ८१॥ ॥

ता इति ॥ ॥ ताः तापस्यः त-
स्यै सीतायै सपर्यानुपदं पूजानंतरं दिनांते सायंकाले निवासः एव हेतुः तस्य निवासहेतोर्निवा-
सार्थमित्यर्थः ॥ षष्ठी हेतुप्रयोगे इति षष्ठी इंगुदी तापसतरुरित्यमरः ॥ इंगुदीस्नेहेन कृत-
प्रदीपमंतरास्तीर्णं मेध्यमजिनमेव तल्पं शय्या यस्मिन् तमुटजं पर्णशालां वितेरुर्ददुः ॥ ८१

तत्रेति ॥ ॥ तत्राश्रमे अभिषेकेण स्नानेन प्रयता नियता नियता वसंती विधिना शास्त्रेण अतिथिभ्यः प्र-
युक्तपूजा कृतसत्कारा वल्कलिनी सा सीता पत्युः प्रजासंततये संतानाविच्छेदाय हेतोर्वन्येन कंद-
मूलादिना शरीरं बभार पुपोष ॥ ८२॥ अपीति ॥ ॥ प्रभुः राजा अधुनापि सानुशयः स्याद् अपि सानु-
तापः स्यात् किमिति काकुः उत्सुकः शक्रजित इंद्रजितो हंता लक्ष्मणोऽपि सीतापरिदेवनांतं सीता-

तत्राभिषेकप्रयता वसंती प्रयुक्तपूजा विधिनातिथिभ्यः ॥ वन्येन सा वल्कलिनी शरीरं पत्युः
प्रजासंततये बभार ॥ ८२॥ अपि प्रभुः सानुशयोऽधुना स्यादित्युत्सुकः शक्रजितोऽपि हंता ॥
शशंस सीतापरिदेवनांतमनुष्ठितं शासनमग्रजाय ॥ ८३॥ बभूव रामः सहसा सबाष्प-
स्तुषारवर्षीव सहस्यचंद्रः ॥ विलापांतं अनुष्ठितं शासनमग्रजाय शशंस ॥ ८३॥ ॥ बभू-
वेति ॥ ॥ सहसा सबाष्पो रामः तुषारवर्षी सहस्यचंद्र इव बभूव ॥ अस्रुपातात्तुषार-
वर्षिणा पौषचंद्रेण तुल्योऽभूत् ॥ पौषे तैषसहस्यौ द्वावित्यमरः ॥ युक्तं चैतदित्याह ॥ ॥

रघुवं·टी·सं·
२०

सर्ग· १४

कौलीनइति॥ ॥कौलीनाल्लोकापवादाद्भीतेनरामेणवैदेहसुतासीतागृहान्निरस्तानमनसः॥ मनस
श्छिन्नान्निरस्ता॥ पंचम्यास्तसिल्॥८४॥ ॥निगृह्येति॥ ॥धीमान्वर्णाश्रमाणांचवेक्षणेऽनु
संधानेजागरूकोऽप्रमत्तः॥ जागरूकइत्यूकप्रत्ययः॥ रजोरिक्तमनाः रजोगुणशून्यचेताः॥
सरामः स्वयमेवशोकंनिगृह्यनिरुध्यभ्रातृभिः साधारणभोगंशरीरस्थितिमात्रेणयुक्तंरा

कौलीनभीतेनगृहान्निरस्तानतेनवैदेहसुतामनस्तः॥८४॥ निगृह्यशोकंस्वयमेवधीमा
न्वर्णाश्रमावेक्षणजागरूकः॥ सभ्रातृसाधारणभोगमृद्धंराज्यंरजोरिक्तमनाःशशास
८५॥ तस्यैककान्यांपरिवादभीरोः साध्वीमपित्यक्तवतोन्नृपस्य॥ वक्षस्यसंघट्टसुखंव
संतीरेमेसपत्नीरहितेवलक्ष्मीः॥८६॥ ध्रुवंराज्यंशशास॥८५॥ ॥तामिति॥ ॥परिवादभीरो
र्निंदाभीरोरतएवएककान्यामपिसाध्वीमपितांसीतांत्यक्तवतोन्नृपस्यवक्षस्यसंघट्टसु
खमसंजातासुखंवसंतीलक्ष्मीःसपत्नीरहितेवरेजेदिदीपे॥ तस्यस्त्र्यंतरपरिग्रहोना
भूदित्यर्थः॥८६॥॥

राम·
२०

सीतामिति॥ ॥दशमुखरिपुः रामः सीतांहित्वात्यक्त्वाऽन्यांस्त्रियंनोपयेमे॥ नपरिणीतवानित्यर्थः॥ उ
पायमः स्वकरणइत्यात्मनेपदं॥ किंचतस्याः सीतायाएवप्रतिकृतेः प्रतिमायाहिरण्मय्याः स
खाप्रतिकृतिसखः सन्क्रतून्आजहारआहृतवानित्यर्थः॥ तेनश्रवणविषयप्रापिणाश्रोत्र

सीतांहित्वादशमुखरिपुर्नोपयेमेयदन्यांतस्याएवप्रतिकृतिसखोयत्क्रतूनाजहार॥ वृत्तां
तेनश्रवणविषयप्रापिणातेनभर्तुःसादुर्वारंदुःखमपिपरित्यागदुःखंविषेहे॥८७॥
इतिश्रीरघुवंशेमहाकाव्येकविश्रीकालिदासकृतौसीतापरित्यागोनामचतुर्दशःसर्गः
॥१४॥

देशगामिनाभर्तुर्दयांतेनवार्तयाहेतुनासासीतादुर्वारंदुर्निरोधंपरित्यागेनयत्दुः
खंतत्कथमपिविषेहेविसोढवती॥८७॥ ॥इतिश्रीमहोपाध्यायकोलचलमल्लिनाथसू
रिविरचितायांरघुवंशटीकायांसंजीविनीसमाख्यायांसीतापरित्यागोनामचतुर्दशःस
र्गः॥१४॥॥

रघुवं.टी.सं.
२१

सर्ग.१८

राम.
२१

श्रीगणेशाय नमः॥ ॥नमो रामपदांभोजरेणवो यत्र संततं॥ कुर्वंति कुमुदप्रातिमरण्यगृहमेधिनः॥
१॥ ॥कृतेति॥ ॥कृतसीतापरित्यागः सः पृथिवीपालो रामो रत्नाकर एव मेखला यस्यास्तां सार्ण
वामित्यर्थः॥ केवलामेकामित्यर्थः॥ पृथिवीमेव बुभुजे भुक्तवान्॥ न तु पार्थिवीमित्यर्थः॥ सापि
रत्नखचितमेखला पृथिव्याः का तासमाधिर्व्यज्यते॥ रामस्यस्त्र्यंतरपरिग्रहो नास्तीति स्तोक

कृतसीतापरित्यागः स रत्नाकरमेखलां॥ बुभुजे पृथिवीपालः पृथिवीमेव केवलां॥
१॥ लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः॥ मुनयो यमुनाभाजो शरण्यं शरणार्थि
नः॥२॥

भिप्रायः॥१॥ ॥लवणेति॥ ॥लवणेन लवणाख्येन तामिस्रेण तमिस्रचारिणा
रक्षसेत्यर्थः॥ विलुप्तेज्याः लुप्तयागक्रियाः॥ अत एव शरणार्थिनः यमुनाभाजो यमुना राम· १
ती तीरवासिनो मुनयः शरण्यं शरणार्हं रक्षणसमर्थं तं रामं रक्षितारमभ्ययुः॥ प्राप्ताः प्रातेत्यूः
॥२॥

अवेक्ष्येति॥ ॥ते मुनयः राममवेक्ष्य रक्षितारं प्रतिशेषः॥ तस्मिन् लवणे स्वतेजसा शापरूपेण न प्रज
ह्रुः॥ तथा हि॥ त्रायत इति त्राणः॥ रक्षकः॥ कर्तरि ल्युट्॥ तदभावे शापएवास्त्रं येषां ते शापास्त्रा
स्तः तपसो व्ययं कुर्वंति शापदानात्तपःक्षयः प्रसिद्धः॥३॥ ॥प्रतीति॥ ॥काकुत्स्थो रामस्तेभ्यो

मुवेक्ष्य रामं ते तस्मिन्न प्रजह्रुस्स्वतेजसा॥ त्राणाभावे हि शापास्त्राः कुर्वंति तपसो व्ययं॥
३॥ प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियां॥ धर्मसंस्थापनार्थाय प्रवृत्तिर्भुवि शार्ङ्
गिणः॥४॥

मुनिभ्यो विघ्नप्रतिक्रियां लवणवधरूपां प्रतिशुश्राव प्रतिजज्ञे॥ तथा हि॥
भुवि शार्ङ्गिणो विष्णोः प्रवृत्तिः रामरूपेणावतरणं धर्मसंरक्षणमेवार्थः प्रयोजनं य
स्याः सा तदर्थैव॥४॥ ॥

त इति॥ ॥ते मुनयो रामाय विबुधद्विषः सुरारेर्लवणस्य वधोपायमाचख्युः॥ लुनातीति लवणः॥
नंद्यादित्वाल्ल्युट्प्रत्ययः॥ तत्रैव निपातनत्वात् णत्वं॥ लवणः शूली शूलवान् दुर्जयः अक्षय्यः किंतु
विशूलः॥ शूलरहितः॥ प्रार्थ्यतामभिगम्यतां॥ याच्ञायामभियाने च प्रार्थना कथ्यते बुधैरिति के
शवः॥ अथवा प्रार्थ्यतां उपरुध्यतां इत्यर्थः॥ अवप्रेऽर्थयते रथप्रार्थयाच्ञावरोधयोरिति॥५॥

ते रामाय वधोपायमाचख्युर्विबुधद्विषः॥ दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति॥
५॥ आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः॥ करिष्यन्निव नामास्य यथार्थमरिनि
ग्रहात॥ ६॥

आदिदेशेति॥ ॥अथ तेषां मुनीनां क्षेमाय क्षेमकरणाय राघवो रामः शत्रु
घ्नमादिदेश॥ अत्रोत्प्रेक्ष्यते॥ अस्य शत्रुघ्नस्य नाम अरिनिग्रहात् शत्रुहननाद्धेतोः यथाऽर्थतो
अर्थयिष्यत यथार्थं करिष्यन्निव शत्रून् हंतीति शत्रुघ्नः॥ अमनुष्यकर्तृकेपि चेत्यपि शब्द
त्वात् घ्न शत्रुघ्नादयः सिद्धा इति दुर्गसिंहः॥ पाणिनीये पि बहुलग्रहणाद्यथेष्टसिद्धिः॥ के
ष्युचिद् बहुलमिति॥६॥ ॥

रामस्य स्वयमप्रवृत्तौ हेतुमाह॥ ॥य इति॥ ॥ परान् शत्रून् तापयतीति परंतपः॥ द्विषत्परयोस्ता
पेरिति खच् प्रत्ययः॥ खच्चित्कृत्सु इति ह्रस्वः॥ हि यस्मात् रघूणां मध्ये यः कश्चन एकः॥ द्विपदादौ वि
शेषशास्त्रं उत्सर्गं सामान्यशास्त्रमिव परं शत्रुं व्यावर्तयितुं बाधितुमीश्वरः समर्थः॥ अतः शत्रुघ्नमे
वादिदेशेति पूर्वेणान्वयः॥७॥ ॥अग्रजेनेति॥ ॥अग्रजेन रामेण प्रयुक्ताशीः कृताशीर्वादो

यः कश्चन रघूणां हि परमेकः परंतपः॥ अपवाद इवोत्सर्गं व्यावर्तयितु
मीश्वरः॥ ७॥ अग्रजेन प्रयुक्ताशीस्ततो दाशरथी रथी॥ ययौ वनस्थलीः प
श्यन् पुष्पिताः सुरभीरभीः॥ ८॥ रामदेशादनुपदं सेनांगं तस्य सिधये॥

रथी रथिकः अभीर्निर्भीकः दाशरथिः पुष्पाण्यासां संजातानि पुष्पिताः सुरभीः आमोदमा
नाः वनस्थलीः पश्यन् ययौ॥ ८॥ रामेति॥ ॥रामादेशानुगता सेना तस्य शत्रुघ्नस्य अ
ध्ययनमर्थः निधेयं यस्य तस्य धातोरिङ् अध्ययने इत्यस्य धातोः॥ ॥

पश्चादध्युपसर्ग इवार्थसिद्धये प्रयोजनासाधनयेत्येकत्र अन्यत्राभिधेयाय अभवत्॥ अर्थो भिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः॥ पक्षेऽपि॰ कावध्युपसर्गस्तत्त्वाभिचरतइतिन्यायेन अध्युपसर्गः स्वयमेवार्थसाधकस्य धातोः संनिधिमात्रेण उपकरोति सेनापितस्तद्वत् दितिनाव ॥ ९॥ ॥आदिष्टेति॥॥ रथपृष्ठैः रथस्याग्रगामिभिः पृष्ठैः अग्रगामीतिनिपा

पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्॥ ९॥ आदिष्टवर्त्मा मुनिभिः स
गच्छंस्तपतां वरः॥ विरराज रथप्रष्ठैर्वालिखिल्यैरिवांशुमान्॥ १०॥॥

तः॥ मुनिभिः पूर्वोक्तैरादिष्टवर्त्मा निर्दिष्टमार्गो गच्छन् तपतां दीप्यमानानां मध्ये वरः श्रेष्ठः स शत्रुघ्नः स वालिखिल्यैः मुनिभिरंशुमान् सूर्य इव विरराज॥ तेपि स्वरथप्रष्ठा इत्यप्यनुसंधेयं॥ मुनिसंनिधौ तस्य रथारोहणं मुनीनामात्मयेतिनविरुद्धं॥
॥१०॥

तस्येति॥ तपतो गच्छतः इणधातोः शतृप्रत्ययः॥ तस्य शत्रुघ्नस्य मार्गवशात् रथस्वनेउत्कंठीत्कांठाउत्कंठा वा मृगा यस्मिन् वाल्मीकीसंबंधिनि॥ वृ धात्वइतिछ प्रत्ययः॥ तपोवने एका वसतिः रात्रिर्बभूव॥ तत्रैका रात्रिर्बभूव तत्रैकां रात्रिं उषित इत्यर्थः॥ वसती रात्रिवेश्मनोरित्यमरः॥ ११॥ तमिति॥ ॥ क्लांतवाहनं श्रांतयुग्यं तं कुमारं शत्रुघ्नं ऋषिर्वाल्मीकिः तपःप्रभाव

तस्य मार्गवशादेका बभूव वसतिर्यतः॥ रथस्वनोत्कण्ठमृगे वाल्मीकीये तपोवने
११॥ तमृषिः पूजयामास कुमारं क्लांतवाहनं॥ तपःप्रभावसिद्धाभिर्विशेषप्रतिप
त्तिभिः॥ १२॥ तस्यामेवास्य यामिन्यामंतर्वत्नी प्रजावती॥

सिद्धाभिः विशेषप्रतिपत्तिभिः उत्कृष्टसंभावनाभिः पूजयामास॥ १२॥ ॥तस्यामिति॥ ॥तस्यामेव यामिन्यां रात्रौ अस्य शत्रुघ्नस्य॥ अंतरस्या अस्तीत्यंतर्वत्नी गर्भिणी अंतर्वत्नी च गर्भिणी इत्यमरः॥ अंतर्वत्पतिवतोर्नुगितिङीप्॥ नुगागमश्च॥ प्रजावती॥

रघुवं·टी·स· ४

न्वजायासीतासंपत्नीसमग्रीकोशदंडाविवकोशोधनंदंडश्चतुरंगबलंताविव॥ दंडोपमेया सर्ग·१५
न्नेदेलगुडेदमसैन्ययोरितिविश्वः॥ सुतौअसूत॥१३॥ ॥संतानेति॥ ॥भ्रातुर्ज्येष्टस्यसं
तानश्रवणाद्धेतोः सौमनस्यवान्प्रीतिमान्सौमित्रिःशत्रुघ्नः प्रातर्युक्तरथःसनसक्र

सुतावसूतसंपन्नौकोशदंडाविवक्षितिः॥१३॥ संतानश्रवणाद्भ्रातुः सौमित्रिःसौ
मनस्यवान्॥ प्रांजलिर्मुनिमामंत्र्यप्रातर्युक्तरथोययौ॥१४॥ सचप्रापमधूपघ्नं
कुंभीनस्याश्चकुक्षिजः॥ वनात्करमिवादायसत्वराशिमुपस्थितः॥१५॥

थः सनप्रांजलिः कृतांजलिः मुनिमामंत्र्यापृच्छ्ययययौ॥१४॥ ॥सचेति॥ ॥सशत्रु
घ्नश्चमधुपघ्नंनामलवणपुरंप्राप॥ कुंभीनसीनामरावणस्वसातस्याःकुक्षिजःपु
त्रोलवणश्चवनात्करंबलिंइवसत्वानांप्राणिनोराशिमादायउपस्थितः प्राप्तः॥१५ राम· ५

धूमेति॥ ॥किंभूतोलवणः धूमइवधूम्रः कृष्णलोहितवर्णः॥ धूम्रधूमलौकृष्णलोहितइत्यमरः॥
वसागंधी हृन्मेदोगंधः सोऽस्यअस्तीतिवसागंधी॥ हृन्मेदस्तुवपावसेत्यमरः॥ ज्वालाइवबभ्रव
पिंगलाः शिरोरुहाः केशाः यस्यसतथोक्तः॥ विपुलेनकुलेविशेषोबभ्रुःस्यात्पिंगलेत्रिष्वित्य
मरः॥ क्रव्यंमांसंअदंतीतिक्रव्यादाः राक्षसाः क्विप्॥ तेषांगणएवपरिवारोयस्यसतथोक्तः॥

धूमधूम्रोवसागंधीज्वालाबभ्रुशिरोरुहः॥ क्रव्यात्गणपरीवारश्चिताग्निरिवजंगमः॥१६॥
अपशूलंतमासाद्यलवणंलक्ष्मणानुजः॥ रुरोधसंमुखीनोहिजयोरंध्रप्रहारिणां॥१७॥

अतएवजंगमश्चरिष्णुः चिताग्निरिवस्थितः॥ कृशानुपक्षेधूमैः धूम्रवर्णः ज्वालाएवशिरो
रुहाः क्रव्यादागृध्रादयइत्यनुसंधेयं॥१६॥ ॥अपशूलमिति॥ ॥लक्ष्मणानुजः शत्रुघ्नअ
पशूलंशूलरहितंतंलवणमासाद्यरुरोध॥ तथाहि॥ रंध्रप्रहारिणां रंध्रप्रहारशीलानांअ
पशूलमेवात्ररंध्रंजयः संमुखीनोहिसंमुखइष्यतेहि॥ यथामुखसंमुखस्यदर्शनःखइतिख
प्रत्ययः॥ अधिकरणलक्षणलक्षणायांगस्तुदुर्लभएव॥१७॥ ॥

नेति॥ ॥इतीति॥ ॥राक्षसो लवणः अयमत्कुक्षेः तुष्यत इति भोजनं भोज्यं मृगादिकं नातिपर्याप्तमन
तिसमग्रं आलक्ष्य दृष्ट्वा भीतेनेव धात्रा दिष्ट्या भाग्येन अमितं उपपादितः कल्पितोसि इति शत्रुघ्नं संत
र्ज्य राक्षसस्तस्य शत्रुघ्नस्य जिघांसया हंतुमिच्छया प्रांशुमुन्नतं द्रुमं मुस्तास्तंबमिव वृक्षे शैवानु
त्पाटयामास॥ १९॥ ॥युग्मं॥ ॥सौमित्रेरिति॥ ॥नैरृतेरितः राक्षसेरितः शाखी अंतरामध्येनि

नातिपर्याप्तमालोक्य मत्कुक्षेरद्य वेतनं॥ दिष्ट्यासि त्वमिति धात्रा भीतेनेवोपपादितः॥ १८॥
इति संतर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया॥ प्रांशुमुत्पाटयामास मुस्तास्तंबमिव द्रुमं॥ १९॥
युग्मं॥ ॥सौमित्रेर्निशितैर्बाणैरंतरा शकलीकृतः॥ गात्रं पुष्परजः प्राप न शाखी नैरृते
रितः॥ २०॥ विनाशात्तस्य शूलस्य रक्षस्तस्मै महोपलं॥ प्रजिघाय कृतांतस्य मुष्टिं पृथगिव स्थितं
॥२१॥

शितैर्बाणैः शकलीकृतः सन् सौमित्रेः शत्रुघ्नस्य गात्रं न प्राप किंतु पुष्परजः प्राप॥ २०॥ विनाशादिति॥
रक्षो लवणः तस्य शूलस्य विनाशेन धेतो महोपलं महांतं पाषाणं पृथक्स्थितं कृतांतस्य यमस्य मुष्टि
मिव॥ मुष्टिः शब्दो द्विलिंगः॥ तस्मै शत्रुघ्नाय प्रजिघाय प्रहितवान्॥ २१॥ ॥छ॥ ॥

ऐंद्रमिति॥ ॥स महोपलः शत्रुघ्नेन ऐंद्रं इंद्रदेवताकं अस्त्रं उपादाय ताडितो भिहतः सन् सिकतात्वा
त् सिकताभावादपि परां परमाणुतां प्रपेदे॥ यतोऽणुर्नाल्पिसपपरमाणुरित्याहुः॥ २२॥ ॥दक्षिण
मिति॥ ॥ दक्षिणं दोषमुद्यम्य राक्षसः तमुपाद्रवत् इतिस्थलपाठः॥ राक्षसो निशाचरो दक्षिणं दो

ऐंद्रमस्त्रमुपादाय शत्रुघ्नेन स ताडितः॥ सिकतात्वादपि परां प्रपेदे परमाणुतां॥ २२॥
दक्षिणं दोषमुद्यम्य राक्षसस्तमुपाद्रवत्॥ एकताल इवोत्पातपवनप्रेरितो गिरिः॥ २३॥
कार्ष्णेन पत्रिणा शत्रुः स भिन्नहृदयः पतन्॥

षं सव्येतरं बाहुमुद्यम्य एकस्तालो वृक्षो
यस्मिन् स एकतालः उत्पातपवनेन प्रेरितो गिरिरिव तं शत्रुघ्नमुपाद्रवत् अभिद्रुतः॥
२३॥ ॥कार्ष्णेनेति॥ ॥वैष्णवेन उक्तं च रामायणे एवमेषः प्रजनितो विष्णोस्तेजोमयः श
रः॥ विष्णुर्नारायणः कृष्ण इत्यमरः॥ स शत्रुर्लवणः कार्ष्णेन पत्रिणा बाणेन भिन्नहृद
यः पतन् भुवः॥ ॥

कंपं आनिपानीतवान् देहत्यागादित्यर्थः ॥ आश्रमवासिनां कंपं जहार तन्नाशादकुतोभयाः बभू
वुरित्यर्थः ॥२४॥ ॥वपसामिति॥ ॥हतस्य रक्षस उपरि वपसां पंक्तयः पेतुः ॥ तत्प्रति द्वंद्विनः शा
त्रुघ्नस्य मूर्ध्नि दिव्याः कुसुमवृष्टयः पेतु ॥२५॥ ॥स इति॥ ॥वीरः स शत्रुघ्नो लवणं हत्वा तदा
त्मानं महौजसो महाबलस्य इंद्रजिद्वधशोभिनः भ्रातुर्लक्ष्मणस्य समानोदरं ज्ञायितं सोद

अनिनाय भुवः कंपं जहाराश्रमवासिनां ॥२४॥ वपसां पंक्तयः पेतुर्हतस्योपरि रक्षसः ॥
तत्प्रतिद्वंद्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः ॥२५॥ स हत्वा लवणं वीरं तदा मेने महौजसः ॥
भ्रातुः सोदर्यमात्मानमिंद्रजिद्वधशोभिनः ॥२६॥ तस्य संस्तूयमानस्य चरितार्थैस्तपस्वि
भिः ॥ शुशुभे विक्रमोदग्रं व्रीडयावनतं शिरः ॥२७॥ र्यं एकोदरं मेने ॥ सोदराद्यदिति य

त्प्रत्ययः ॥२६॥ ॥चरितेति॥ ॥ चरितार्थैः कृतार्थैः कृतकार्यैस्तपस्विभिर्मुनिभिः संस्तूयमा
नस्य तस्य शत्रुघ्नस्य विक्रमेणोदग्रं उन्नतं व्रीडया लज्जया ऽवनतं नम्रं शिरः शुशुभे वि
क्रांतस्य लज्जैव भूषणमिति भावः ॥२७॥ ॥

उपेति॥ ॥पौरुषभूषणः अर्थेषु विषयेषु निर्ममः निःस्पृहः मधुराकृतिः ॥ सौम्यरूपः स शत्रुघ्नः
कालिंद्या यमुनायाः उपकूलं कूले विजनत्वार्थे ऽव्ययीभावः ॥ मधुरां नाम पुरीं निर्ममे निर्मित
वान् निर्ममो व्याख्यातः ॥२८॥ ॥येति॥ ॥ यापूः शत्रुघ्नः शोभनो राजा यस्याः पुरः सुराज्ञा सु
राज्यः भावः सौराज्यं तेन प्रकाशमानाभिः प्रकाशमानाभिः पौराणां विभूतिभिः ऐश्वर्यैः स्वर्गस्याभि

उपकूलं स कालिंद्याः पुरं पौरुषभूषणः ॥ निर्ममे निर्ममोर्थेषु मधुरां मधुराकृतिः ॥
२८॥ या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः ॥ स्वर्गाभिष्यंदवमनं कृत्वेव
विनिवेशिता ॥२९॥ तत्र सौधगतः पश्यन् यमुनां चक्रवाकिनीं ॥ ॥ ॥

ष्यंदो अतिरिक्तं जनस्तस्य वमनं आहरणं कृत्वा उपनिवेशिता उपस्थिते व बभौ ॥ अत्र कौ
टिल्यः ॥ भूतपूर्वमभूतपूर्वं जनपदं परदेशप्रवाहेन स्वदेशाभिष्यंदवमनेन वा निवेशये
दिति ॥२९॥ ॥तत्रेति॥ ॥तत्र मधुरायां सौधगतो हर्म्यारूढः शत्रुघ्नः चक्रवाकिनीं चक्रवतीं यमु
नां ॥

हेमनक्किमतीं सुवर्णरचनावतीं भूमेः वेणीं प्रवेणीमिव ॥ वेणी प्रवेणी इत्यमरः ॥ पत्युपत्नीं प्रियंप्रीतः ॥ प्री
ङ् प्रीणने इति ॥ धातोर्दैवादिकात्क्तः ॥३०॥ ॥ संप्रति रामसंतानवृत्तांतमाह ॥ ॥ सखेति ॥ दशर
थस्य जनकस्य च सखा मंत्रकृत् ॥ मंत्रद्रष्टा स वाल्मीकिरपि ॥ सुकर्मपापेत्यादिना क्विप् ॥ उभयोर्द
शरथजनकयोः प्रीत्या स्नेहेन मैथिलेयौ मैथिलीपुत्रौ यथाविधि यथाशास्त्रं संचस्कार संस्कृतवान्

हेमनक्किमतीं भूमेः प्रवेणीमिव पिप्रिये ॥३०॥ सखा दशरथस्यापि जनकस्य च मंत्रकृत् ॥ संच
स्कारोभयप्रीत्या मैथिलेयौ यथाविधि ॥३१॥ स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया ॥
कविः कुशलवावेव चकार किल नामतः ॥३२॥

जातकर्मादिभिरिति शेषः ॥३१॥ स इति ॥
स कविः वाल्मीकिः कुशैर्दर्भैर्लवैर्गोपुच्छलोमभिः ॥ लवो लवनकिंजल्कपक्ष्मगोपुच्छलोमसु इ
ति वैजयंती उन्मृष्टो गर्भक्लेदो गर्भोपद्रवो ययोस्तौ कुशलवोन्मृष्टगर्भक्लेदौ मैथिले
यौ तेषां कुशानां लवानां चाख्यया नाम्ना यथासंख्यं कुशलवावेव चकार किल ॥ कुशो
न्मृष्टः कुशः लवोन्मृष्टो लव इत्यर्थः ॥३२॥ ॥

सांगमिति ॥ ॥ किंचिदुत्क्रांतशैशवौ व्यतिक्रांतबाल्यौ तौ सांगं वेदमध्याप्य कवीनां प्रथमपद्धतिं कवि
ताबीजमित्यर्थः ॥ स्वकृतिं काव्यं रामायणाख्यं गापयामास ॥ गायतेर्णिचि शब्दकर्मकत्वात् गतिबुद्धी
त्यादिना द्विकर्मकत्वं ॥३३॥ ॥ रामस्येति ॥ ॥ तौ सुतौ रामस्य वृत्तं मातुरग्रतो मधुरं गायंतौ तद्वियो
गव्यथां रामविरहव्यथां किंचिच्छिथिलीचक्रतुः ॥३४॥ ॥ इतरेपीति ॥ ॥ रघोर्वंश्याः वंशोद्भवाः

सांगं च वेदमध्याप्य किंचिदुत्क्रांतशैशवौ ॥ स्वकृतिं गापयामास कविः प्रथमपद्धतिं ॥३३॥
रामस्य वृत्तं मधुरं गायंतौ मातुरग्रतः ॥ तद्वियोगव्यथां किंचिच्छिथिलीचक्रतुस्सुतौ ॥३४॥
इतरेपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः ॥ तद्योगात्पतिवत्नीषु पत्नीष्वासन्द्विसूनवः ॥३५॥

त्रेतायुगे भरतादीनां संबंधात् त्रयस्तेषां तेज इव तेजो येषां ते त्रेताग्नितेजसः ॥ इतरे रामाद
न्ये त्रयो भरतादयोपि तद्योगात्तेषां योगात्पतिवत्नीषु भर्तृमतीषु जीवत्पतिकासु रक्षाति
मतीष्वित्यर्थः ॥ पतिवत्नी सभर्तृकामरः ॥ अंतर्वत्पतिवतोर्नुगिति ङीतिं कासु रक्षाति मती
ष्वित्यर्थः ॥ पतिवत्नी सभर्तृका इत्यमरः ॥ अंतर्वत्पतिवतोर्नुगिति ङीप् प्रत्ययो नुगाग
मश्च तासु पत्नीषु द्विसूनव आसन् ॥ द्वौ द्वौ सूनवो येषां ते द्विसूनव इति विग्रहः ॥

रघुवं.टी. क्वचित्त्वं ख्याशब्दस्य वृत्तिविषयेवीप्सार्थत्वं सप्तपर्णादिवत्॥३५॥ ॥शत्रुघातिनीति॥ पूर्वजो सर्ग१५
६ त्सुकोऽपि ज्येष्ठप्रियः शत्रुघ्नो बहुश्रुते शत्रुघातिनि सुबाहौ च तन्नामकयोः सून्वोः॥ मथुरां च
विदिशां च ते नगर्यौ निदधे निधापयत् इत्यर्थः॥३६॥ ॥भूय इति॥ ॥स शत्रुघ्नः॥ मैथिलीत
नययोः कुशलवयोरुत्गीतेन निस्पंदमग्रं गीतश्रियतया निश्चलहरिणं वाल्मीकेराश्रमं

शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते॥ मथुराविदिशे सून्वोर्निदधे पूर्वजोत्सु
कः॥३६॥ भूयस्तपोव्ययो मा भूद्वाल्मीकेरिति सोऽत्यगात्॥ मैथिलीतनयोद्गीतनिस्पंद
मृगमाश्रमं॥३७॥ वशी विवेश चायोध्यां रथ्यासंस्कारशोभिनीं॥ लवणस्य वधात्पौ
रैरधिगौरवमीक्षितः॥३८॥ भूयः पुनरपि तपोव्ययः संविधानकरणार्थं तपोहानिर्मा
भूदिति हेतोरत्यगात् अतिक्रम्य गत इत्यर्थः॥३७॥ ॥वशीति॥ ॥स लवणस्य वधाद्धेतोः राम
पौरैः जनैः अत्यंतं गौरवं यस्मिन्कर्मणि तत्तथा ईक्षितः सन् रथ्यासंस्कारैः स्तोरणादिभिः ६
शोभते या तां अयोध्यां विवेश॥३८॥

स इति॥ स शत्रुघ्नः स्वनामधेयसनामभिः सप्तर्षिरूपस्थितं सेवितं सीता॥ परित्यागात् भुवः असा
मान्यपतिं असाधारणपतिं रामं ददर्श॥३९॥ ॥तमिति॥ ॥अग्रजो रामः लवणस्यांतकं हंतारं प्र
णतं शत्रुघ्नं कालनेमिर्नाम राक्षसः तस्य वधात् प्रीतः तुरवेगं महते इति तुराषाट् इंद्रः॥ छंदसि स
ह इति ण्वि प्रत्ययः न्याय्या यामपि प्रयुज्यते अन्येषामपि दृश्यत इति दीर्घः॥ सहेः साडः स इति षत्वं
स ददर्श सभामध्ये सभासद्भिरुपस्थितं॥ रामं सीतापरित्यागादसामान्यपतिं भुवः॥३९॥
तमभ्यनंदत्प्रणतं लवणांतकमग्रजः॥ कालनेमिवधात्प्रीतस्तुराषाडिव शार्ङ्गिणं॥४॥
स पृष्टः सर्वतो वार्तमाख्यद्राज्ञे न संततिं॥ प्रत्यर्पयिष्यतः काले कवेराद्यस्य शासनात्॥ ॥४१॥
शार्ङ्गिणं उपेंद्रमिवाभ्यनंदत्॥४०॥ ॥स इति॥ ॥स शत्रुघ्नः पृष्टः सन् सर्वतः वा
र्तं कुशलं आख्यत् आख्यातवान्॥ ख्याते लुङ्॥ संततिं कुशलवोत्पत्तिं तु रामाय नाख्य
त्॥ कुतः काले अवसरे प्रत्यर्पयिष्यतः आद्यस्य कवेः वाल्मीकेः शासनात्॥४१॥ ॥

अथेति ॥ जनपदे भवः जानपदः तेन वो जानपदो विप्रः कश्चिदिति शेषः ॥ अप्राप्तयौवनं शिशुं मृतमि
ति शेषः ॥ नृपद्वारि तेन स्पद्वारि अंकशय्यास्थं यथा तथा ॥ अवतार्य अंकस्थत्वेनैव आवारोप्य चक्रं
दचुक्रोश ॥ ४२ ॥ शोचनीयेति ॥ हे वसुधे दशरथाच्च्युता या त्वं राममहस्तमनुप्राप्य कष्टात्क

अथ जानपदो विप्रः पुत्रमप्राप्तयौवनं ॥ अवतार्यंकिशय्यास्थं धारि चिक्रंद नृपतेः ॥ ४२ ॥
शोचनीयासि वसुधे या त्वं दशरथाच्च्युता ॥ रामहस्तमनुप्राप्य कष्टात्कष्टतरं गता ॥ ४३
श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघवः ॥ नत्यकालभवो मृत्युरिक्ष्वाकुपदमस्पृशा
त ॥ ४४ ॥

ष्टतरं गता सती शोचनीयासि ॥ ४३ ॥ श्रुत्वेति ॥ गोप्ता रक्षकः राघवः तस्य विप्रस्य शु
चः शोकस्य हेतुं पुत्रमरणरूपं श्रुत्वा जिह्राय लज्जितः ॥ कुतः हि यस्मादकालभवः मृ
त्युरिक्ष्वाकूणां पदं राष्ट्रं ॥ नास्पृशत् तद्धे जीवति पर्यायान्न म्रियते इत्यर्थः ॥ ४४ ॥

स इति ॥ स रामो दुःखितं द्विजं मुहूर्तं सहस्वेत्याश्वास्य वैवस्वतस्यान्तकस्य जिगीषया जेतुमिच्छया
कौवेरं यानं पुष्पकं सस्मार ॥ ४५ ॥ आत्तेति ॥ स रघूद्वहो राम आत्तशस्त्रः स्वन् तत्पुष्पकम
ध्यास्य प्रस्थितः ॥ अथ तस्य पुरः गूढरूपा सरस्वती अशरीरवागुच्चचार उद्भूव ॥ ४६ ॥ रा
जन्निति ॥ हे राजन् ते प्रजासु कश्चिदपचारो वर्णधर्मव्यतिकरः प्रवर्तते तमपचारमन्विष्य

स मुहूर्तं सहस्वेति द्विजमाश्वास्य दुःखितं ॥ यानं सस्मार कौवेरं वैवस्वतजिगीषया ॥ ४५ ॥
आत्तशस्त्रस्तदध्यास्य प्रस्थितश्च रघूद्वहः ॥ उच्चचार पुरस्तस्य गूढरूपा सरस्वती ॥ ४६ ॥
राजन्प्रजासु ते कश्चिदपचारः प्रवर्तते ॥ तमन्विष्य प्रशमयेर्भवितासि ततः कृती ॥ ४७ ॥
इत्याप्तवचनाद्रामो विनेष्यन्वर्णविक्रियां ॥ दिशः पपात पत्रेण वेगनिष्कंपकेतुना ॥ ४८ ॥

प्रशमयेः ततः कृती कृतकृत्यो भवितासि भविष्यसि ॥ ४७ ॥ इतीति ॥ इत्याप्तवचनाद्रामो
वर्णविक्रियां वर्णापचारं विनेष्यन् अपनेष्यन् वेगेन निःकंपकेतुना पत्रेण वाहनेन पु
ष्पकेण ॥ पत्रं वाहनपक्षयोरित्यमरः ॥ दिशः पपात धावति स्म ॥ ४८ ॥

अथेति॥ ॥अथैक्ष्वाकुवंशोद्भवः ऐक्ष्वाको रामः॥ कोपधादित्यणि कृते दांडिनायनेत्यादिना
उकारलोपो निपातः॥ धूमेन पीयमानेनाभिताम्रे वृक्षशाखावलंबिनमधोमुखं तपस्यंतं तपश्च
रंतं कंचित्पुरुषं ददर्श॥४९॥ ॥पृष्टेति॥ ॥राज्ञा नाम च अन्वयश्च पृष्टौ नामान्वयौ यस्य सत
थोक्तः॥ धूमं पिबतीति धूमपः॥ सुपीति योगविभागात्कप्रत्ययः॥ स पुरुषः आत्मानं सुरपदा

अथ धूमाभिताम्राक्षं वृक्षशाखावलंबिनं॥ ददर्श किंचिदिक्ष्वाकुस्तपस्यंतमधोमुखं॥
४९॥ पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः॥ आत्मानं शंबुकं नाम शूद्रं सुरपदार्थिनं॥
५०॥ तपस्यनधिकारित्वात्प्रजानां तमघावहं॥ शीर्षच्छेद्यं परिज्ञाय नियंता शस्त्रमाददे॥५१॥

र्थिनं स्वर्गार्थिनं॥ अनेन प्रयोजनमपि पृष्टमिति ज्ञेयं॥ शंबुकं नाम शूद्रं आचष्ट बभाषे॥५०॥
तपसीति॥ ॥तपस्यनधिकारित्वात्प्रजानामघावहं दुःखावहं तं शूद्रं शीर्षच्छेद्यं॥ शीर्षच्छे
दाच्चेति यत्प्रत्ययः॥ परिच्छिद्य निश्चित्य नियंता रक्षको रामः शस्त्रमाददे जग्राह॥५१॥ ॥

स इति॥ ॥स रामः ज्योतिष्कणैः स्फुलिंगैराहतानि दग्धानि श्मश्रूणि यस्य तत्तस्य वक्त्रं हिमक्लि
ष्टकिंजल्कं पंकजमिव कंठ एव नालं तस्मादपातयत्॥५२॥ ॥कृतेति॥ ॥शूद्रः शंबुकः राज्ञा
स्वयं कृतदंडः कृतशिक्षः सन् सतां गतिं दुश्चरेणापि स्वमार्गविलंघिनाऽधिकारदुष्टेनत

स तद्वक्त्रं हिमक्लिष्टकिंजल्कामिव पंकजं॥ ज्योतिःकणाहतश्मश्रु कंठनालादपातयत्॥
५२॥ कृतदंडः स्वयं राज्ञा लेभे शूद्रः सतां गतिं॥ तपसा दुश्चरेणापि न स्वमार्गविलंघिना॥
५३॥ रघुनाथोऽप्यगस्त्येन मार्गसंदर्शितात्मना॥ महौजसा संयुयुजे शरत्काल इवेंदुना॥
॥५४॥

पः॥ तपसा न लेभे॥ अत्र मनुः॥ राजभिः कृतदंडास्तु कृत्वा पापानि मानवाः॥ निर्मलाः स्वर्ग
मायांति संतः सुकृतिनो यथेति॥५३॥ ॥रघुनाथेति॥ ॥रघुनाथोऽपि मार्गसंदर्शितात्मना
गस्त्येन इंदुना शरत्काल इव संयुयुजे संगतः॥ इंदावपि विशेषणं योज्यं॥५४॥ ॥

कुंभेति॥ ॥कुंभयोनिरगस्त्यः॥ पीतेन समुद्रेण तद्विःक्रयमिवात्ममोचनमूल्यमिव दत्तं॥ अत एव
परिग्रहत्यात इति सुल्यमाद्दिव्यपरिग्रहो दिव्यानां परिग्राह्य इत्यर्थः॥ तमलंकारं तस्मै रामाय ददौ
५५॥ ॥तमिति॥ ॥मैथिलीकंठनिर्व्यापारेण बाहुना तमलंकारं दधत् रामः पश्चात् निवर्तते

कुंभयोनिरलंकारं तस्मै दिव्यपरिग्रहं॥ ददौ दत्तं समुद्रेण पीतेनेवात्मनिःक्रयं॥ ५५॥
तं दधन्मैथिलीकंठनिर्व्यापारेण बाहुना॥ पश्चान्निववृते रामः प्राक् परासुर्द्विजात्मजः॥
५६॥ तस्य पूर्वोदितां निंदां द्विजः पुत्रः समागतः॥ स्तुत्या निवर्तयामास त्रातुर्वैवस्वतादपि॥ ५७

निवृत्तः परासुर्मृतो द्विजात्मजः प्राक् रामात् प्रथममिव निववृते॥ ५६॥ ॥तस्येति॥ ॥पुत्रसमा
गतः पुत्रेण संगतः द्विजः वैवस्वतादंतकात् अपि त्रातुः रक्षकस्य॥ भीत्रार्थानां भयहेतुरिति
अपादानात्पंचमी॥ तस्य रामस्य पूर्वोदितां पूर्वोक्तां निंदां स्तुत्या निवर्तयामास॥ ५७॥ ॥

तमिति॥ ॥अध्वराय अश्वमेधाय मुक्ताश्वं तं रामं रक्षः कपिनरेश्वराः सुग्रीवविभीषणादयो रा
जानश्च मेघाः अंभोभिः सस्यमिव उपायनैः सम्यग्वर्षन्॥ ५८॥ ॥दिग्भ्य इति॥ ॥निमंत्रिताः आहू
ताः महर्षयश्च नभस्याः संबंधीनि भौमानि धिष्ण्यानि स्थानानि एव न अधिष्ण्यं स्थानेगृहे नेऽग्रावि

तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः॥ मेघाः सस्यमिवांभोभिरभ्यवर्षन्नुपायनैः॥ ५८
दिग्भ्यो निमंत्रिताश्चैनमभिजग्मुर्महर्षयः॥ न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्य
पि॥ ५९॥ उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ॥ अयोध्या सृष्टलोकेव सद्यः पैता
महीतनुः॥ ६०॥

त्यमरः॥ किंतु ज्योतिर्मयानि नक्षत्ररूपाणि धिष्ण्यान्यपि हित्वा दिग्भ्यो रा
मं रामम् अभिजग्मुः॥ ५९॥ उपेति॥ ॥चत्वारि द्वाराण्येव मुखानि यस्याः सा अयोध्या उपश
ल्येषु ग्रामांतेषु निविष्टैः॥ ग्रामांतमुपशल्यं स्यादित्यमरः॥ तैर्महर्षिभिः सद्यः सृष्टलो
का पैतामहस्येयं पैतामही तनुर्मूर्तिरिव बभौ॥ ६०॥ ॥

आद्य इति॥ ॥वैदेह्यास्त्यागोपि आद्यो वर्ण्य एवकृतः यद्यस्मात् प्राग्वंशः प्राचीनस्थूणो यज्ञगृ
हविशेषः॥ तद्वासिनः नास्ति अन्या जाया यस्य तस्यानन्यजानेः॥ जायाया निङिति समासांतो
निङादेशः॥ पत्युः रामस्य हिरण्मयी सौवर्णी॥ दांडिनायनादिसूत्रेण निपातः॥ सा निजैव

आद्यस्यागोपि वैदेह्याः पत्युः प्राग्वंशवासिनः॥ अनन्यजानेस्सैवासीद्यस्माज्जाया हिरण्म
यी॥ ६१॥ विधेरधिकसंभारस्ततः प्रववृते मखः॥ आसन्यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः
॥ ६२॥

जाया पत्नी आसीत्॥ कविनाक्यमेतत्॥ ६१॥ ॥विधेरिति॥ ॥ततो विधेः शास्त्राद् अधि
कसंभारोऽतिरिच्यमानपरिकरो मखः प्रववृते प्रवृत्तः॥ यत्र मखे यज्ञे विहन्यंत एभिरिति
विघ्नाः प्रत्यूहाः॥ घञर्थे कविधानमिति कप्रत्ययः॥ अत्र कर्तृत्वलक्षणायाः क्रियायाः
विघ्ना अनुष्ठानविघातकाः राक्षसा एव रक्षिणो रक्षकाः आसन्॥ ६२॥ १२

अथेति॥ ॥अथ मैथिलेयौ मैथिलीतनयौ॥ स्त्रीभ्यो ढक्॥ कुशलवौ गुरुणा वाल्मीकि
ना नोदितौ प्रेरितौ॥ प्राचेतसो वाल्मीकिः उपज्ञायत इत्युपज्ञा॥ आतश्चोपसर्ग इति कर्मण्य
ङ् प्रत्ययः॥ प्राचेतसस्य उपज्ञा प्राचेतसोपज्ञं प्राचेतसेनादौ ज्ञातमित्यर्थः॥ रामस्यायनं च
रितं रामायणं रामायणाख्यं काव्यं पूर्वपदात्संज्ञायामग इति णत्वं॥ उत्तरायणवत्॥ इत

अथ प्राचेतसोपज्ञं रामायणमितस्ततः॥ मैथिलेयौ कुशलवौ जग
तुर्गुरुनोदितौ॥ ६३॥ वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किंनरस्व
रौ॥ किं तद्येन मनो हर्तुमलं स्यातां न शृण्वतां॥ ६४॥ ॥

स्ततो जगतुः॥ गायतेर्लिट्॥ ६३॥ ॥वृत्तमिति॥ ॥रामस्य वृत्तं वर्ण्यं वस्त्विति शेषः॥ वा
ल्मीकेः कृतिः काव्यं गेयमिति शेषः॥ तौ कुशलवौ किंनरस्वरौ किंनरकंठौ गायकौ
पुनरिति शेषः॥ अत एव तत् किं येन निमित्तेन तौ शृण्वतां मनो हर्तुं अलं शक्तौ न स्यातां स
र्वं सरसमित्यर्थः॥ ६४॥ ॥

रूपमिति॥ ॥तेजाने ताततज्ज्ञाः तत्रैरचितैः॥रूपगीतं तैरित्यर्थः॥निवेदितं तयोः कुशलवयोः रूपेङ्गि
ताकारे गीते च माधुर्यं रामं ज्ञापकं रामः कुतूहली सानंदः सन् यथा संस्यं त द्ददर्श सानुजः॥६५॥ ॥तद्गीति
तयोर्गीतिश्रवणे एकाग्रा आसक्ता अश्रुमुखी आनंदादिति भावः॥ संसत्सभा प्रातर्हिमनिस्यंदिनी नि
वाता रहिता वनस्थली वनस्थलीव शुशुभे॥ आनंदपारवश्यान्निष्पंदमासेत्यर्थः॥६६॥ ॥वयस इति।

रूपेङ्गिते च माधुर्यं तयोस्तज्ज्ञैर्निवेदितं॥ ददर्श सानुजो रामः शुश्राव च कुतूहली॥६५॥
तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ॥ हिमनिष्यंदिनी प्रातर्निर्वातेव वनस्थली॥६६॥
वयोवेषविसंवादि रामस्य च तयोस्तदा॥ जनता प्रेक्ष्य सादृश्यं नाक्षिकंपं व्यतिष्ठत॥६७॥

जनता जनानां समूहो ग्रामजनेत्यादिना तल्प्रत्ययः॥ वयोवेषाभ्यामेव विसंवादि विलक्षणं
तदा तयोः कुशलवयोः रामस्य च सादृश्यं प्रेक्ष्य नास्त्यक्षिकंपो यस्यां॥ नञर्थस्य नशब्दस्य
बहुव्रीहिः व्यतिष्ठत अतिष्ठत॥ समवप्रविभ्यः स्थ इत्यात्मनेपदं विस्मयादनिमिषमतिष्ठ
दित्यर्थः॥६७

उभयोरिति॥ ॥लोको जनः उभयोः कुमारयोः प्रवीण्येन नैपुण्येन न तथा न विसिस्मिये न विस्मि
तवान्॥ यथा नृपतेः प्रीतिदानेषु वीतस्पृहतया वीता गता स्पृहा यस्य तस्य भावो वीतस्पृहता तया निःस्पृ
हत्वेन विसिस्मिये॥६८॥ ॥गेय इति॥ ॥गेये को न्वनयोर्विनेता वामिति चापाठः॥ गेये विषये को नु वां युवा
युवयोर्विनेता शिक्षकः॥ नुशब्दः प्रश्ने नु प्रच्छायां वितर्के इत्यमरः॥ इयं च कस्य कवेः कृतिरि

उभयोर्न तथा लोकः प्रावीण्येन विसिस्मिये॥ नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा॥६८॥
गेये केन विनीतौ वां कस्य चेयं कवेः कृतिः॥ इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसतां॥६९॥
अथ सावरजो रामः प्राचेतसमुपेयिवान्॥ ऊरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत्॥७०॥
ति राज्ञा स्वयं पृष्टौ तौ कुशलवौ वाल्मीकिमशंसतां उक्तवंतौ विनेतारं कविं चेत्यर्थः॥६९॥
अथेति॥ ॥अथ सावरजो रामः प्राचेतसं वाल्मीकिमुपेयिवान् प्राप्तः सन् देहमात्मानं उ
रीकृत्य आत्मानं स्थापयित्वेत्यर्थः॥ राज्यमस्मै प्राचेतसायान्यवेदितवान् समर्पितवान्॥
॥७०॥

 सइति।। ।।करुणाप्रयोजनमस्य कारुणिको दयालुः।। प्रयोजनमितिठक्।। स्याद्दयालुः कारुणि
कइत्यमरः।। सकविः रामायतो मैथिलेयौ तदात्मजौ रामसुतावाख्याय सीतायाः तं परिग्रहं स्वी
कारं चकमयाचे।।७१।। ।।तातेति।। हे तात ते स्नुषा सीता नोस्माकं अक्ष्णोः समीपे समक्षं।।मारक्तत्ति
त्वात्समासांतोऽच्प्रत्ययः।। जातवेदसि वह्नौ विशुद्धा नोस्माकं अविश्वास इत्यर्थः।। किंतु रक्षसः रा

स तावाख्याय रामस्य मैथिलेयौ तदात्मजौ।। मुनिः कारुणिको वव्रे सीतायाः संपरिग्रहं।।७
१।। तदाकर्ण्य वचस्तस्य रामो राजीवलोचनः।। समं हर्षविषादाभ्यां युक्तं स प्रोक्तवान्मुनिं।।७२।।
तात शुद्धा समक्षं नः स्नुषा ते जातवेदसि।। दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः।।७३।।
ताः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली।। ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया।।७४।।

वणस्य दौरात्म्यादत्रत्याः प्रजास्तां न श्रद्दधुः न विश्वसंति।।७२।। ।।ता इति।। मैथिली स्वचारित्र
मुद्दिश्य ताः प्रजाः प्रत्याययतु विश्वासयतु विश्वासस्य बुधिरूपत्वात्।। णौगमिरबोधने इति इ
णो गम्यादेशो नास्ति।। ततोनंतरं पुत्रवतीमेनां सीतां त्वदाज्ञया प्रतिपत्स्ये स्वीकरिष्ये।।७३।।

इतीति।। ।।राज्ञा प्रतिश्रुते प्रतिज्ञाते सति मुनिराश्रमात् जानकीं शिष्यैः प्रयोज्यैः स्वसिद्धिं स्वार्थसिद्धिं
नियमैः स्वपो निरिव आनाययामास।।७४।। ।।अन्येद्युरिति।। अथ काकुत्स्थो रामः अन्येद्यु
रन्यस्मिन्नहनि प्रस्तुतप्रतिपत्तये प्रकृतकार्यानुसंधानाय पुरौकसः पौरान् संनिपात्य मे

इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः।। शिष्यैरानाययामास स्वसिद्धिं नियमैरि
व।।७४।। अन्येद्युरथ काकुत्स्थः सन्निपात्य पुरौकसः।। कविमाह्वाययामास प्रस्तु
तप्रतिपत्तये।।७५।। स्वरसंस्कारवत्यासौ पुत्राभ्यां सह सीतया।। ऋचेवोदर्चिषं सूर्यं रा
मं मुनिरुपस्थितः।।७६।। कें आयित्वा कविं वाल्मीकिमाह्वाययामास आकारयामास।।
७५।। स्वरेति।। ।।अथ स्वर उदात्तादिः संस्कारः शब्दशुद्धिः।। तद्वत्या ऋचा सावित्र्या उद
र्चिषं सूर्यमिव पुत्राभ्यामुपलक्षितया सीतया करणेन उदर्चिषं रामं मुनिरुपस्थित उ
पतस्थे।।७६।। ।।

काषायेति॥ ॥काषायेण रक्तं काषायं॥ तेन रक्तं रागादित्यण्प्रत्ययः॥ तेन परिवीतेन संहृतेन
स्वपदार्पितचक्षुषा शांतेन प्रसन्नेन वपुषैव सा सा सीता शुद्धा साध्वीत्यन्वमीयतानुमिता॥ ७७॥
जना इति॥ ॥तस्याः सीतायाः कर्मण आलोकपथाद्दर्शनमार्गात्प्रतिसंहृतचक्षुषः निवर्त्तित

काषायपरिवीतेन स्वपदर्पितचक्षुषा॥ अन्वमीयत शुद्धेति शांतेन वपुषैव सा॥ ७७॥
जनास्तदालोकपथात्प्रतिसंहृतचक्षुषः॥ तस्थुरधोमुखाः सर्वे फलिता इव शालयः
७८॥ तां दृष्टिविषये भर्तुर्मुनिरास्थितविष्टरः॥ कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशा
त्॥ ७९॥

हस्वपः सर्वे जनाः फलिताः शालय इवाधोमुखाः नम्रमुखाः तस्थुः॥ ७८॥ ॥ता
मिति॥ ॥आस्थितविष्टरः॥ अधिष्ठितासनः मुनिः हे वत्से भर्तुः दृष्टिविषये समक्षं स्ववृ
त्ते स्वचरित्रे विषये लोकं निःसंशयं कुर्विति तां सीतां अशात् शास्ति स्म॥ ७९॥ ॥

अथेति॥ ॥अथ वाल्मीकिशिष्येणावर्जितं दत्तं पुण्यं पयः आचम्य सीता सत्यां सरस्वतीं वाच
मुदीरयामास उच्चारयामास॥ ८०॥ ॥वाङ्मनस इति॥ ॥वाङ्मनःकायैः पत्यौ विषये व्यभि
चारः स्खलनं त्रितयेन यथा नास्ति यदि तर्हि विश्वंभरे विश्वं बिभर्तीति विश्वंभरा भूमिः संज्ञायां भृतॄवृजि

अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः॥ आचम्योदीरयामास सीता सत्यां सर
स्वतीं॥ ८०॥ वाङ्मनःकर्मभिः पत्यौ व्यभिचारो यथा न मे॥ तथा विश्वंभरे देवि मामंतर्धा
तुमर्हसि॥ ८१॥ एवमुक्ते तया साध्व्या रंध्रात्सद्यो भवाद्भुवः॥ शातह्रदमिव ज्योतिः प्रभा
मंडलमुद्ययौ॥ ८२॥

त्यादिना खच्प्रत्ययः॥ अरुर्द्विषेत्यादिना मुमागमः॥ हे विश्वं
भरे देवि मामंतर्धातुं गर्भे वासयितुमर्हसि॥ ८१॥ ॥एवमिति॥ ॥साध्व्या पतिव्रतया
तया सीतया एवमुक्ते सति सद्यो भवात् भुवः रंध्रात् शातह्रदं वैद्युतं ज्योतिरिव प्रभा
मंडलमुद्ययौ॥ ८२॥ ॥

तत्रेति ॥ ॥ तत्र प्रभामंडले नागफणोत्क्षिप्ते सिंहासने निषेदुषी आसीना समुद्ररशना समुद्र
मेखला सा क्षमा सद्यस्तिरोधापयतीति वसुधरा भूमिः ॥ स्वचिह्नस्व इति रूपः प्रादुरासीत् ॥ ८३ ॥
सेति ॥ सा वसुंधरा भर्तरि प्रहितेक्षणां दत्तदृष्टिं सीतामंकमारोप्य तस्मिन् भर्तरि रामे मम
मेति सामाहरेति व्याहरति वदत्येव व्याहरंतमनादृत्येत्यर्थः ॥ पश्चाच्चानादरम्

तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी ॥ समुद्ररशना साक्षात्प्रादुरासीद्वसुंध
रा ॥ ८३ ॥ सा सीतामंकमारोप्य भर्तरि प्रहितेक्षणां ॥ मा मेति व्याहरत्येव तस्मिन्पाता
लमभ्यगात् ॥ ८४ ॥ धरायां तस्य संरंभं सीताप्रत्यर्पणैषिणः ॥ गुरुर्विधिबलापेक्षी
शमयामास धन्विनः ॥ ८५ ॥ तिसमभ्यगात् ॥ ८४ ॥ ॥ धरायामिति ॥ सी
ताप्रत्यर्पणं इच्छतीति तथोक्तस्य धन्विनः आत्तधनुषः तस्य रामस्य धरायां विषये संरंभं
विधिबलापेक्षी वतत्राक्ति दर्शी गुरुर्ब्रह्मा शमयामास अवरूपयामासेति भावः ॥ ८५ ॥

ऋषीनिति ॥ ॥ रामो यज्ञांते पुरस्कृतान् ऋषीन् सुहृदश्च विसृज्य सीतागतं स्नेहं तदपत्ययोः कुश
लवयोर्निदधे ॥ ८६ ॥ ॥ युधाजित इति ॥ ॥ किंच धृतप्रजः स रामः युधाजितस्य भरतमातुलस्य सं
देशात् सिंधुनामकं देशं दत्तप्रभावाय दत्तैश्वर्याय पि रामेणेति शेषः भरताय ददौ ॥ ८७ ॥ ॥ भरत

ऋषीन्विसृज्य यज्ञांते सुहृदश्च पुरस्कृतान् ॥ रामः सीतागतं स्नेहं निदधे तदपत्य
योः ॥ ८६ ॥ युधाजितस्य संदेशात्स देशं सिंधुनामकं ॥ ददौ दत्तप्रभावाय भरताय
धृतप्रजः ॥ ८७ ॥ भरतस्तत्र गंधर्वान्युधि निर्जित्य केवलं ॥ आतोद्यं ग्राहयामास
समत्याजयदायुधं ॥ ८८ ॥ स तक्षपुष्कलौ पुत्रौ राजधान्योस्तदाख्ययोः ॥ ॥

इति ॥ ॥ भरतोपि युधि गंधर्वान्निर्जित्य केवलमातोद्यं ग्राहयामास आयुधं समत्याजय
त् त्याजितवान् ॥ अहिंस्य जोर्पतस्यापि बुद्धिं कर्मकत्वं नित्यमित्यनुसंधेयं ॥ ८८ ॥ ॥ स इति ॥
स भरतो अभिषिक्ताहेंति तक्षपुष्कलौ नाम पुत्रौ तदाख्ययोस्तक्षपुष्कलाख्ययोरित्यर्थः ॥ ॥

रघुवं· टी· पुष्कलं पुष्कलवत्यां तक्षं तक्षशिलायां इति राजधान्योर्नगर्योरभिषिच्य पुनः रामांतिकमगात्॥ सर्ग·१५
१७ ८९॥ ॥अंगदमिति॥ ॥लक्ष्मणोपि रघुनाथस्य रामस्य शासनात् अंगदं चंद्रकेतुं च तदाख्यौ आ
त्मसंभवौ पुत्रौ कारापथोनाम देशस्तस्येश्वरौ चक्रे॥९०॥ ॥इत्यारोपितपुत्रास्ते जनेश्वराः रामा

अभिषिच्याभिषेकार्हौ रामांतिकमगात्पुनः॥८९॥अंगदं चंद्रकेतुं च लक्ष्मणोप्यात्म
संभवौ॥शासनाद्रघुनाथस्य चक्रे कारापथेश्वरौ॥९०॥इत्यारोपितपुत्रा
स्ते जननीनां जनेश्वराः॥भर्तृलोकप्रपन्नानां निवापान्विदधुः क्रमात्॥९१॥
उपेत्य मुनिवेषेण कालः प्रोवाच राघवं॥रहःसंवादिनौ पश्येदावां यस्तं त्यजेरिति
॥९२॥

दयो भर्तृलोकप्रपन्नानां स्वर्यातानां जननीनां निवापान् श्राद्धादीन् विदधुः चक्रुः॥९१॥ राम·
उपेत्येति॥ ॥अथ कालः अंतकः मुनिवेषः सन् उपेत्य राघवं प्रोवाच किमिति रहस्येकांते सं १७
वादिनौ संभाषिणौ आवां यः पश्येत् रहस्यभंगं कुर्यादित्यर्थः तं त्यजेरिति॥९२॥ ॥

तथेति॥ ॥स कालः तथेति प्रतिपन्नाय रामाय विवृतात्मा प्रकाशितनिजस्वरूपः सन् परमेष्ठिनः ब्र
ह्मणः शासनात् दिवमध्यास्वेत्याचख्यौ॥९३॥ ॥विद्वानिति॥ ॥द्वास्थो द्वारि नियुक्तो लक्ष्मणो वि
द्वानपि पूर्वश्लोकोक्तं जानन्नपि रामसंदर्शनार्थिनो दुर्वाससो मुनेः शापाद्भीतः सन् तयोः का

तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः॥आचख्यौ दिवमध्यास्व शासनात्परमेष्ठिनः॥९३॥
विद्वानपि तयोर्द्वास्थः समयं लक्ष्मणोभिनत्॥भीतो दुर्वाससः शापाद्रामसंदर्शनार्थिनः॥९४॥
गच्छ लक्ष्मण शीघ्रं त्वं मा भूद्धर्मविपर्ययः॥त्यागो वापि वधो वापि साधूनामुभयं समं॥९५॥
सगत्वा सरयूतीरं देहत्यागेन योगवित्॥चकारावितथां भ्रातुः प्रतिज्ञां पूर्वजन्मनः॥९५॥
तस्मिन्नात्मचतुर्भागे प्राक्नाकमधितस्थुषि॥ लरामयोः समयं संवादमभिनत् बिभेद॥९४॥
सगत्विति॥ ॥योगवित् योगमार्गवेदी स लक्ष्मणः सरयूतीरं गत्वा देहत्यागेन पूर्वजन्मनो भ्रा
तुः प्रतिज्ञामवितथां सत्यां चकार॥९५॥ तस्मिन्निति॥ ॥चतुर्थो भागश्चतुर्भागः॥ संख्याशब्दस्य
वृत्तिविषये पूरणार्थत्वं शतांशवत्॥ आत्मचतुर्भागे तस्मिन् लक्ष्मणे प्राक् नाकमधितस्थु
षि

सति राघवः रामः भुवि त्रिपाद्धर्म इव ॥ शिथिलमलसं यथा तथा तस्थौ पादविकलो हि शिथिलं तिष्ठतीति भावः ॥ त्रेतायां धर्मस्त्रिपादित्याहुः ॥ पादस्तु तुर्यांशे ॥ अंघ्रिश्च यथा तथा दाश्च तुर्यांशे इत्यमरः ॥ त्रयः पादा यस्य सोऽस्त्रिपात् ॥ संख्यासुपूर्वस्येत्यकारलोपः समासान्तः ॥९६॥ स इति ॥ ॥ उदगिति ॥ ॥ स्थिरधीः स रामो रिपवः एव नागाः तेषां अंकुशं कुशं कुशावत्यां पुर्यां निवेश्य स्थाप

राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव ॥९६॥ स निवेश्य कुशावत्यां रिपुनागांकुशं कुशं ॥ शरावत्यां च सतां सूक्तैर्जनिताश्रुलवं लवं ॥९७॥ उदक्प्रतस्थे स्थिरधीः सानुजोऽग्निपुरः सरः ॥ अन्वितः पतिवात्सल्याद्गृहवर्जमयोध्यया ॥९८॥ यित्वा सूक्तैः सतां जनिताश्रु

लवाः अश्रुलेशा येन तं लवं लवाख्यं पुत्रं लवो लेशो विलासे च छेदने राममन्दने इति विश्वः ॥ शरावत्यां पुर्यां शरादीनां चेति शारकत्वाद्दीर्घः ॥ निवेश्य सानुजोऽग्निपुरस्सरः सन् पत्योर्भर्तरि वात्सल्यात् दत्त रागात् गृहान् वर्जयित्वा इति गृहवर्जं द्वितीयांचेति णमुल् प्रत्ययः अपंच विदपरीप्सायामपीष्यते अनुदात्तपदमेकवर्जमित्येकशेषेत पाठान्नतत्वात्सरीसात

गाधिलिखितोऽस्तुगतः उदक्प्रतस्थे ॥९७॥

जगृहुरिति ॥ ॥ चित्तज्ञाः हरिराक्षसाः कदम्बमुकुलस्थूलैः प्रजाश्रुभिः अभिवृष्टां तस्य रामस्य पदवीं जगृहुः ॥ तेपि अनुजग्मुरित्यर्थः ॥९९॥ ॥ उपेति ॥ ॥ उपस्थितं प्राप्तं विमानं यस्य तेन भक्तान्नुकम्पत इति भक्तानुकम्पिना तेन रामेण अनुयायिनां सरयूस्त्रिदिवनिःश्रेणिः स्वर्गाधि

जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः ॥ कदंबमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः ॥९९॥ उपस्थितविमानेन तेन भक्तानुकंपिना ॥ चक्रे त्रिदिवनिश्रेणी सरयूरनुयायिनां ॥१००॥ यद्गोप्रतरकल्पोऽभूत्संमर्दस्तत्र मज्जतां ॥ अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ॥१०१॥

रोहिणी चक्रे ॥ निःश्रेणिस्त्वधिरोहिणीत्यमरः ॥१००॥ यदिति ॥ ॥ यस्मात्तत्र सरय्वां मज्जतां सः संमर्दः गोप्रतरो गोप्रतरणं तत्कल्पोऽभूत् ॥ अतस्तदाख्यया पावनं शोधकं तीर्थं भुवि पप्रथे विख्यातमभूत् ॥१०१॥ ॥

म इति॥ ॥ विभुः प्रभुः स रामः विबुधानां अंशेषु सुग्रीवादिषु प्रतिपन्नात्ममूर्तिषु सत्सु त्रिदशीभूता
देवभूयं गता ये पौरास्तेषां भूतानां सुराणां स्वर्गान्तरमकल्पयत्॥ १॥ ॥ निवर्त्येति॥ ॥ विष्व
क्सेनो विष्णुरेवं सुराणां दशमुखशिरश्छेदकार्यं निर्वर्त्य निःपाद्य लंकानाथं विभीषणं

स विभुर्विबुधांशेषु प्रतिपन्नात्ममूर्तिषु॥ त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत्
१०१॥ निर्वर्त्यैवं दशमुखशिरश्छेदकार्यं सुराणां विष्वक्सेनः स्वतनुमविशत्सर्वलोकप्र
तिष्ठां॥ लंकानाथं पवनतनयं चोभयं स्थापयित्वा कीर्तिस्तंभद्वयमिव गिरौ दक्षिणे चोत्तरे
च॥ १०२॥

पवनतनयं हनुमन्तं चोभयं कीर्तिस्तंभद्वयमिव दक्षिणे गिरौ त्रिकूटे उत्तरे
गिरौ हिमवति स्थापयित्वा सर्वलोकप्रतिष्ठां सर्वलोकाश्रयभूतां स्वतनुं स्वमूर्तिम राम॰ १९
विशत्॥ १०२॥ ॥

इति श्रीपदवाक्यप्रमाणपारावारीण श्रीमहोपाध्याय कोलचलमल्लिनाथसूरिविर
चितायां रघुवंशटीकायां संजीविनीसमाख्यायां रामस्वर्गारोहणं नाम पंचदशः

इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ
सीतापातालप्रवेशो नाम पंचदशः सर्गः॥ १५॥ ॥

सर्गः॥ १५॥ ॥ ॥ श्रीरामचंद्राय नमः॥ ॥ श्रीगोपीजनवल्लभाय नमः॥

श्रीगणेशाय नमः ॥ ॥ वृंदारकायस्य भवंति भृंगा मंदाकिनी यन्मकरंदबिंदुः ॥ तवारविंदाक्षपदारविं
दं वंदे चतुर्वर्गचतुष्पदं तत् ॥ १ ॥ अथेति ॥ ॥ अथ रामनिर्याणानंतरं इतरे लवादयः सप्त रघु
प्रवीराः ॥ यतश्च निर्धारणमिति षष्ठीसमासनिषेधः ॥ पुरः पूर्वं जन्म यस्य तस्य भावस्तत्तात

श्रीगणेशाय नमः ॥ ॥ अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया
गुणैश्च ॥ चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां हि कुलानुसारि ॥ १ ॥

या गुणैश्च ज्येष्ठं कुशं रत्नविशेषभाजं तत्र तत्र श्रेष्ठवस्तुभागिनं चक्रुः ॥ तदुक्तं जातौ जा
तौ यदुत्कृष्टं तद्रत्नमभिधीयत इति ॥ तथाहि ॥ सुभ्रातॄणां भावः सौभ्रात्रं ॥ हायनांते
त्यादिना युवादित्वादण्प्रत्ययः ॥ तेषां कुशलवादीनां कुलानुसारि वंशानुगतं
हि ॥ १ ॥ ॥

त इति ॥ ॥ सेतुर्जलबंधः वार्ता कृषिगोरक्षणादि वार्ता कृष्यादुदंतयोरिति विश्वः ॥ गजबंधः आकरेभ्यो गज
ग्रहणं ते मुख्यं प्रधानं येषां तैः खंध्यैः सफलैः कर्मभिः अस्तुच्छिता अतिसमर्था अपीत्यर्थः ॥ ते कुशा
दयः प्रविभज्यंते इति प्रविभागाः ॥ अन्योन्यदेशप्रविभागानां या सीमा तां वेलां समुद्रा इव नात्य
तीयुः ॥ नातिचक्रमुः ॥ अत्र कामंदकः ॥ कृषिर्वणिक्पथो दुर्गं सेतुः कुंजरबंधनं ॥ खन्या

ते सेतुवार्तागजबंधमुख्यैरभ्युच्छ्रिताः कर्मभिरप्यवंध्यैः ॥ अन्योन्यदेशप्रविभागसीमां वेलां
समुद्रा इव न व्यतीयुः ॥ २ ॥ चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानां ॥ ॥

करवब्यादानं शून्यानां च निवेशनं ॥ अष्टवर्गमिमं साधुः सुसंवृद्धोपि वर्धयेदिति ॥ २ ॥ ॥
चतुर्भुजेति ॥ ॥ चतुर्भुजो विष्णुस्तस्यांशाः रामादयस्ते प्रभवाः कारणानि यस्य सः तथोक्तः ॥
दानं नैत्यागो मदश्च दानं गजमदे त्यागे इति विश्वः ॥ प्रवृत्तिर्व्यापारः प्रवाहश्च दानप्रवृत्तेरनु
पारतानां कुशलवादीनां स वंशः सामयोनिः सामवेदप्रभवो दानप्रवृत्तेरनुपारतानां

सुरद्विपानां दिग्गजानां वंश इव अष्टधा भिन्नः सन्विप्रसृसारविस्तृतो भूत्॥ सामयोनिरि
त्यत्र पाजकाव्यः॥ स्रूपस्सांडकपाले द्वे समानीय प्रजापतिः॥ हस्ती भ्यां परिगृह्याथ सप्त
साम्नान्यगायत॥ गायतो ब्रह्मणस्तस्मात्समुत्पेतुर्मतंगजा इति॥ ३॥ ॥अथेति॥ ॥अ
थ अर्धे अर्धरात्रेः अर्धरात्रः॥ अर्धं नपुंसकमित्येकदेश समासः॥ अहःसर्वैकदेशेत्या

सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः॥ ३॥ अथार्धरात्रे स्तिमितप्र
दीपे शय्यागृहे सुप्तजने प्रबुधः॥ कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वां वनितामप
श्यत्॥ ४॥

दिना समासांतोऽच्प्रत्ययः॥ रात्राह्नाहाः पुंसीति नियमात्पुंल्लिंगत्वं॥ तस्मि
न्नर्धरात्रे निशीथे स्तिमितप्रदीपे सुप्तजने शय्यागृहे प्रबुधः॥ न तु प्रसुप्तः कुशः प्र
वासस्थकलत्रवेषां प्रोषितभर्तृकावेषां॥ अदृष्टपूर्वमित्यदृष्टपूर्वां तां सुप्सुपेति स
मासः॥ वनितामपश्यत्॥ ४॥ ॥

सेति॥ ॥सा वनिता साधुसाधारणपार्थिवर्द्धेः सज्जनसाधारणराज्यश्रियः॥ पुरुहूतभासः
इंद्रतेजसः॥ परेषां शत्रूणां जेतुः बंधुमतः तस्य कुशस्य पुरस्तात् स्थित्वा जयशब्दपूर्वं य
था तथा अंजलिं बबंध॥ ५॥ ॥अथेति॥ ॥अथ स विस्मयः पूर्वार्धेन शरीर पूर्वभागेन विसृष्ट

सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभासः॥ जेतुः परेषां जयशब्दपूर्वं
तस्यांजलिं बंधुमतो बबंध॥ ५॥ अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्र
विष्टां॥ स विस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः॥ ६॥ लब्धांत
रा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते॥

तल्पः तत्कुशस्योदाशरथेस्तनूजः कुशः
अनपोढार्गलमनुद्घाटितविष्कंभमपि तद्विष्कंभेऽर्गलं नेत्यमरः॥ अगारमादर्शतलं छा
यामिव प्रविष्टां तां वनितां प्रोवाच अवदत्॥ ६॥ लब्धेति॥ ॥ कात्वमिति॥ ॥ सावरणेऽपि गेहेऽपि
लब्धांतरा लब्धावकाशात्वमिति शेषः॥ योगप्रभावश्च ते न लक्ष्यते॥ ॥

मृणालिनीहैमंहिमकृतमुपरागंउपद्रवंइवअनिर्वृतानांदुःखितानांआकारंबिभ्रतीं चिन्हं हियो
गिनां दुःखमस्तीति भावः॥ ७॥ कात्वमिति॥ ॥किं च हे शुभे त्वं का कस्य वा परिग्रहः पत्नी॥ तेतव
मदभ्यागमकारणं वा किं॥ वशिनां रघूणां मनः परस्त्रीषु विषये विमुखप्रवृत्ति यस्य तत्तत

बिभ्रतीं चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम्॥ ७॥ का त्वं शुभे कस्य परिग्र
होवा किंवा मदभ्यागमकारणं ते॥ आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमु
खप्रवृत्ति॥ ८॥ तमब्रवीत्सा गुरुणानवद्या या नीतपौरा स्वपदोन्मुखेन॥ तस्याः पुरः
संप्रति वीतनाथां जानीहि राजन्नधिदेवतां मां॥ ९॥

थाभूतं मत्वा आचक्ष्व॥ ८॥ तमिति॥
सा वनिता तं कुशं अब्रवीत्॥ अनवद्या अदोषा या पूः स्वपदोन्मुखेन विष्णुपदोन्मुखेन गुरु
णा त्वत्पित्रा नीतपौरा॥ हे राजन् मां संप्रति वीतनाथां अनाथां तस्याः पुरनगर्याः अयोध्यायाः
अधिदेवता जानीहि॥ ९॥ ७॥

वस्वौकसारामिति॥ ॥सौराज्येन राजन्वत्तया हेतुना बधोत्सवया विभूत्या वस्वौकसारां अलका
पुरीं॥ अलकापुरी वस्वौकसारा स्याद्विमानं पुष्पकोऽस्त्रियामिति यादवः॥ अथवा मानसोत्तर
शैलशिखरवर्तिनी शक्रनगरी वस्वौकसारा शक्रस्येति विष्णुपुराणात्॥ तामभिभूय समग्रश
क्तौ सूर्यवंश्ये त्वयि सति करुणामवस्थां दीनां दशां प्रपन्ना प्राप्ता॥ १०॥ ॥विशीर्णेति॥ ॥ दीना
मवस्थां वर्णयति॥ ॥तल्पान्यट्टालकाः॥ तल्पं शय्याट्टदारेष्वित्यमरः॥ अट्टाः स्कन्धगृहभेदाः॥

वस्वौकसारामभिभूय साहं सौराज्यबद्धोत्सवया विभूत्या॥ समग्रशक्तौ त्वयि सूर्यवंश्ये स
ति प्रपन्ना करुणामवस्थां॥ १०॥ विशीर्णतल्पाट्टशतोनिवेशः पर्यस्तसालः प्रभुणा विना मे॥

अट्टं भक्के चतुष्के च क्षौमेऽत्यर्थे गृहान्तरे इति विश्वः॥ विशीर्णानि तल्पानाम् अट्टानां च शतानि यस्य
स तथोक्तः॥ अथवा विशीर्णकल्पेति वा पाठः॥ अट्टाः क्षौमाः॥ स्यादट्टः क्षौममस्त्रियामित्य
मरः॥ ईषदसमाप्तं विशीर्णं विशीर्णकल्पानि अट्टशतानि यस्य स तथोक्तः॥ पर्यस्तशा
लः स्वस्तप्राकारः॥ प्राकारो वरणः शाल इत्यमरः॥ प्रभुणा स्वामिना विना एवंभूतो मे

निवेशानं अस्तनिमग्नसूर्यं अस्ताद्रिलीनार्कं वात्यानिलेन निलेन भिन्नमेघं दिनांतं विडंबयति अ
नुकरोति ॥११॥ ॥निशास्विति॥ ॥निशासु भास्वंति दीप्तिमंति कलानि अव्यक्तमधुराणि नूपुरा
णि नूपुपुराणि यासां तासां अभिसारिकाणां ॥ कांतार्थिनी तु यायाति संकेतं साभिसारिका इ

विडंबयत्यस्तनिमग्नसूर्यं दिनांतमुग्रानिलभिन्नमेघं ॥११॥ निशासु भास्व
त्कलनूपुराणां यः संचरोभूदभिसारिकाणां ॥ नदन्मुखोल्काविचि
तामिषाभिः स बाध्यते राजपथः शिवाभिः ॥१२॥ ॥

त्यमरः ॥ यो राजपथः ॥ संचरत्यनेनेति संचरः ॥ संचारसाधनमभूत् ॥ गोचरसंचरे
त्यादिना घञ्प्रत्ययांतो निपातः ॥ सः राजपथः ॥ नदत्सु मुखेषु या उल्कास्ताभिरव
चितामिषाभिरन्विष्टमांसाभिः शिवाभिः क्रोष्टभिर्बाध्यते गम्यते ॥ वहेरन्यो वहि धातु
रस्तीत्युपदेशः ॥१२॥ ॥

राम ४

आस्फालितमिति ॥ ॥ पदं जः प्रमदाकराग्रैरास्फालितं सत्ताडितं सत् जलक्रीडास्थितिशेषः ॥ मृदं
गानां यो धीरध्वनिस्तमन्वगच्छत् ॥ अन्वकरोत् ॥ तद् दीर्घिकाणामंभः इदानीं वन्यैर्महिषैः कर्तृभिः
शृंगैर्विषाणैर्वि[illegible]हतं सत् क्रोशति नतु मृदंगध्वनिमनुकरोतीत्यर्थः ॥१३॥ वृक्षेशया इति ॥ ॥ प
क्षिरे वनिवासः स्थानं तस्य भंगात् वृक्षे शेरते इति वृक्षेशयाः ॥ अधिकरणे शेतेरित्यच्प्रत्ययः

आस्फालितं यत्प्रमदाकराग्रैर्मृदंगधीरध्वनितामगच्छत् ॥ वन्यैरिदानीं महिषैस्तदंभः शृं
गाहतं क्रोशति दीर्घिकाणां ॥१३॥ वृक्षेशया यष्टिनिवासभंगान्मृदंगशब्दापगमादला
स्याः ॥ प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वं ॥१४॥ ॥वृ॥ ॥

शयवासिषु काबादित्यलुक् ॥ मृदंगशब्दानां अपगमाद् नाशाद् अलास्याः नृत्यशून्याः ॥
देवदावो वनारण्यवन्ही इत्यमरः ॥ तस्य उल्काभिः स्फुलिंगैर्हतेभ्यो दग्धेभ्यः शेषाणि ब
र्हाणि येषां ते क्रीडामयूरा वनबर्हिणत्वं वनमयूरत्वं प्राप्ताः ॥१४॥ ॥

सोपानेति ॥ ॥ किंच येषु सोपानमार्गेषु रामाः रमण्यः सरागान् लाक्षासांद्रान् चरणान् नि
क्षिप्तवंत्यः तेषु सोपानमार्गेषु सद्यो हतन्यंकुभिर्मारितमृगैर्व्याघ्रैः रक्तदिग्धं रुधिर
लिप्तं पदं निधीयते ॥ १५ ॥ ॥ चित्रेति ॥ ॥ पद्मवनावतीर्णाः प्रविष्टाः तथा लिखिता इत्य

सोपानमार्गेषु च येषु रामा निक्षिप्तवत्यश्चरणान् सरागान् ॥ सद्यो हतन्यं
कुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे ॥ १५ ॥ चित्रद्विपाः पद्म
वनावतीर्णाः करेणुभिर्दत्तमृणालभंगाः ॥ नखांकुशाघातविभि
न्नकुंभाः संरब्धसिंहप्रहृतिं वहंति ॥ १६ ॥ र्थः करेणुभिः करिणीभिः चित्रगताभिरे
व ॥ करेणुभिस्त्री स्यात् धेनुके इत्यमरः ॥ दत्तमृणालभंगाश्चित्रद्विपाः आलेख्यमातंगाः नखा एवांकु
कुशास्तेषां घातैर्विभिन्नकुंभाः संतः संरब्धसिंहप्रहृतं कुपितसिंहप्रहारं वहंति ॥ १६ ॥ ॥

स्तंभेष्विति ॥ ॥ उत्क्रांतवर्णक्रमाद्विशीर्णवर्णविन्यासाद्धूसराश्चतासां स्तंभेषु योषित्प्रतियातनानां
स्त्रीप्रतिकृतीनां दारुमयीनां ॥ प्रतिमानं प्रतिबिंबं प्रतिमा प्रतियातना ॥ प्रतिच्छाया प्रतिकृति
रित्यमरः ॥ फणिभिर्विमुक्ता निर्मोकाः कंचुका एव पट्टाः ॥ समौ कंचुकनिर्मोकौ इत्यमरः ॥
संगात्संबंधात् स्तनोत्तरीयाणि भवंति ॥ १७ ॥ कालेति ॥ ॥ कालांतरेण कालभेदवशेन श्यामा

स्तंभेषु योषित्प्रतियातनानामुत्क्रांतवर्णक्रमधूसराणां ॥ स्तनोत्तरीयाणि भवंति संगा
न्निर्मोकपट्टाः फणिभिर्विमुक्ताः ॥ १७ ॥ कालांतरश्यामसुधेषु नक्तमितस्ततो रू
ढतृणांकुरेषु ॥ त एव मुक्तागुणशुद्धयोपि हर्म्येषु मूर्छंति न चंद्रपादाः ॥ १८ ॥

सुधा येषु मलिनचूर्णेषु इतस्ततो रूढतृणांकुरेषु हर्म्येषु नक्तं मुक्तागुणानां शुद्धिरिव शुद्धिः
स्वाच्छ्यं येषां ते ता दृशाः त एव पूर्वं ये मूर्छंति त एव चंद्रपादाः चंद्ररश्मयः ॥ पादारश्म्यंघ्रि
तुर्यांशा इत्यमरः ॥ न मूर्छंति न प्रतिफलंतीत्यर्थः ॥ १८ ॥ ॥

आवर्ज्येति॥ ॥किंच विलासिनीभिः सदयं यथा तथा शाखाः लतावयवा नावर्ज्य आनमय्य यासां लता-
नां पुष्पाण्युपात्तानि गृहीतानि ताः मदीया उद्यानलताः वन्यैः पुलिंदैर्म्लेच्छविशेषैरिव वानरैरुपद्रये-
रित्यर्थः॥ क्लिश्यंते पीड्यंते॥ क्लिशश्नातेः कर्मणि लट्॥ भेदाः किरातशबरपुलिंदा म्लेच्छजातयः इत्य-

आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः॥ वन्यैः पुलिंदैरिव वा-
नरैस्ताः क्लिश्यंत उद्यानलता मदीयाः॥१९॥ रात्रावनाविष्कृतदीपभासः कांतामुख-
श्रीवियुता दिवापि॥ तिरस्क्रियंते कृमितंतुजालैर्विच्छिन्नधूपप्रसरा गवाक्षाः॥२०॥

मरः॥१९॥ ॥रात्राविति॥ ॥रात्रावनाविष्कृतदीपभासः दीपप्रभाशून्या इत्यर्थः॥ दिवा-
पि दिवसेपि कांतामुखानां स्त्रीमुखानां श्रिया कांत्या वियुक्ता रहिताः विच्छिन्नधूपप्रसरा ये-
षां ते गवाक्षाः कृमितंतुजालैर्लूतातंतुवितानैः तिरस्क्रियंते छाद्यंते॥२०॥

बलिक्रियेति॥ ॥बलिः पूजोपहारः स्यादिति शाश्वतः॥ बलिक्रियावर्जितानि सैकतानि येषां तानि स्ना-
नीयानि स्नानसाधनानि चूर्णादीनि॥ कृत्यल्युटो॥ बहुलमिति करणेऽनीयप्रत्ययः॥ स्नानीयसं-
सर्गं अनाप्नुवंति सरयूजलानि शून्यानि रिक्तानि उपांतेषु वानीरगृहाणि दृष्ट्वा दूये परितप्ये॥२१॥

बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनाप्नुवंति॥ उपांतवानीरगृहाणि दृ-
ष्ट्वा शून्यानि दूये सरयूजलानि॥२१॥ तदर्हसीमां वसतीं विसृज्य मामभ्युपैतुं कु-
लराजधानीं॥ हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्त्तिं॥२२॥

तदिति॥ ॥तत्तस्मादिमां वसतिं कुशावतीं विसृज्य कुलराजधानीमयोध्यां अभ्युपैतुमर्ह-
सि॥ कथमिव यथा ते गुरुः पिता रामः तां प्रसिद्धां कारणवशात् मानुषीं तनुं मानुषमूर्त्तिं हित्वा
परमात्ममूर्त्तिं यथा विष्णुमूर्त्तिमिव॥२२॥

तथेति॥ ॥रघूणां प्राग्रहरः ज्येष्ठः कुशः तस्याः पुरः प्रणयं याञ्चां प्रतीतो हृष्टः सन् प्रत्यगृह्णात् स्वी
चकार स्वीकृतवान्॥ पुराधिदेवता प्यभिव्यक्तमुखप्रसादा दृष्टजातादिति भावः शरीरबंधेन श
रीरयोगेन करणेन तिरोबभूव वेंतर्दधे॥ २३॥ ॥तदिति॥ ॥नृपतिः कुशः तदद्भुतं रात्रिवृत्तं रात्रि
वृत्तांतं प्रातः संसदि स्थिता यांद्विजेभ्यः शशंस॥ ते द्विजाः श्रुत्वा एनं कुशं कुलराजधान्या साक्ष

तथेति तस्याः प्रणयं प्रतीतः प्रत्यगृह्णात्प्रग्रहरो रघूणां॥ पूरप्यभिव्यक्तमुखप्रसादा श
रीरबंधेन तिरोबभूव॥ २३॥ तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस॥ श्रु
त्वा त एनं कुलराजधान्या साक्षात्पतित्वे वृतमभ्यनंदन्॥ २४॥ स्वयमेव पतित्वे विषये वृतम
भ्यनंदन् पतित्वेन वृतो सीत्यपूजयन्॥ आशीर्भिरिति शेषः॥ अत्र गार्ग्यः॥ दृष्ट्वा स्वप्नं शोभ
नं नैव सुप्यात्पश्चाद्दृष्टो यः स पाकं विधत्ते॥ शंसेदिष्टं तत्र साधुद्विजेभ्यस्ते चाशीर्भिः प्रीणयेयुः
पुनरेंद्रं॥ इदमपिस्वप्नतुल्यमितिभावः॥ २४॥ ॥

कुशावतीमिति॥ ॥स कुशः कुशावतीं श्रोत्रियेषु छंदसे धुत्त्रधीनां श्रोत्रियसात्॥ तदधीनवचनमिति सा
ति प्रत्ययः॥ श्रोत्रियः छंदोधीत इति निपातः॥ श्रोत्रियछंदसा समावित्यमरः॥ यात्रानुकूले ऽहनि सावरो
धः सांतःपुरः सन् वायुरभ्रवृंदैरिव सैन्यैरनुगतः सन् अयोध्यामभिमुखः प्रतस्थे॥ २५॥ साकेतुमु
पवनान्येव उपवनानि यस्याः सा रहद्भिः नागैर्गजैर्विहारशैलैः अनुगतेवस्थिता॥ रथ एव उदारगृहाः य

कुशावतीं श्रोत्रीयसाच्च कृत्वा यात्रानुकूलेहनि सावरोधः॥ अनुद्रुतो वायुरिवाभ्रवृंदैः सोन्वे
रयोध्याभिमुखः प्रतस्थे॥ २५॥ साकेतुमाज्ञोपवनार्हद्भिर्विहारशैलानुगतेव नागैः॥ सेना
रथोदारगृहा प्रयाणे तस्या नवजंगमराजधानी॥ २६॥ तेनातपत्रामलमंडलेन प्रस्थापितः पू
र्वनिवासभूमिं॥ स्याः सा सा सेना तस्य कुशस्य प्रयाणे जंगमराजधानी संचारिणी नगरीवाभ
वत् बभूव॥ २६॥ ॥तेनेति॥ ॥आतपत्रमेव अमलं मंडलं बिंबं यस्य तेन कुशेन पूर्वनिवासभू
मिं प्रति प्रस्थापितो॥ ॥

बलौघः आतपत्रवदमलमंडलेनोदितेन शशिना वेलां नीयमानः आप्यमाणः॥ उदकमस्यास्तीति उ
दन्वान् उदधिरिव बभौ॥ उदन्वानुदधौ चेति निपातनात् साधुः॥२७॥ ॥ तस्येति॥ ॥प्रयातस्य प्रस्थि
तस्य तस्य कुशस्य बहुरूपिणीनां सेनानां कर्तृकर्मणोः कृतीति षष्ठी॥ पीडां सोढुमपर्याप्त
वतीव शक्तेव वसुंधरा रजश्छलेन द्वितीयं विष्णुपदं आकाशं अध्यारुरोहेवेत्युत्प्रेक्षा॥२८॥ ॥ उद्यद्धि
बभौ बलौघः शशिनोद्गतेन वेलामुदन्वानिव नीयमानः॥२७॥ तस्य प्रयातस्य वरूथिनीनां पी
डामपर्याप्तवतीव सोढुं॥ वसुंधरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन॥२८॥ उद्यच्छमा
नागमनाय पश्चात् पुरो निवेशे पथि च व्रजंती॥ सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्यमतिं चका
र॥२९॥
छेति॥ ॥पश्चात् कुशस्य गमनाय प्रयाणाय तथा पुरः अग्रे निवेशे निमित्ते निवेष्टुं चेत्य
र्थः॥ उद्यच्छमाना उद्यता॥ अत्र समुदाङ्भ्यो यमोऽग्रंथ इत्यस्य सकर्मकादिकारत्वात् आत्मनेपदं॥
पथि च व्रजंती नृपस्य कुशस्य सेना यत्र पश्चात् पुरो मध्ये वा ददृशे तत्र तत्रैव सामग्र्यमतिं कृत्स्नता बुद्धिं
चकार अपरिमितास्य सेनेत्यर्थः॥ २९॥

तस्येति॥ ॥नेतुः तस्य कुशस्य द्विपानां मदवारिभिः सेकात् तुरंगमाणां खुराभिघातात् च यथासं
ख्यं च पथि रेणुः रजः पंकत्वं पंकतां प्रपेदे॥ पंकोऽपि रेणुत्वमियाय॥ तस्य तावद् बलमित्यर्थः॥३०
मार्गेति॥ ॥विंध्येषु विंध्यसंबंधिषु कटकांतरेषु नितंबावकाशेषु॥ कटकोऽस्त्री नितंबोऽद्रेरित्यमरः
मार्गैषिणी मार्गावलोकिनी अत एव बहुधा विभिन्ना महाविरावा दीर्घशब्दा शब्दे बिना दनि
तस्य द्विपानां मदवारिसेकात् खुराभिघाताच्च तुरंगमाणां॥ रेणुः प्रपेदे पथि पंकभावं पं
कोऽपि रेणुत्वमियाय नेतुः॥३०॥ मार्गैषिणी सा कटकांतरेषु विंध्यस्य सेना बहुधा विभि
न्ना॥ चकार रेवेव महाविरावा बद्धप्रतिश्रुंति गुहामुखानि॥३१॥
नदध्वनिध्वानरवस्वान
स्वानविनिर्घोषनिह्रादनादनिस्वाननिस्वनाः॥ आरवारावसंराववि रावा इत्यमरः॥
सा सेना रेवा इव नर्मदेव॥ रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका इत्यमरः॥ गुहामुखा
नि बद्धप्रतिश्रुति ध्वानवंति चकार॥ अकरोत्॥१३॥ ॥

सधात्विति ॥ ॥ धातूनां गैरिकादीनां भेदेनारुणा यानस्य नेमिः प्रयाणे ये ध्वनयः क्ष्वेडहेषादयः तैर्मिश्रा
णि तूर्याणि यस्य एवंविधः स प्रभुः कुशः पुलिंदैः किरातैः उपपादिता समर्पिता नि उपायनानि प
श्यन् विंध्यं अलंघयन् विंध्यं व्यलंघयत् ॥ ३२ ॥ ॥ तीर्थ इति ॥ ॥ तदीये बद्धे तीर्थे अवतारे गजा एव सेतु
तस्य बंधाद्धेतोः प्रतीपगां गंगामुत्तरतोऽस्य कुशस्य नभोलंघने न लोलपक्षाः हंसाः अयत्नेन वाल

सधातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतूर्यः ॥ व्यलंघयद्विंध्यमुपायनानि पश्य
न्पुलिंदैरुपपादितानि ॥ ३२ ॥ तीर्थे तदीये गजसेतुबंधात्प्रतीपगामुत्तरतोस्य गंगां ॥ अ
यत्नवालव्यजनीबभूवुर्हंसा नभोलंघनलोलपक्षाः ॥ ३३ ॥ स पूर्वजानां कपिलेन रोषा
द्भस्मावशेषीकृतविग्रहाणां ॥ सुरालयप्राप्तिनिमित्तमंभस्त्रैस्रोतसं नौलुलितं ववंदे ॥ ३४ ॥

व्यजनी बभूवुः ॥ चामराण्यभूवन् ॥ अतद्भावे च्विः ॥ ३३ ॥ ॥ सेति ॥ ॥ स कुशः कपिलेन मुनिना रो
षात् भस्मावशेषीकृतविग्रहा देहा येषां तेषां पूर्वजानां वृद्धानां सागराणां सगरपुत्राणां सुरालय
स्य स्वर्गस्य प्राप्तिनिमित्तं नौभिर्लुलितं क्षुभितं त्रिस्रोतस इदं त्रैस्रोतसं गांगमंभो ववंदे ॥ ३४ ॥ ॥

इतीति ॥ ॥ इति कैश्चिदहोभिरध्वनोऽन्ते अवसाने कुशः सरय्वाः कूलं समासाद्य वितताध्वराणां
विस्तृतमखानां रघूणां वेदिः ॥ प्रतिष्ठा आस्पदं येषां तान् यूपान् शतशः अपश्यत् ॥ ३५ ॥ ॥
आधूयेति ॥ ॥ कुलराजधान्या उपवनांतवायुः कुसुमद्रुमाणां शाखा आधूय ईषत् धूत्वा सु

इत्यध्वनः कैश्चिदहोभिरंते कूलं समासाद्य कुशः सरय्वाः ॥ वेदिप्रतिष्ठान्वितताध्वरा
णां यूपानपश्यच्छतशो रघूणां ॥ ३५ ॥ आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शीतान्सरयू
तरंगान् ॥ तं क्लांतसैन्यं कुलराजधान्याः प्रत्युज्जगामोपवनांतवायुः ॥ ३६ ॥ अथोपशल्ये
रिपुमग्नशल्यस्तस्याः पुरः पौरसखः स राजा ॥

रभिर्मंदश्चेत्यर्थः ॥ शीतान् सरयूतरंगान्
च स्पृष्ट्वा ऽनेन शैत्योक्तिः ॥ क्लांतसैन्यं तं कुशं प्रत्युज्जगाम ॥ ३६ ॥ ॥ अथेति ॥ ॥ रिपुषु मग्नं
शल्यं शंकुः शरो वा यस्य सः ॥ शल्यं शंकौ शरे वंशे इति विश्वः ॥ पौराणां सखा पौरसखः ॥

कुलस्य ध्वजश्चिह्नभूतः ॥ बलीसराजा चलाश्चलंतो वा ध्वजा येषां तानि बलानि सैन्यानि तस्याः
पुरः पुर्य्याः उपशल्ये ग्रामांते ॥ ग्रामांत मुपशल्यं स्यादित्यमरः ॥ निवेशयामास ॥ ३७ ॥ ॥
तामिति ॥ ॥ प्रभुणा नियुक्ताः शिल्पिनां तक्षादीनां संघाः संभृतसाधनत्वान्मिलितोपकर

कुलध्वजस्तानि चलध्वजानि निवेशयामास बली बलानि ॥ ३७ ॥
तां शिल्पिसंघाः प्रभुणा नियुक्तास्तथागतां संभृतसाधनत्वात् ॥ पु
नर्नवां चक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवोर्वीं ॥ ३८ ॥ ॥

णत्वात्तां तथागतां भूतां भूत्वामित्यर्थः ॥ पुरमेयो ध्यां मेघा अपां जलानां विसर्गाज्जलसेका
न्निदाघग्लपितां ग्रीष्मतप्तां उर्वीमिव नवीं चक्रुः परिष्कुर्यां चक्रुः ॥ ३८ ॥ ॥

ततइति ॥ ॥ ततो रघुप्रवीरः कुशः प्रतिमा देवताः प्रतिकृतयः अर्चा इत्यर्थः ॥ परार्ध्यप्रतिमागृहायाः प्रश
स्तदेवतायतनायाः पुरः उपोषितैः वास्तुविधानविद्भिः प्रयोज्यैः सह पशूपहारैः सपशूपहारां सपर्यां
निवर्त्तयामास ॥ अत्र ण्यंतात् णिचः ॥ पुनरित्यनुसंधेयं ॥ अन्यथा वृत्तेरकर्मकस्य करोत्यर्थत्वे कारय
त्यर्थाभावप्रसंगात्प्रवितर्मवृत्तेरण्यंतकर्तृप्रयोज्यत्वेन निर्देशात्प्रयोगांतरस्य सापेक्षितत्वात्तथा ॥

ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः ॥ उपोषितैर्वास्तुविधानविद्भिर्निव
र्तयामास रघुप्रवीरः ॥ ३९ ॥ तस्याः स राजोपपदं निशांतं कामीव कांताहृदयं प्रविश्य ॥
यथार्हमन्यैरनुजीविलोकं संभावयामास गृहैस्तदीयैः ॥ ४० ॥

तस्याइति ॥ ॥ तस्याः पुरः सं
बंधि राजोपपदं राजशब्दपूर्वं निशांतं राजभवनं ॥ निशांतं भवनोषसोरिति विश्वः ॥ कामी कांताहृ
दयमिव प्रविश्य अन्यैर्निशांतैरनुजीविलोकं अमात्यादिकं यथा प्रधानं मान्यानुसारेण यथार्हं य
थोचितं तत्र उचितगृहैरित्यर्थः संभावयामास ॥ कामी च तत्सहचरानित्यं संभावयामासेति ध्व
नि ॥ ४० ॥ ॥

सेति॥ ॥ विपणिस्थानिपण्यानि क्रयविक्रयार्हवस्तूनि यस्याः सा विपणिः पण्यवीथिकेत्यमरः॥ सा
पूः अश्वीयाधा मंदुरासंश्रयिभिः अश्वशालासंश्रयशीलैः॥ वाजिशाला तु मंदुरा इत्यमरः॥ तुरंगैर
श्वैः॥ जिदृक्षीत्यादिना इनिप्रत्ययः॥ शालासु यो विधिना स्थापिताः स्तंभास्तान्गतैः प्राप्तैर्नागै
श्च सर्वांगेषु नद्धान्याभरणानि यस्याः सा नारीव आबभासे॥ ४१॥ ॥ वसन्निति॥ ॥ स मैथिले

सा मंदुरासंश्रयिभिस्तुरंगैः शालाग्रहस्तंभगतैश्च नागैः॥ पूराबभासे विपणिस्थप
ण्यैः सर्वांगनद्धाभरणेव नारी॥ ४१॥ वसन्स तस्यां वसतौ रघूणां पुराणशोभा
मधिरोपितायां॥ न मैथिलेयः स्पृहयांचकार भर्त्रे दिवो नाप्यलकेश्वराय॥ ४२॥ ॥

यः कुशः पुराणशोभां पूर्वशोभां अधिरोपितायां तस्यां रघूणां वसतौ अयोध्यायां वसन् दि
वः भर्त्रे देवेंद्राय तथा अलकेश्वराय कुबेराय॥ न स्पृहयां बभूव॥ तावपि न गणयामासे
त्यर्थः॥ स्पृहेरीप्सित इति संप्रदानाच्चतुर्थी एतेनायोध्याया अन्यनगराधिक्यं गम्यते॥ ४२॥

कुशस्य कुमुद्वतीसंगमं प्रस्तौति॥ ॥ अथेति॥ ॥ अथास्य कुशस्य प्रियाः रत्नैर्मुक्तामणिभिर्ग्रथि
तान्युत्तरीयाणि यस्मिंस्तं एकांतमत्यंतं पांडूः स्तनयोर्लंबिनो हारा यस्मिंस्तं निश्वाससहार्याण्यति
सूक्ष्माण्यंशुकानि यस्मिंस्तं तमेवं शीतलप्रायं वेषं नेपथ्यं उपदेष्टुमिव॥ ऋतुविसमानाधर्मत्वादिति क्रम
कर्त्व॥ घर्मो ग्रीष्म आजगाम॥ ४३॥ ॥ अगस्त्येति॥ ॥ अगस्त्यश्चिह्नं यस्य तस्मादयनादागात् इति

अथास्य रत्नग्रथितोत्तरीयमेकांतपांडुस्तनलंबिहारं॥ निश्वासहार्यांशुकमाजगाम घ
र्मः प्रियावेषमिवोपदेष्टुं॥ ४३॥ अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनि
वृत्ते॥ आनंदशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीससर्ज॥ ४४॥

णायनात् भास्व
ति समीपं प्रति संनिवृत्ते सति॥ उत्तरा दिक् आनंदशीतां बाष्पवृष्टिमिव हैमवतीं हिमवत्सं
बंधिनीं हिमद्युतिं हिमनिस्यंदं ससर्ज अत्र प्रोषितप्रियसमाधिर्गम्यते॥ ४४॥ ॥ प्रवृध
ति॥ ॥ अतिमात्रं प्रवृद्धतापो दिवसः अत्यर्थमेव नात्यंतन्वीकरणक्षणदा चेत्से॥

ताबुभौ विरोधस्य क्रियया प्रणयकलहादिना विरोधाचरणेन सानुशयौ सानुतापौ जायापती दंप
तीव आस्तां तयोरपि तापकारिरूपसंभवात्तत्सदृशाववर्ततामित्यर्थः ॥ ४५ ॥ दिने दिन इति ॥ ॥ दिने दि
ने प्रतिदिनं शैवलवंति अस्तात् यानि सोपानानां पर्वाणि पर्वाणि जंग्यस्ता विमुंचत् अत एव उद्दंडपद्मं
गृहदीर्घिकाणां अंभो नारीनितंबः प्रमाणमस्य नारीनितंबद्वयसं बभूव विहारयोग्यमभूदित्य

उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्तां ॥ ४५ ॥ दिने दिने शैवलवंत्यध
स्तात्सोपानपर्वाणि विमुंचदंभः ॥ उद्दंडपद्मं गृहदीर्घिकाणां नारीनितंबद्वयसं बभूव ॥ ४६ ॥
नवेषु सायंतनमल्लिकानां विजृंभणोद्गंधिषु केसरेषु ॥ प्रत्येकनिक्षिप्तपदः सशब्दं संख्या
मिवैषां भ्रमरश्चकार ॥ ४७ ॥

र्थः प्रमाणे द्वयसडिति द्वयसच प्रत्ययः ॥ ४६ ॥ ॥ नवेष्विति ॥ ॥ ॥ नवे
षु विजृंभणेन विकासेन उद्गंधिषु उत्कटसौरभेषु गंधस्येत्त्वादिना समासांत इकारादेशः ॥
सायंतनमल्लिकानां कुड्मलेषु प्रत्येकमेकस्मिन् निक्षिप्तपदो मकरंदलोभादित्यर्थः ॥
भ्रमर एषां कुड्मलानां संख्यां गणनां चकारेव ॥ ४७ ॥

स्वेदेति ॥ ॥ स्वेदानुविधमार्द्रं नूतनं नखक्षतमंको यस्य तस्मिन् कामिनीनां कपोले न्यपिष्टं संदष्टशिखं
संश्लिष्टकेसरं अत एव कर्णात्च्युतं अपि शिरीषपुष्पं सहसा न पपात ॥ ४८ ॥ यंत्रेति ॥ ॥ ऋद्धिमंतो
धनिकाः ॥ धारागृहेषु यंत्रधारागृहेषु शिशिरैर्यंत्रप्रवाहैः यंत्रसंचा ॥ रितसलिलपूरैः

स्वेदानुविद्धार्द्रनखक्षतांके भूयिष्ठसंदष्टशिखं कपोले ॥ च्युतं न कर्णादपि कामि
नीनां शिरीषपुष्पं सहसा पपात ॥ ४८ ॥ यंत्रप्रवाहैः शिशिरैः परीतान् रसेन धौता
न्मलयोद्भवस्य ॥ शिलाविशेषानधिशय्य निन्युर्धारागृहेष्वातपमृद्धिमंतः ॥ ४९ ॥

परीतान् व्याप्तान् मलयोद्भवस्य रसेन चंदनोदकेन धौतान् क्षालितान् शिलाविशेषान्
मणिमयासनान्यधिशय्य तेषु शयित्वा आतपं निन्युः परिहारयं चक्रुः ॥ ४९ ॥ ॥

स्नानेति॥ ॥वसंतस्यात्ययेनातिक्रमणेन मंदवीर्योऽति दुर्बलः कामो मन्मथः स्नाना
र्द्रास्ते मुक्ताश्च धूपसंचारणार्थमित्यर्थः॥ तेषु अनुधूपवासं धूपवासो धूपवासानंतरं विन्यस्ता
सायंतनमल्लिका येषु तेषु अंगनानां केशेषु बलं लेभे नैतेरुद्दीपित इत्यर्थः॥ ५०॥ ॥आपिंजरेति॥ ॥

स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायंतनमल्लिकेषु॥ कामो वसंतात्ययमंदवी
र्यः केशेषु लेभे बलमंगनानां॥ ५०॥ आपिंजरा बद्धरजःकणत्वान्मंजर्युदारा रु
रुचेऽर्जुनस्य॥ दग्ध्वापि देहं गिरिशेन पश्चात्खंडीकृता ज्येव मनोभवस्य॥ ५१॥ ॥

बद्धरजःकणत्वात् बद्धा रजःकणा यस्याः तत्त्वात् आपिंजरा उदारा महीयसी अर्जुनस्य ककुभस्य
॥ इंद्रद्रुः ककुभोऽर्जुन इत्यमरः॥ मंजरी देहं दग्ध्वापि रोषाद्गिरिशेन खंडीकृता मनो
भवस्य ज्या मौर्वीव शुशुभे॥ ५१॥ ॥

मनोज्ञेति॥ ॥मनोज्ञगंधमिति सर्वत्र संबध्यते॥ सहकारभंगं चूतपल्लवखंडं पुराणं निर्वापि
तानि रतेऽनेनेति शीधुः॥ पक्वेक्षुरसप्रकृतिकं मद्यं॥ औणादिको धुक्प्रत्ययः॥ पक्वैरिक्षुरसैर
स्वादुः शीधुः पक्वरसः शीधुरिति यादवः॥ पाटलायाः पुष्पं पाटलं नवं च तत्पाटलं च संबध्नता परस्परं
संघट्टयता निदाघावधिना ग्रीष्मकालेन अवधिस्त्ववधाने स्यात्सीम्नि काले बलेऽपि चेति विश्वः

मनोज्ञगंधं सहकारभंगं पुराणशीधु नवपाटलं च॥ संबध्नता कामिजनेषु दोषाः स
र्वे निदाघावधिना प्रमृष्टाः॥ ५२॥ जनस्य तस्मिन्समये विगाढे बभूवतुर्द्वौ सविशेष
कांतौ॥ तापापनोदक्षमपादसेवौ स चोदयस्थो नृपतिः शशी च॥ ५३॥ ॥

कामिजनेषु विषये सर्वे दोषाः तापादयः प्रमृष्टाः परिहृताः॥ ५२॥ जनस्येति॥ ॥तस्मिन्
समये ग्रीष्मे विगाढे कठिने सति जनस्य द्वौ सविशेषं सातिशयं यथा तथा कांतौ बभूवतुः॥
तापापनोदक्षमा पादयो रश्म्योः पादा नीरश्मीनां च सेवा ययोस्तौ॥ उदयस्थोऽभ्युदयस्थः
सन्नृपतिः शशी च॥ ५३॥ ॥

 ऊर्मीति॥ ऊर्मिभिर्लोलाः सतृष्णाः उन्मदाः राजहंसाः यस्मिन् तस्मिन् लोलश्चलसतृष्णयोरित्यमरः।
रोधोलतापुष्पाणां वहे प्रापके॥ पचाद्यच्॥ ग्रीष्मे सुखे सुखकरे सरय्वाः अंभसि पयसि॥ तस्य कुलस्य
वनितासखस्य वनिताभिः सहेत्यर्थः॥ विहर्तुमिच्छा बभूव॥ ५४॥ स इति॥ चक्रधरप्रभावः॥ विष्णु
तेजाः स कुशः तीरभूमौ विहितोपकार्यायस्यास्तामानायो जालं एषामस्तीति आनायिनो जालिकाः

ऊर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः॥ विहर्तुमिच्छा वनितासखस्य तस्यांभसि
ग्रीष्मसुखे बभूव॥ ५४॥ स तीरभूमौ विहितोपकार्यामानायिभिस्तामपकृष्टनक्रां॥ विगाहि
तुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः॥ ५५॥

जालमानाय इति निपातः॥ आनायः पुं
सि जालं स्यादित्यमरः॥ तैरपकृष्टनक्रामपनीतग्राहां तां सरय्वं श्रीमहिम्नोः संपत्प्रभावयोः अ
नुरूपां विगाहितुं प्रचक्रमे॥ अत्र कामंदकः॥ परितापिषु वासरेषु पश्चन्नतरले खातिमा
न्नसैत्यचक्रं॥ सुविशोधितनक्रमानजालं अवगाहेत सुहृत्समेत इति॥ ५५॥ ॥

सेति॥ सा सरित् सरयूः तीरसोपानपथेन अवतारा वेदं तरणादन्योन्यकेयूरविघट्टिनीभिः सव्यां
गदसंघर्षिणीभिः सनूरक्षोभाणि सनूपुरचलनानि पदानि पादा यासां ताभिरंगनाभिर्हेतुभिः उद्वि
ग्नहंसा चकितमरालाः आसीत्॥ ५६॥ परस्परेति॥ नौसंश्रयः परस्परस्याभ्युक्षणे सेचने तत्पराणां

सा तीरसोपानपथावतारादन्योन्यकेयूरविघट्टिनीभिः॥ सनूपुरक्षोभपदाभिरासीदु
द्विग्नहंसा सरिदंगनाभिः॥ ५६॥ परस्पराक्षेपणतत्पराणां तासां नृपो मज्जनराग
दर्शी॥ नौसंश्रयः पार्श्वगतां किरातीमुपात्तबालव्यजनां बभाषे॥ ५७॥ ॥

आसक्तानां तासां स्त्रीणां मज्जने रागे॥ अभिलाषस्तद्दर्शी नृपः पार्श्वगतां उपात्तवालव्यजनं
गृहीतचामरां किरातीं चामरग्राहिणीं बभाषे॥ किरातस्तु कुब्जे वामनेऽन्तरे॥ स्त्रियां चामरवाहिन्यां
म्लेच्छजात्यंतरे द्वयोरिति केशवः॥ ५७॥ ॥

पश्येति ॥ ॥ गलितांगरागैः क्षालितचंदनैर्मदीयैः शतशोऽवरोधैर्विगाह्यमानेऽवलोड्यमाने
एषः सरयूप्रवाहः साभ्रः समेघः संध्योदयः संध्याविर्भावइवानेकं नानाविधं वर्णं रक्तपीता
दिकं पुष्यति पश्येति वाक्यार्थः कर्म ॥ ५८ ॥ ॥ विलुप्तमिति ॥ ॥ नौभिर्लुलिताभिर्क्षुभिताभिर

पश्यावरोधैः शतशो मदीयैर्विगाह्यमानो गलितांगरागैः ॥ संध्योदयः साभ्र इवैष
वर्णं पुष्यत्यनेकं सरयूप्रवाहः ॥ ५८ ॥ विलुप्तमंतःपुरसुंदरीणां यदंजनं नौलुलिता
भिरद्भिः ॥ तद्बध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासां ॥ ५९ ॥

द्भिः अंतःपुरसुंदरीणां यदंजनं कज्जलं विलुप्तं हृतं ॥ तदंजनं विलोचनेषु मदेनया राग
शोभा तां बध्नातिभिर्घटयंतीभिरद्भिः प्रतिमुक्तं प्रत्यर्पितं ॥ आसां प्रतिनिधिदानमपि त
त्कार्यकारित्वात्प्रत्यर्पितमिवेति भावः ॥ ५९ ॥ ॥

एता इति ॥ ॥ गुरु उर्वं हं श्रोणिपयोधरं यस्यात्मन इति विग्रहः ॥ गुरुश्रोणिपयोधरत्वादात्मानं श
रीरमुद्वोढुमशक्नुवंत्य एताः बालाः गाढांगदैः श्लिष्टांगदैः बाहुभिः क्लेशोत्तरं दुःखप्रायं यथा
तथा रागवशात्क्रीडाभिनिवेशापारतंत्र्यात्प्लवंते तरंति ॥ ६० ॥ अमीति ॥ ॥ वारिविहारिणी
नां आसां प्रभ्रंशिनो भ्रष्टाः निम्नगायाः श्रोतसि पारिप्लवाः चंचलाः ॥ चंचलं चपलं चैव पारि

एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवंत्यः ॥ गाढांगदैर्बाहुभिरप्सु बा
लाः क्लेशोत्तरं रागवशात्प्लवंते ॥ ६० ॥ अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिवि
हारिणीनां ॥ पारिप्लवाः श्रोतसि निम्नगायां शैवाललोलांश्छलयंति मीनान् ॥ ६१ ॥

प्लवइत्यमरः ॥ अमी शिरीषप्रसवा एव अवतंसाः कर्णभूषाः शैवाललोलान् जलनीला
प्रियान् ॥ जलनीली तु शैवालं शैवल इत्यमरः ॥ मीनान् छलयंति प्रतारयंति ॥ शैवा
लप्रियत्वात् शिरीषेषु शैवालभ्रमत्वात्ताडयंतीत्यर्थः ॥ ६१ ॥

आसामिति॥॥विलासिनीनां विलसनशीलानां स्त्रीणां मुक्ताफलस्पर्धिषु मौक्तिकानुकारिषु पयोधरे
षु स्तनेषु उत्सर्पंति उत्पतंतीति येते षु शीकरेषु शीकराणामंभःकणानामाधीयमाणो गतन्नहारोऽत एव छिद्र
रोपि स्वयं छिन्नोपि न सेकक्षणलेते विदिभिदिछिदिः कुरजिति कुरच प्रत्ययः॥ शीकरसंसर्गात्
छिन्न इति न ज्ञायत इति भावः॥६२॥॥आवर्त्तेति॥॥विलासिनीनां विलसनशीलानां स्त्रीणां॥ मौक

आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्धिषु शीकरेषु। पयोधरोत्सर्पिषु शीर्यमाणः
संलक्ष्यते न छिदुरोपि हारः॥६२॥ आवर्त्तशोभानतनाभिकांतेर्भंग्यो भ्रुवां द्वंद्वचराः स्तना
नां॥ जातानि रूपावयवोपमानान्यदूरवर्त्तीनि विलासिनीनां॥६३॥ षलसकत्य स्तंभ इति
घिनुण्प्रत्ययः॥ रूपावयवानामुपमेयानां यान्युपमानानि लोकप्रसिद्धानि॥ तान्यदूरवर्त्ती
नि अविकृतानि जातानि॥ किंस्वित्किमुपायमित्यत्राह॥ नतनाभिकांते निम्ना नाभिर्यो ना
याः आवर्त्तशोभा॥ स्यादावर्त्तोंभसां भ्रमः॥ भ्रुवां भंगाः स्तरंगाः स्तनानां द्वंद्वचराः चक्रवाकाः॥
उपमानि सर्वत्र संबध्यंते॥३॥ ॥

तीरेति॥॥उत्कलापैरुच्चबर्हैः प्रस्निग्धाः मधुराः केका येषां तैस्तीरस्थलीषु बर्हिभिर्मयूरैरभि
नंद्यमानं रक्तं श्राव्यं गीतानुगं गीतानुसारि॥ आसां स्त्रीणां संबंधि वाद्येव मृदंगस्तस्य वाद्यं वा
द्यध्वनिः॥ श्रोत्रेषु संमूर्छति व्याप्नोति॥६४॥ ॥संदष्टेति॥ ॥संदष्टवस्त्रेषु जलसेकात् संश्लि

तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनंद्यमानं॥ श्रोत्रेषु संमूर्छति रक्तमा
सां गीतानुगं वारिमृदंगवाद्यं॥६४॥ संदष्टवस्त्रेष्वबलानितंबेष्विंदुप्रकाशांतरितो
डुकल्पाः॥ अमी जलापूरितसूत्रमार्गा मौनं भजंते रसनाकलापाः॥६५॥ ॥

ष्टांशुकेषु अबलानां नितंबेषु अधिकरणेषु इंदुप्रकाशेन ज्योत्स्नया अंतरितानि आवृता
नि यानि उडूनि नक्षत्राणि तत्तुल्याः मुक्तामयत्वादिति भावः॥ अमी जलापूरितसूत्रमा
र्गा निश्चलाः इत्यर्थः॥ रसनाना एव कलापाः भूषणानि कलापो भूषणे बर्हे इत्यमरः॥ मौ
नं निःशब्दतामित्यर्थः भजंते॥६५॥

एता इति ॥ ॥ दर्पात्सखीजनं प्रतिकरैरुत्पाटिता उत्सारिता वारिधारा याभिस्ताः ॥ स्वयमपि पुनःत
थैव सखीभिर्वदनेषु सिक्ता एताः तरुण्यः वक्रेतराग्रैर्जलसेकादृज्वग्रैः रलकैः करणैश्चूर्णैः कुंकु
मादिभिररुणान्वारिलवान् उदकबिंदून्वमंतीव र्षंति ॥ ६६ ॥ ॥ उद्बंधेति ॥ ॥ उद्बंधागतबंधा उद्ग्रा

एताः करोत्पाडितवारिधारा हर्स्सखीभिर्वदनेषु सिक्ताः ॥ वक्रेतराग्रैरलकैस्तरुण्यश्चू
र्णारुणान्वारिलवान्वमंति ॥ ६६ ॥ उद्बंधकेशश्च्युतपत्रलेखो विश्लेषिमुक्ताफलप
त्रवेष्टः ॥ मनोज्ञ एव प्रमदामुखानामंभोविहाराकुलितोपि वेषः ॥ ६७ ॥ ॥

श्राः केशाः यस्मिन्सः ॥ च्युतपत्रलेखः ॥ क्षरितपत्ररचनः ॥ विश्लेषिणो विस्रंसिनो मुक्ताफ
लपत्रवेष्टा मुक्तामयताटंका यस्मिन्सः ॥ एवमंभोविहाराकुलितोपि जलक्रीडाव्याकुलि
तो प्रमदामुखानां वेषो नेपथ्यं मनोज्ञ एव रम्याणां विकृतिरपि श्रियं तनोतीति भावः ॥ ६७ ॥

स इति ॥ ॥ सकुशः नौर्विमानमिव नौविमानं इत्युपमितसमासः ॥ तस्मादवतीर्य विलोलहारः सन्
ताभिः स्त्रीभिः सह करेणुभिः करिणीभिः सह ॥ स्कंधावलग्नाः अतएव उद्धृता उत्पाटिता पद्मिनी न
लिनी येन सः ॥ तथोक्तः सन् ॥ नद्यृतश्चेति कप्रत्ययः ॥ वन्यः द्विपेंद्र इवाप्सु रेमे ॥ ६८ ॥ ततइति ॥ ॥

सनौविमानादवतीर्य रेमे विलोलहारः सह ताभिरप्सु ॥ स्कंधावलग्नोद्धृतपद्मिनीकः
करेणुभिर्वन्य इव द्विपेंद्रः ॥ ६८ ॥ ततो नृपेणाधिगताः स्त्रियस्ता भ्राजिष्णुना सातिश
यं विरेजुः ॥ प्रागेव मुक्ता नयनाभिरामाः प्राप्येंद्रनीलं किमुतोन्मयूखं ॥ ६९ ॥ ॥

ततो भ्राजिष्णुना प्रकाशनशीलेन ॥ भुवश्चेति चकारादिष्णुच्प्रत्ययः ॥ नृपेण अनुगताः सं
गतास्ताः स्त्रियः सातिशयं यथा तथा विरेजुः ॥ प्रागेव नीलयोगात्पूर्वमेव केवला अपीत्य
र्थः मुक्ताः मुक्तामणयो नयनाभिरामाः सुंदराः उन्मयूखं इंद्रनीलं प्राप्य किमु ताभिरामा इ
ति किमु वक्तव्यं इत्यर्थः ॥ ६९ ॥

वर्णोदकैरिति ॥ तं कूर्चं आयताक्ष्यः स्त्रियः कांचनस्य शृंगैर्मुक्तानि तानि वर्णोदकैः कुंकुमादि
वर्ण्यद्रव्यसहितोदकैः प्रणयात्स्नेहादसिंचन् ॥ तथागतस्तथास्थितः वर्णोदकसिक्तः स कुशः
सधातुनिस्यंदो गैरिकद्रव्ययुक्तो ऽद्रिराज इवातितरां बभासे अत्यर्थं चकासे ॥ ७० ॥ तेनेति ॥ ॥

वर्णोदकैः कांचनशृंगसंस्थैस्तमायताक्ष्यः प्रणयादसिंचन् ॥ तथागतः सोऽतितरां ब
भासे सधातुनिष्यंद इवाद्रिराजः ॥ ७० ॥ तेनावरोधप्रमदासखेन विगाहमानेन सरिद्व
रां तां ॥ आकाशगंगारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः ॥ ७१ ॥ ॥ ॥

अवरोधप्रमदासखेन ॥ अंतःपुरसुंदरीसहचरेण तां सरिद्वरां सरयूं विगाहमानेन तेन
कुशेन आकाशगंगायां रतिः क्रीडा यस्य सो ऽप्सरोभिर्वृतः आहृतो मरुत्वान् इंद्रः अनुया
तलीलः अनुकृतश्रीरभूदिति शेषः ॥ इंद्रमनुकृतवानित्यर्थः ॥ ७१ ॥ ॥

यदिति ॥ ॥ यत् आभरणं रामः कुंभयोनेरगस्त्यादधिगम्य प्राप्य कुशाय राज्येन समं दिदेश राज्यसमेतं
दत्तमित्यर्थः ॥ सलिले विहर्तुः क्रीडितुः अस्य कुशस्य तत् जैत्रमाभरणं जयनशीलमाभरणमज्ञातपातं
सन्ममज्ज ॥ ७२ ॥ स्नात्वेति ॥ ॥ असौ कुशः सदारः सन् यथाकामं यथेच्छं स्नात्वा विगाह्य तीरे

यत्कुंभयोनेरधिगम्य रामः कुशाय राज्येन समं दिदेश ॥ तदस्य जैत्राभरणं विहर्तुर
ज्ञातपातं सलिले ममज्ज ॥ ७२ ॥ स्नात्वा यथाकाममसौ सदारस्तीरोपकार्यां गतमात्र एव ॥
दिव्येन शून्यं वलयेन बाहुमपोढनेपथ्यविधिर्ददर्श ॥ ७३ ॥ जयश्रियः संवननं यतस्त
दामुक्तपूर्वं गुरुणा च यस्मात् ॥ याउपकार्या पूर्वोक्ता तां गतमात्रे ॥ गत एवापोढनेप
थ्यविधिरकृतप्रसाधन एव दिव्येन वलयेन शून्यं बाहुं ददर्श ॥ ७३ ॥ ॥ जयेति ॥ ॥ यत् कार
णात्तदाभरणं जयश्रियः संवननं वशीकरणं ॥ वशक्रिया संवननमित्यमरः ॥ यस्माद्गुरु
णा पित्रा आमुक्तपूर्वं पूर्वमामुक्तं धृतमित्यर्थः ॥ ॥

सुप्सुपेतिसमासः॥ अतोहेतोः अस्याभरणस्यभ्रंशंनाशंनसेहेनोमान्न॥ कुतोहियस्माद्धीरःवि
द्वान्सकुशः॥ कुल्यानिपुष्पाणिआभरणानिचयस्यसः॥ पुष्पेष्विवाभरणेषुधृतेषुनिर्मल्पिबु
धिंकरोतीत्यर्थः॥७४॥ ॥ततइति॥ ॥नद्यांस्नातिकौशलेनेतिनदीष्णास्तान्॥ सुपीतियोगवि
भागात्कप्रत्ययः॥ निनदीभ्यांस्नातेःकौशलइतिषत्वं॥ सर्वानानायिनोजालिकान्तस्याभ

सेहेस्यनभ्रंशमतोनलोभात्सतुल्यपुष्पाभरणोहिधीरः॥७४॥ ततः
समाज्ञापयदाशुसर्वानानायिनस्तद्विचयेनदीष्णान्॥ वंध्यश्रमा
स्तेसरयूंविगाह्यतमूचुरम्लानमुखारविंदाः॥७५॥ ॥

रणस्यविचयेऽन्वेषणेनिमित्तेआशुसमाज्ञापयत्आदिदेश॥ तेआनायिन॥ सरयूं
विगाह्यविलोड्यवंध्यश्रमाःविफलप्रयासास्तथापितज्जातिज्ञत्वादम्लानमुखप्रसाद
सश्रीकमुखाःसंतस्तंकुशमूचुः॥७५॥ ॥

कृतइति॥ ॥हेदेवप्रयत्नःकृतःपयसिमग्नंनिमग्नंतेआभरणोत्तमंनलब्धंतर्हिकिंगतंतत
त्राह॥ किंतुतदाभरणंअंतर्ह्रदवासिनाकुमुदेनकुमुदाख्येननागेनपन्नगेनलौल्याल्लो
भाउपात्तंगृहीतंनूनंइतिवितर्कयामः॥७६॥ ॥ततइति॥ ॥ततोधनुर्धरःकोपविलोहि

कृतःप्रयत्नोनचदेवलब्धंमग्नंपयस्याभरणोत्तमंते॥ नागेनलौल्यात्कुमुदेननून
मुपात्तमंतर्ह्रदवासिनातत्॥७६॥ ततःसकृत्वाधनुराततज्यंधनुर्धरःकोपवि
लोहिताक्षः॥ गारुत्मतंतीरगतस्तरस्वीभुजंगनाशायसमाददेस्त्रं॥७७॥ तस्मिन्
ह्रदःसंहितमात्रएवक्षोभात्समाविद्धतरंगहस्तः॥

ताक्षःतरस्वीबलवान्सकुशः
धनुराततज्यंअधिज्यंकृत्वाभुजंगस्यकुमुदस्यनाशायगारुत्मतंगरुडदेवताकमस्त्रं
समाददे॥७७॥ ॥तस्मिन्निति॥ ॥तस्मिन्नस्त्रेसंहितमात्रेसत्येवह्रदःक्षोभाद्धेतोःसमा
विद्धाःसंघट्टिताः॥ तरंगाएवहस्तायस्यसः॥ ॥

रोधांसि निघ्नन् पातयन् अवपाते गजग्रहणे गर्त्ते मग्नः पतितः॥ अवपातस्तु हस्त्यर्थे गर्त्ते छन्नस्तृ
णादिनेति यादवः॥ वन्यः करीव परुषं घोरं ररास दध्वान॥ ७८॥ ॥ तस्मादिति॥ ॥ मथ्यमानात्समु
द्रादिवोद्धृत्तनक्रात् क्षुभितग्राहात् तस्माद्ध्रदात् लक्ष्म्या सार्धं सुरराजस्य इंद्रस्य वृक्षः पारिजात इ
व कन्यां पुरस्कृत्य भुजंगराजः कुमुदः सहसोन्ममज्ज॥ ७९॥ ॥ विभूषणेति॥ विशां पतिः मनु

रोधांसि निघ्नन्नवपातमग्नः करीव वन्यः परुषं ररास॥ ७८॥ तस्मात्समुद्रादिव मथ्यमाना
दुद्वृत्तनक्रात्सहसोन्ममज्ज॥ लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजंगराजः
७९॥ विभूषणप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशांपतिस्तं॥ सौपर्णमस्त्रं प्रतिसंज
हार प्रह्वेष्वनिर्बंधरुषो हि संतः॥ ८०॥

जपतिः॥ कुशः॥ द्वौ विशौ वैश्यमनुजौ इत्यमरः॥ वि

भूषणं प्रत्युपहारो हस्ते यस्य सः॥ तमुपस्थितं प्राप्तं कुमुदं वीक्ष्य सौपर्णं गारुत्मतमस्त्रं
प्रतिसंजहार॥ तथाहि॥ संतः प्रह्वेषु नम्रेषु अनिर्बंधरुषोऽनियतकोपा हि॥ ८०॥ ॥

त्रैलोक्येति॥ ॥ अस्त्रं विद्वानस्त्रविद्वान्॥ न लोकव्याद्दिनाषष्ठीनिषेधः॥ श्रितातिगमितागम्यादीनामुप
संख्यानात् द्वितीयासमासः॥ गारुडास्त्रमहिमाभिज्ञ इत्यर्थः॥ कुमुदः त्रयो लोकास्त्रैलोक्यं॥ चातु
र्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः॥ त्रैलोक्यनाथो रामः प्रभवो जनको यस्य तं॥ अत एव प्रभावात्
द्विषामंकुशं निवारकं मूर्धाभिषिक्तं राजानं॥ कुशं मानोन्नतेनापि मूर्ध्ना शिरसा वंद्य प्रणम्य ब

त्रैलोक्यनाथप्रभवं प्रभावात्कुशं द्विषामंकुशमस्त्रविद्वान्॥ मानोन्नतेनाप्यभिवंद्य मूर्ध्ना
मूर्धाभिषिक्तं कुमुदो बभाषे॥ ८१॥ अवैमि कार्यांतरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वां॥ सोहं कथं नाम तवाचरेयमाराधनीयस्य धृतेर्विघातं॥ ८२॥ ॥

भाषे॥ ८१॥ ॥ अवैमीति॥ ॥ त्वां उदंतात् रस्तं डलः इतिवत् कार्यांतरः कार्यार्थः॥ स्वानां स्वीयान्यत
दर्थ्यं रक्षांतरीपे पु चांतरमित्यमरः॥ सचासौ मानुषश्चेति तस्य विष्णोरामस्य सुताख्यां पुत्रसं
ज्ञां अपरां तनुं मूर्तिं अवैमि॥ आत्मा वै पुत्रनामासीति श्रुतेरित्यर्थः॥ सजातन्व्हं मारा धनीय
स्योपास्यस्य तव धृतेः प्रीतेः॥ धृञ् धारणे इति धातोः स्त्रियां क्तिः॥ विघातं नाम नाशं कथं नाम

चरेयमसंगतमित्यर्थः॥ ८२॥

कर्षरेति॥ ॥कराभिघातेनउत्थितः ऊर्ध्वंगतः कंडुको यस्याः सा कंडुका यं ऊर्ध्वंपतंतीत्यर्थः॥ से
यं बाला जवाद् अंतरिक्षात् ज्योतिर्नक्षत्रमिव॥ ज्योतिर्भद्योतदृष्टिषु इत्यमरः॥ अपतत् पततत् त्वदी
यं जैत्राभरणं आलोक्य आदत्त अग्रहीत्॥ ८३॥ तदिति॥ तदेतदाभरणं आजानुविलंबिना दा

कराभिघातोत्थितकंडुकेयमालोक्य बालातिकुतूहलेन॥ जवात्पतज्ज्योतिरिवां
तरिक्षादादत्त जैत्राभरणं त्वदीयं॥ ८३॥ तदेतदाजानुविलंबिता ना ते ज्याघातलेखा
किणलांछनेन॥ भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन॥ ८४॥ ॥

ज्याघर्षेण ज्याघातलेखा ज्यारेखा का रायं च यस्ते षां किणेचिह्नं तदेव लांछनं यस्य तेन भूमेः रक्षायाः परिघे
ण भूरक्षार्गलेन॥ परिघो योगभेदस्तु मुद्गरे ऽर्गलिघातयोरित्यमरः॥ अंसलेन बलवता तेन भु
जेन पुनर्योगं संगतिमुपैतु॥ एतैर्विशेषणैर्महाभाग्य शौर्यधुरत्वा बलवत्वादिगम्यते॥ ८४॥

इमामिति॥ ॥हे पार्थिव ते पादयोः शुश्रूषया परिचर्यया॥ शुश्रूषा श्रोतुमिच्छायां परिचर्या प्रदानयो
रिति विश्वः॥ आत्मापराधं आभरणग्रहणरूपं नुदंती परिजिहीर्षतीमित्यर्थः॥ आशंसायां भूत
वच्चेति चकाराद् वर्तमानार्थप्रत्ययः॥ आशीछानद्योर्नुमित्यस्य वैकल्पिकत्वान्नुमभावः॥ इमां मेय
वीयसीं कनिष्ठां स्वसारं भगिनीं कुमुद्वतीमनुमंतुं अंगीकर्तुं नार्हसीति नार्हस्येवेत्यर्थः॥ ८५॥ ॥

इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमंतुं॥ आत्मापराधं नु
दतीं चिराय शुश्रूषया पार्थिव पादयोस्ते॥ ८५॥ इत्यूचिवानुपहृता
भरणः क्षितीशं श्लाघ्यो भवान्स्वजन इत्यनुभाषितारं॥ ८६॥

इतीति॥ ॥इति पूर्वश्लोकोक्तमूचिवान्॥ उक्तवान्॥ ब्रूञः क्वसुः॥ उपहृताभरणः प्रत
र्पिताभरणः कुमुदः हे कुमुद त्वं भवान् श्लाघ्यः स्वजनो बंधुरित्यनुभाषितारं अनुवक्तारं
क्षितीशं॥ ॥

कुशं समेतबंधुः युक्तबंधुः सन् कन्यामयेन कन्यारूपेण कुलयोर्भूषणेन विधिवत्संयोजयामास।
न केवलं तदीयमेव किंतु स्वकीयमपि भूषणं तस्मै दत्तवानिति ध्वनिः। आमप्रत्ययानुप्रयोगयोर्व्यव
धानं तु प्रागेव समाहितं॥८६॥ ॥तस्या इति॥ ॥मनुजपतिना कुशेन साहचर्याय सहधर्माचरणा
य मांगल्यामंगले धूर्णा ऊर्णा मेषादिलोम ऊर्णा मेषादिजो मतिति इत्यमरः॥ ॥अत्र लक्षणपा

संयोजयां विधिवदास समेतबंधुः कन्यामयेन कुमुदः कुलभूषणेन॥८६॥ तस्याः स्पृ
ष्टे मनुजपतिना साहचर्याय हस्ते मांगल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य॥ दि
व्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानो दिगंतान् गंधोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः॥८७॥

प तन्निमित्तं सूत्रमुच्यते। तया वलयिनि वलयवति तस्याः कुमुद्वत्या हस्ते पाणौ उच्छिखस्योदर्चिषः
पावकस्य पुरोग्रे स्पृष्टे गृहीते सति दिगंतान् व्यश्नुवानो व्याप्नुवन् दिव्यस्तूर्यध्वनिरुदचरत् उत्थि
तः॥ तदनु आश्चर्यमेघाः मेघाः गंधेन उदग्रं उत्कटं पुष्पं पुष्पाणि जातावेकवचनं॥ ववृषुः॥ आ
श्चर्यशब्दस्य रौद्रं त्वमी त्रिषु चतुर्दशेत्यनुवचनात्त्रिलिंगत्वं॥८७॥ ॥

इत्थमिति॥ ॥इत्थं नागः कुमुदः त्रयाणां भुवनानां समाहारस्त्रिभुवनं॥ तद्धितार्थेत्यादिना तत्पुरुषः॥ अ
दंता द्विगुत्वेपि पात्राद्यंतत्वान्न पुंसकत्वं पात्राद्यंतैरनेकार्थो द्विगुर्लक्ष्यानुसारत इत्यमरः॥ तस्य गुरुः रा
मः तस्यौरसं धर्मपत्नीजं पुत्रं॥ औरसो धर्मपत्नीज इति याज्ञवल्क्यः॥ मैथिलेयं बंधुं कुशं लब्ध्वा कुशो
पि तक्षकस्य पंचमं पुत्रं कुमुदं बंधुं लब्ध्वा एकस्तयोरन्यतमः कुमुदः पितृवधेन रिपोर्वैनतेयात् गरु

इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं लब्ध्वा बंधुं तमपि च कुशः पंचमं तक्षकस्य॥ एकः शं
कां विषधररिपोरत्यजद्वैनतेयाच्छांतव्यालामवनिमपरः पौरकांतः शशास॥८८॥ ॥इति
श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ कुमुद्वतीपाणिग्रहणं नाम षोडशः सर्गः।
॥८९॥

डात् गुरुणा वैष्णवांशेन कुशेन त्याजितशंकोऽभूदिति भावः॥ शंकां भयं अत्यजत्॥ अ
परः कुशः शांतव्यालां कुमुदाज्ञया वीतसर्पभयां अत एव पौरकांतः पौराणां प्रियः सन् श
शास॥८७॥ ॥इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां संजीविन्यां षोडशः सर्गः॥१६॥ ॥

रघुवंश

२३

सर्ग. १६

राम.

२३

॥ श्रीगणेशाय नमः ॥ ॥ शारदा शारदांभोजवदना वदनांबुजे ॥ सर्वदा सर्वदास्माकं संनिधिं संनिधियात् ॥ १ ॥ अतिथिमिति ॥ कुमुद्वती काकुत्स्थात् कुशात् अतिथिं नाम पुत्रं चेतना बुधिः पश्चिमाद् इति मा यामिन्या रात्रेः यामात् प्रहरात् ॥ द्वौ यामप्रहरौ समावित्यमरः ॥ प्रसादं वैशद्यं इ

श्रीगणेशाय नमः ॥ ॥ अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती ॥ पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥ १ ॥ स पितुः पितृमान्वंशं मातुश्चानुपमद्युतिः ॥ अपुनात्सवितेवोभौ मार्गावुत्तरदक्षिणौ ॥ २ ॥ ॥ ॥

व प्राप ॥ बालसमये सर्वेषां बुधि वैशद्यं भवतीति प्रसिद्धिः ॥ १ ॥ स इति ॥ ॥ पितृमान् प्रशंसार्थे मतुप्प्रत्ययः ॥ सुशिक्षित इत्यर्थः ॥ अनुपमद्युतिः ॥ सवितुश्चेदं विशेषणं सोऽतिथिः पितुः कुशस्य वंशं मातुः कुमुद्वत्याश्च वंशं सविता उत्तरदक्षिणौ उभौ मार्गाविव अपुनात् पवित्रीकृतवान् ॥ २ ॥ राम १

तमिति ॥ ॥ अर्थान् शब्दार्थान् दारसंग्रहादिक्रियाप्रयोजनानि च विदंतीत्यर्थविदस्तेषां वरः श्रेष्ठः पिता कुशः तमतिथिं आदौ प्रथमं कुलविद्यानां आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिश्च शाश्वतीत्यास्ता सामर्थ्यमभिधेयं अग्राहयत् अबोधयत् ॥ पश्चात्पार्थिवकन्यानां पाणिमग्राहयत् स्वीकारितवान् ॥ उद्वाहयदित्यर्थः दंडनीत्यादिनकुवचनात्प्रहेर्ण्यंतस्य सर्वत्र द्विकर्मत्वं असौ तु के

तमादौ कुलविद्यानामर्थमर्थविदां वरः ॥ पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पिता ॥ ३ ॥ जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः ॥ अमन्यतैकमात्मानमनेकं वशिना वशी ॥ ४ ॥

प्राक् ॥ ३ ॥ जात्य इति ॥ ॥ जातौ भवः जात्यः कुलीनः शूरो वशी कुशोऽभिजातेन कुलीनेन ॥ अभिजातः कुलीनः स्यादित्यमरः ॥ शौर्यवता पराक्रमयुक्तेन वशिना तेनातिथिना कारणेन एकं आत्मानं एकोऽपि भवतीत्यनेकममन्यत सर्वगुणसाम्यादात्मजं आत्मन एव रूपांतरममंस्तेत्यर्थः ॥ ४ ॥ ॥

स इति॥ ॥ सः कुशः कुलोचितं कुलाभ्यस्तं इंद्रस्य साहाय्यकं सहकारित्वं योपधादित्यादिना वुञ् उपेयिवान् प्राप्तः सन् समरे नामतोऽर्थतश्च दुर्जयं दैत्यं जघान अवधीत्॥ तेन दैत्येन अवधि च हतश्च लुङि चेति हनो वधादेशः॥ ५॥ ॥ तमिति॥ ॥ कुमुद इति नाम्नो नागराज

सुकुलोचितमिंद्रस्य साहाय्यकमुपेयिवान्॥ जघान समरे दैत्यं
दुर्जयं तेन चावधीत्॥ ५॥ तं स्वसा नागराजस्य कुमुदस्य कुमु
द्वती॥ अन्वगात् कुमुदानंदं शशांकमिव कौमुदी॥ ६॥ ॥

स्य सर्पस्य स्वसा कुमुद्वती कुशपत्नी कुमुदानंदं शशांकं कौमुदी ज्योत्स्नेव तं कुशमन्वगात्॥ कुशस्य कुः पृथिवी तस्यां मुत् प्रीतिः सैवानंदो यस्येति कुमुदानंदः परानंदेन स्वयमानंदतीत्यर्थः॥ ६॥ ॥

तयोरिति॥ ॥ तयोः कुशकुमुद्वत्योः मध्ये एकः कुशः दिवस्पतेरिंद्रस्य सिंहासनार्धस्यैकदेशस्य भा(?)गासीत्॥ द्वितीया कुमुद्वती अपि शच्या इंद्राण्याः पारिजातांशस्य भागिनी ग्राहिणी॥ संप्रेचेत्यादिना त्रजते र्विनुण्प्रत्ययः॥ आवश्यकाधमर्ण्ययोर्णिनिः॥ अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीनिषेधः॥ ७॥ भर्तुः स्वामिनः कुशस्य पश्चिमां अंत्यामाज्ञामाज्ञां विपर्यये मत्पुत्रोऽभिषिक्तव्य इ

तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक्॥ द्वितीयापि सखी शच्याः पारिजातांशभागिनी॥ ७॥ तदात्मसंभवं राज्ये मंत्रिवृद्धाः समादधुः॥ स्मरंतः पश्चिमामाज्ञां भर्तुः संग्रामयायिनः॥ ८॥ ते तस्य कल्पयामासुरभिषेकाय शिल्पिभिः॥ विमानं नवमुद्वेदी चतुःस्तंभप्रतिष्ठितं॥ ९॥

त्येवं रूपां स्मरंतः मंत्रिवृद्धास्तदात्मसंभवं अतिथिं राज्ये समादधुर्निदधुः॥ ८॥ तदिति॥ ॥ ते मंत्रिणस्तस्यातिथेरभिषेकाय शिल्पिभिः रुद्वेदिकं उन्नतवेदिकं चतुःस्तंभप्रतिष्ठितं नवं विमानं मंडपं कल्पयामासुः कारयामासुः॥ ९॥

तत्रेति॥ तत्र विमाने भद्रपीठे पीठविशेषे उपवेशितं एनमतिथिं हेमकुंभेषु संभृतैः संगृ
हीतैः तीर्थवारिभिः करणैः प्रकृतयः प्रकृतयो मन्त्रिण उपतस्थुः॥१०॥ ॥नदद्भिरिति॥ ॥आ
हतं पुष्करं मुखं येषां तैः॥ पुष्करं करिहस्ताग्रे वाद्यभांडमुखे जले इत्यमरः॥ स्निग्धं मधुरं धी
रं च नदद्भिस्तूर्यैस्तस्यातिथेरविच्छिन्नसंततिः अविच्छिन्नपारंपर्यकल्याणं भाविशुभं अन्व

तत्रैनं हेमकुंभेषु संभृतैस्तीर्थवारिभिः॥ उपतस्थुः प्रकृतयो भद्रपीठोपवेशितं॥१०॥
नदद्भिः स्निग्धगंभीरं तूर्यैराहतपुष्करैः॥ अन्वमीयत कल्याणं तस्याविच्छिन्नसंत
ते॥११॥ दूर्वायवांकुरप्लक्षत्वगभिन्नपुटोत्तरं॥ ज्ञातिवृद्धैः प्रयुक्तं स जगृहे नीराजनावि
धिं॥१२॥

मीयत अनुमितं॥११॥ ॥दूर्वेति॥ ॥सोऽतिथिर्दूर्वाश्च यवांकुराश्च प्लक्षत्व
चश्च अभिन्नपुटाः बालपल्लवा मधूकपुष्पाणि इति केचित्॥ तेऽत्रोत्तराणि प्रधानानि ये
षु तं ताद्दृ॥ ज्ञातिषु ये वृद्धास्तैः प्रयुक्तां नीराजनाविधीन् जगृहे॥१२॥

पुरोहितेति॥ ॥पुरोहितपुरोगाः पुरोहितप्रमुखाः द्विजातयो ब्राह्मणाः जिष्णुं जयनशीलं तम
तिथिं जैत्रैः जयनशीलैरथर्वभिर्मन्त्रविशेषैः करणैः पूर्वमभिषेक्तुमुपचक्रमिरे॥१३॥ ॥तस्ये
ति॥ ॥तस्यातिथेर्मूर्ध्नि सशब्दं निपतंती ओघमहती महाप्रवाहा अभिषिच्यतेऽनेनेत्यभिषेकः
अभिषेकजलं स एव श्रीस्तस्य श्रीर्वा सप्रधि त्रिपुरद्विषः शिवस्य मूर्ध्नि निपतंती गंगेव व्यरोच

पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः॥ उपचक्रमिरे पूर्वमभिषेक्तुं द्विजातयः॥१३॥
तस्यौघमहती मूर्ध्नि निपतंती व्यरोचत॥ सशब्दमभिषेकश्रीर्गंगेव त्रिपुरद्विषः॥१४॥
स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वंदिभिः॥ प्रवृद्ध इव पर्जन्यः सारंगैरभिनंदितः॥१५॥

त॥ त्रयाणां पुराणां द्विषतीति विग्रहः॥१४॥ ॥स्तूयमान इति॥ ॥तस्मिन् क्षणेऽभिषेक
काले वंदिभिः स्तूयमानः सोऽतिथिः प्रवृद्धः प्रवृद्धवान्॥ कर्त्तरि क्तः॥ अत एव चातकै
रभिनंदितः सत्कृतः पर्जन्यो मेघ इवालक्ष्यत॥१५॥ ॥ ॥

तस्येति॥ ॥सन्मंत्रैः पूताभिः शुधाभिरद्भिः स्नानं प्रतीछतः कुर्वतः वृष्टिसेकाद्विद्युतोयं वैद्युतस्तस्याबि
धनस्याग्नेरिव द्युतिर्ववृधे॥१६॥ ॥सइति॥ ॥सोतिथिरभिषेकांते स्नातकेभ्यो गृहस्थेभ्यस्ताव
त्तावत्परिमाणं वसु धनं ददौ यावता वसुना एषां स्नातकानां पर्याप्तदक्षिणाः समग्रदक्षि
णा यज्ञाः समाप्येरन् तावद्ददावित्यन्वयः॥१७॥ ॥तत इति॥ ॥प्रीतमनसस्ते स्नातका

तस्य सन्मंत्रपूताभिः स्नानमद्भिः प्रतीछतः॥ ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः॥१६
स तावदभिषेकांते स्नातकेभ्यो ददौ वसु॥ यावत्तेषां समाप्येरन् यज्ञाः पर्याप्तदक्षिणाः॥१७॥
ते प्रीतमनसस्तस्मै यामाशिषमुदीरयन्॥ सा तस्य कर्मनिर्वृत्तैर्दूरं पश्चात्कृता फलैः॥
॥१८॥

तस्मै अतिथये यामाशिषमुदीरयन् आहरन् सा आशीस्तस्यातिथेः कर्मनिर्वृत्तैः पू
र्वपुण्यनिष्पन्नैः फलैः साम्राज्यादिभिर्दूरं दूरतः पश्चात्कृता। स्वफलदानस्य तदानीम
नवकाशात्कालांतरोदीक्षणेन च कारेत्यर्थः॥१८॥ ॥

बंधेति॥ ॥सोतिथिर्बद्धानां बंधछेदं वधार्हाणामवध्यतां धुरं वहंतीति धुर्या बलीवर्दादयस्तेषां धु
रो भारान्मोक्षं गवामदोहं च वत्सपानार्थं दोहनिवृत्तिं चादिशत् आदिदेश॥१९॥ ॥क्रीडेति॥ पं
जरस्थाः शुकादयोऽस्यातिथेः क्रीडापतत्रिणोपि किमुतान्ये इत्यपिशब्दार्थः॥ तदादेशात्त
स्यातिथेः शासनात् लब्धमोक्षाः संतः यथेष्टगतियेषां ते स्वेछाचारिणोऽभवन्॥२०॥ ॥तत इति॥

बंधछेदं स बद्धानां वधार्हाणामवध्यतां॥ धुर्याणां च धुरो मोक्षमदोहं चादिशद्गवां॥१९॥
क्रीडापतत्रिणोप्यस्य पंजरस्थाः शुकादयः॥ लब्धमोक्षास्तदादेशाद्यथेष्टगतयोऽभवन्॥२०॥
ततः कक्ष्यांतरन्यस्तं गजदंतासनं शुचि॥ सोत्तरछदमध्यास्त नेपथ्यग्रहणाय सः॥२१॥ ॥

सोऽतिथिर्नेपथ्यग्रहणाय प्रसाधनस्वीकाराय कक्ष्यांतरं हर्म्यांगणविशेषः॥ कक्ष्या प्रकोष्ठे ह
र्म्यादेरित्यमरः॥ तत्र न्यस्तं स्थापितं शुचि निर्मलं सोत्तरछदं आस्तरणं सहितं गजदंतस्यासनं
पीठमध्यास्त तत्रोपविष्ट इत्यर्थः॥२१॥ ॥

रघुवं-टी- तमिति॥॥तोयेननिर्णिक्तपाणयः क्षालितहस्ताः प्रसाधकाः अलंकर्तारो धूपेनगंधद्रव्यधूपेन सर्ग-१७
५ आश्यानकेशांतं ईषच्छुष्क केशप्रांतं शोषितकेशांतं॥वासैस्तैराकल्पस्य नेपथ्यस्य साधनैर्गंधमा
ल्यादिभिरुपसेदुः उपतस्थुः॥२२॥तइति॥॥मुक्तागुणेन मौक्तिकसरेणोन्नधं उद्धमंत

तंधूपाश्यानकेशांतंतोयनिर्णिक्तपाणयः॥आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः॥
२२॥तस्यमुक्तागुणोन्नधं मौलिमन्तर्गतस्रजं॥ प्रत्यूपुः पद्मरागेण प्रभामंडलशोभिना॥
२३॥चंदनेनांगरागं च मृगनाभिसुगंधिना॥ समापय्य ततश्चक्रुः पवित्रंन्यस्तरोचनं॥२४॥

र्गतिस्रजं ते प्रसाधकाअस्याऽतिथेमौलिं धम्मिल्लं प्रभामंडलशोभिना पद्मरागेण माणिक्ये
न प्रत्यपुः प्रत्युप्तं चक्रुः॥२३॥॥चंदनेनेति॥॥ततो मृगनाभ्याकस्तूर्या सुगंधिना चंदनेनां राम-
गरागमंगविलेपनं समापय्य विन्यस्ता रोचना गोरोचना यस्मिंस्तत्पत्रं पत्ररचनं चक्रुः॥२४॥ ५

आमुक्तेति॥॥आमुक्ताभरणा आसंजिताभरणाः स्रजोऽस्य संतीति स्रग्वी॥अस्मायामेधास्रजो
विनिरितिविनिप्रत्ययः हंसाश्चिह्नं यस्येति हंसचिह्नं यद्दुकूलं तद्वान्॥अत्र बहुव्रीहिणैवार्थसि
धेर्मतुवानर्थक्येपि सर्वधनीत्यादिवत्कर्मधारयादपि मत्वर्थीयप्रत्ययमिच्छंति॥एवमन्यत्रापि
द्रष्टव्यं॥राज्यश्रीरेव वधूस्तयावोढा॥तस्या वरः वोढा वधूः स्नुषा नवोढा स्त्री वरो जामातृ षिंगयो

मु आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलवान्॥आसीदतिशयप्रेक्ष्यः सराज्यश्रीवधूवरः॥
२५॥नेपथ्यदर्शिनश्छाया॥तस्यादर्शेहिरण्मये॥विरराजनवे सूर्ये मेरौ कल्पतरोरिव॥२६॥

रितिविश्वः॥सअतिशयरतिशयेन प्रेक्ष्यः दर्शनीयः॥आसीत्॥वरोप्येवं विशेषणः॥२५॥ने
पथ्येति॥॥हिरण्मयेसौवर्णे आदर्शे दर्पणे नेपथ्यदर्शिनो वेषं पश्यतस्तस्यातिथेः छा
या प्रतिबिंबं यथोदिते सूर्ये दर्पणकल्पे मेरौ यः कल्पतरुस्तस्य छायाइव विरराज॥तस्य
सूर्यसंक्रांतबिंबत्वासंभवान्मेरोरित्युक्तं॥२६॥॥

रघुवं टी·सं ६ सर्ग·१७

स इति॥ ॥सोतिथिः राजककुदानि राजचिह्नानि छत्रचामरादीनि प्राधान्ये राजलिंगे च वृषांसे ककुदोस्त्रियामित्यमरः॥ तेषु अग्र्याः पाणयो येषां तैः पार्श्ववर्त्तिभिर्जनैः उदीरितालोकः॥ उच्चारितजयशब्दः सुधर्मायाः देवसभायाः अनवमामन्यूनां सभां आस्थानीं ययौ॥ स्यात्सुधर्मा

सराजककुदव्यग्रपाणिभिः पार्श्ववर्त्तिभिः। ययावुदीरितालोकः सुधर्मानवमां सभां॥२७ वितानसहितं तत्र भेजे पैत्रकमासनं॥ चूडामणिभिरुद्घृष्टपादपीठं महीक्षितां॥२८॥

देवसभा इत्यमरः॥२७॥ ॥वितानेति॥ ॥तत्र सभायां वितानेन उल्लोचेन सहितं अस्त्री वितानमुल्लोचमित्यमरः॥ महीक्षितां राज्ञां चूडामणिभिर्मुकुटैरुद्घृष्टं उद्घृष्टं पादपीठं यस्य तत्॥ पितुः इदं पैत्रकं॥ ऋतष्ठञितिठञ्प्रत्ययः॥ आसनं सिंहासनं भेजे॥२८॥

राम ६

कनाविति॥ ॥सोतिथिः कुमारत्वात् यौवराज्यादनंतरं अधिराजस्य भावः आधिराज्यं अवाप्य रेखाभावात् खंडत्वमवाप्येव पूर्णतां गतश्चंद्रमा इव बभाविति आरभ्यानंतरदपि यौवराज्याभावनिष्क्रांपेन्याय एव॥२९॥ ॥शुशुभ इति॥ ॥ तेनाक्रांतं श्रीवत्सो नाम मंगलहविशेषः श्रीवत्सरूपं श्रीवत्सं नंद्यावर्त्तादि विंछं इदानहवस्तयोरिति सक्रुनः॥ महद्धिकं मंगलगृहं समारूपं कौस्तुभेन मणिनांके

बनौ भूय: कुमारत्वादाधिराज्यमवाप्य सः॥ रेखाभावादुपारूढ सामग्र्यमिव चंद्रमाः॥२९॥ शुशुभे तेन चाक्रांतं मंगलायतनं महत्॥ श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव केशवं॥३०॥ प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणं॥ मूर्त्तिमंतममन्यंत विश्वासमनुजीविनः॥३१॥

तं श्रीवत्सलक्षणं केशवस्येदं केशवं वक्ष इव शुशुभे॥३०॥ ॥प्रसन्नेति॥ ॥मुखरागो मुखकांतिर्यस्य तं स्मितपूर्वं यथा तथा अभिभाषिणं अभाषणशीलं तमतिथिं अनुजीविनो मूर्त्तिमंतं विग्रहवंतं विश्वासं विश्रंभं अमन्यंत समौ विश्रंभविश्वासावित्यमरः॥३१

सइति ॥ पुरुहूतश्रीः सोतिथिः कल्पद्रुमाणां निभाः समानाः ध्वजा यस्याः सोपुरमयोध्यामै
रावतस्योजः इवौजो बलं यस्य तेन नागेन कुंजरेण क्रममाणाम्यकरत् ॥ अनुपसर्गादिति वैक
ल्पिकमात्मनेपदं द्यां चकार स्वर्गलोकसदृशीं चकारेत्यर्थः ॥ द्यौः स्वर्गसुरवर्त्मनोरिति वि

सपुरं पुरहूतश्रीः कल्पद्रुमनिभध्वजं ॥ क्रममाणश्चकार द्यां
नागेनैरावतौजसा ॥ ३२ ॥ तस्यैकस्योच्छ्रितं छत्रं मूर्ध्नि तेनामल
त्विषा ॥ पूर्वराजवियोगोष्णं कृत्स्नस्य जगतो हृतं ॥ ३३ ॥ ॥

श्व ॥ ३२ ॥ ॥ तस्येति ॥ ॥ तस्यैकस्य मूर्ध्नि छत्रं उच्छ्रितं उन्नमितं अमलत्विषा तेन छत्रेण
कृत्स्नस्य जगतः पूर्वराजस्य कुशस्य वियोगेन यदौष्ण्यं संतापस्तद्धृतं नाशितं ॥ अत्र छ
त्रोन्नमनसंतापहरणे तल्लक्षणयोः कारणकार्ययोर्भिन्नदेशत्वेसत्यसंगतिरिति ॥ ३३ ॥

धूमादिति ॥ ॥ अग्नेर्धूमात्पश्चादनंतरं शिखा ज्वाला रवेरुदयादनंतरं अंशवउन्निषंत इति शेषः ॥ सो
तिथिजः सामग्र्या दीनां वृत्तिस्वभावमतीत्य गुणैः सममं सहसैव उत्थितः ॥ अपूर्व[illegible] इत्यर्थः ॥ ३४ ॥
तमिति ॥ ॥ पौरयोषितः प्रीत्या विशदैः प्रसन्नैः नेत्रैः करणैः तमतिथिमन्वयुरनुजग्मुः ॥ दृ
ष्टिप्रसरमकार्षुरित्यर्थः ॥ कथमिव शरदिप्रसन्नैर्ज्योतिर्भिर्नक्षत्रैर्विभावर्यो रात्रयो ध्रुवमिव ॥

धूमादग्नेः शिखाः पश्चादुदयादंशवो रवेः ॥ सोतीत्य तेजसां वृत्तिं सममेवोत्थितो गुणैः ॥ ३४ ॥
तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः ॥ शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य इव ध्रुवं ॥ ३५ ॥
अयोध्यादेवताश्चैनं प्रशस्तायतनार्चिताः ॥ अनुदध्युरनुध्येयं सान्निध्यैः प्रतिमागतैः ॥ ३६ ॥
यावन्नाश्यायते वेदिरभिषेकजलैः प्लुता ॥ ध्रुवपाशब्दस्तात्काल्चकस्येत्यर्थः ॥ ३५ ॥ ॥ अयो
ध्येति ॥ ॥ प्रशस्तेष्वायतनेषु आलये ष्वर्चिता अयोध्यादेवताश्च अनुध्येयं अनुग्राह्यमेनमति
थिं प्रतिमागतैरर्चासंक्रांतैः सान्निध्यैः सन्निधानैरनुदध्युरनुजगृहुः ॥ अनुध्यानमनु
ग्रहः स्तुत्यतमानां ॥ तदनुग्रहबुध्या सन्निदधुरित्यर्थः ॥ ३६ ॥ यावदिति ॥ ॥ अभिषेकजलैरा
प्लुता सिक्ता वेदिरभिषेकवेदिर्यावन्नाश्यायते न शुष्यति कर्तरि लट् ॥

तावदेवास्य वेलांतं वेलापर्यंतं प्राप ॥ ३७ ॥ स इति ॥ ॥ धर्मे तिष्ठंतीति धर्मस्थाः सभ्याः
राज्ञां सभासदः कार्याः रिपौ मित्रे च ये समा इत्युक्तलक्षणास्तेषां सखा धर्मस्थसखस्तत्सहित इत्यर्थः ॥
अतंद्रितोऽनलसः स नृपः शश्वदन्वहं अर्थिनां साध्यार्थवतां उत्तमवर्णानां प्रत्यर्थिनां तद्विरोधि
नां अधमर्णानां च संशयछेद्यान् संशयाधतोः छेद्यान् परिछेद्यान् संदिग्धत्वाद्वत्स्पति निर्णया नि

तावदेवास्य वेलांतं प्रतापः प्राप दुःसहः ॥ ३७ ॥ स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयं ॥
ददर्श संशयछेद्यान्व्यवहारानतंद्रितः ॥ ३८ ॥ वसिष्ठस्य गुरोर्मंत्राः सायकास्तस्य धन्विनः ॥
किं तत्साध्यं यदुभये साधयेयुर्न संगताः ॥ ३९ ॥ त्यर्थः ॥ व्यवहारान् ऋणादीन् विवादान् स्वयं दद
र्श अनु संदधौ न तु प्राड्विवाकमेव नियुक्तवान् ॥ इत्यर्थः ॥ अत्र याज्ञवल्क्यः ॥ व्यवहारान्नृप
पश्येत्सभ्यैः परिवृतोऽन्वहमिति ॥ ३८ ॥ वसिष्ठस्येति ॥ ॥ गुरोर्वसिष्ठस्य मंत्राः धन्विनस्तस्यातिथेः सायका इत्युभे संगताः संतो यत्साध्यं न साधयेयुस्तत्तादृगसाध्यं किं न किंचिदित्यर्थः ॥ तेषा
मसाध्यं किंचिन्नास्तीति भावः ॥ ३९ ॥ ॥

तत इति ॥ ॥ ततः परं व्यवहारदर्शनानंतरं भृत्यान् अनुजीविन ः अभिव्यक्तं मुखप्रसादादिलिंगैः
स्फुटीकृतं यत्सौमनस्यं स्वामिनः प्रसन्नत्वं तेन निवेदितैः सूचितैः पाकाभिमुखैः सिद्धप्रायैः
विज्ञापनानां विज्ञप्तीनां फलैः प्रेप्सितार्थैः युयोज योजयामास ॥ अत्र बृहस्पतिः ॥ नियुक्तकर्म
निःपन्नौ वित्तप्तौ च यदृच्छया ॥ भृत्यान् धनैर्मानयंस्तु न चोप्यक्षेप्यस्य तान्व्रजेदिति ॥ कवि

ततः परमभिव्यक्तसौमनस्यनिवेदितैः ॥ युयोज पाकाभिमुखैर्भृत्या
न्विज्ञापनाफलैः ॥ ४० ॥ प्रजास्तद्गुरुणा नद्यो नभसेव विवर्धिताः ॥ त
स्मिंस्तु भूयसीं वृद्धिं नभस्ये ता इवाययुः ॥ ४१ ॥ ॥ ह ॥ ॥

श्च वक्ष्यति ॥ अक्षोभ्य इति ॥ अत्र सौमनस्य फलयोजनवादिभिर्न्यपस्य दृक्षसमाधिर्ध्वन्यत इत्य
नुसंधेयं ॥ ४० ॥ प्रजा इति ॥ ॥ प्रजाः जनाः तस्यातिथेर्गुरुणा पित्रा कुशेन नभसा श्रावणेन
नद्य इव वर्धितास्तास्मिन्नतिथौ तु नभस्ये भाद्रपदे मासे ता इव नद्य इव भूयसीं वृद्धिं अतुछयं
आययुः ॥ प्रजा पोषणेन पितरमतिशायितवान् इत्यर्थः ॥ ४१ ॥ ॥

यदिति ॥ ॥ सोतिथिः यद्वाक्यं दानपात्रादिविषयं उवाच ॥ तन्मिथ्याऽनृतं नाभूत् ॥ यद्वस्तु ददौ
तन्न जहार न पुनरादंदे ॥ किंतु शत्रून् उद्धृतान् उद्धृत्योत्खाय प्रतिरोपयन् पुनः स्थापयन् न गृह्ण
ते ॥ तस्य नियमोऽभूत् ॥ ४२ ॥ ॥ वय इति ॥ ॥ वयोरूपविभूतीनां यौवनसौंदर्यैश्वर्याणां मध्ये एकैकं
मदकारणं मदहेतुः ॥ तानि मदकारणानि तस्मिन् राज्ञि समस्तानि मिलितानि तथापि तस्यातिथेः

यदुवाच न तन्मिथ्या यद्ददौ न जहार तत् ॥ सोभूद्भग्नव्रतः शत्रूनुत्खाय प्रतिरोपयन् ॥ ४२ ॥
वयोरूपविभूतीनामेकैकं मदकारणं ॥ तानि तस्मिन् समेतानि न तस्योत्सिषिचुर्मनः ॥ ४३ ॥

मनो नोत्सिषिचे न जगर्व सिंचतेः स्वरितेतत्वादात्मनेपदं ॥ अत्र वयोरूपादीनां गर्वहेतुत्वान्म
दस्य मदिराकार्यत्वेन तत्कारकत्वान्मदशब्देन गर्वो लक्ष्यत इत्याङ्कः ॥ उक्तंच ॥ ऐश्वर्यरूपत
रुण्यकुलविद्याबलैरपि ॥ इष्टलाभादिनान्येषामवज्ञा गर्व ईरितः ॥ मदस्त्वानंदसंदोह संभे
दो मदिराकृत इति ॥ अत एव कविनापि नोत्सिषिचुरित्युक्तं न तु ममादेति ॥ ४३ ॥ ॥

इत्थमिति ॥ ॥ इत्थमनुवासरमन्वहं प्रकृतिषु प्रजासु जनितरागासु सतीषु स राजा नवोपि दृ
ढमूलो द्रुम इवाक्षोभ्योऽधृष्यः आसीत् ॥ ४४ ॥ ॥ अनित्या इति ॥ ॥ यतो बाह्याः शत्रवः प्रति
नृपाः अनित्याः ॥ द्विषंति स्निह्यंति चेत्यर्थः ॥ किंच ते बाह्या विप्रकृष्टा दूरस्थाश्चातः सोऽभ्यं
तरानंतर्वर्तिनो नित्यान् षड्रिपून् कामक्रोधादीन् पूर्वमजयत् ॥ अंतःशत्रुजये बा

इत्थं जनितरागासु प्रकृतिष्वनुवासरं ॥ अक्षोभ्यः स नवोप्यासीद्दृढमूल इव द्रुमः ॥
४४ ॥ अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यदा ॥ अतः सोभ्यंतरान्नित्यान्षट् पूर्व
मजयद्रिपून् ॥ ४५ ॥ प्रसादसुमुखे तस्मिंश्चपलापि स्वभावतः ॥ निकषे हेमलेखेव
श्रीरासीदनपायिनी ॥ ४६ ॥

ह्या अपि न दुर्जया इति भावः ॥ ४५ ॥ ॥ प्रसादेति ॥ ॥ स्वभाव
तश्चंचला चपला श्रीः प्रसादसुमुखे प्रसन्नवदने तस्मिन् नृपे निकषे कषोपले हेमलेखे
वानपायिनी स्थिरा आसीत् ॥ ४६ ॥ ॥

कातर्यमिति॥ ॥केवलाच्छौर्यवर्जितानीतिः कातर्यंभीरुत्वं शौर्यं केवलमित्यनुषंजनीयं॥ नी
तिरहितं शौर्यं श्वापदचेष्टितं व्याघ्रादिचेष्टामित्यभिप्रायं इत्यर्थः॥ व्याघ्रादयो वनेचराः पशवः श्वा
पदा मता इति हलायुधः॥ अतो हेतोः सोतिथिः समेताभ्यां संगताभ्यां उभाभ्यां नीतिशौर्याभ्यां
भ्यां सिद्धिं जयप्राप्तिमन्विय एषगवेषितवान्॥ ४७॥ ॥नेति॥ ॥न्कस्ताः सर्वतः प्रहिताः प्रणि
कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितं॥ अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः॥ ४७॥ न तस्य मंडले राज्ञो न्यस्तप्रणिधिदीधितेः॥ अदृष्टमभवत्किंचिद्व्यभ्रस्येव वि
वस्वतः॥ ४८॥
धयः चरा एव दीधितयो रश्मयो॥ यस्य प्रणिधिः प्रार्थने चर इति विश्वः॥
तस्य राज्ञः व्यभ्रस्य निर्मेघस्य विवस्वतः सूर्यस्य मंडले स्वविषये किंचिदल्पमपि अदृष्ट
मज्ञातं नाभवन्नास्तिस्म॥ चारचक्षुषा सर्वं पश्यतीत्यर्थः॥ ४८ ॥

रात्रिमिति॥ ॥रात्रौ च दिवा च रात्रिंदिवं। अचतुरेत्यादिना अधिकरणार्थयोर्द्वंद्वसमासांतो निपातः
अस्मयांतत्वादव्ययं॥ अत्र षष्ठ्यर्थलक्षणतया रात्रिंदिवयोर्द्वंद्वसमासांतो निपातः॥ रात्रिंदिवमि
त्यहोरात्रयोरित्यर्थः॥ तयोर्विभागा अंशाः प्रहरादयस्तेषु महीक्षिता राज्ञा यदादिष्टं इदमस्मि
न्काले कर्तव्यमितिमन्वादिभिरुपदिष्टं तत्स राजा विकल्पपराङ्मुखः संशयरहितः सन्नियो
गेन निश्चयेन सिषेवे॥ अनुष्ठितवानित्यर्थः॥ अत्र कौटिल्यः॥ कार्यणां योगविकल्पसमुच्चया
रात्रिंदिवविभागेन यदादिष्टं महीक्षिता॥ तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः॥ ४९॥
मंत्रः प्रतिदिनं तस्य बभूव सह मंत्रिभिः॥ स जातु सेव्यमानोपि गुप्तद्वारो न सूच्यते॥ ५०॥
भवंति। अनेनैवोपायेन नान्येन नियोगः॥ अनेन वान्येन वेति विकल्पः॥ अनेन चेति स
मुच्चय इति॥ ४९॥ ॥मंत्र इति॥ ॥तस्य राज्ञः प्रतिदिनमन्वहं मंत्रिभिः सह मंत्रो विचारो बभू
व॥ स सेव्यमानोऽन्वहमावर्त्यमानोपि जातु कदाचिदपि न सूच्यते न प्रकाश्यते॥ तत्र हे
तुः गुप्तद्वारा इति संवृतेंगिताकारादिज्ञानमार्ग इत्यर्थः॥ ५०॥ ॥

परेष्विति॥ ॥यथाकालमुक्तकालानतिक्रमेणस्वपन्नपिसोतिथिः परेषुशत्रुषुस्वेषुस्वकीये
षुचमंत्र्यादितीर्थेषुक्षितिरोप ः॥क्षिप्तैःप्रहितैरविज्ञाताःपरस्परेयेषांतैरन्योन्याविज्ञातैरि
त्यर्थः॥अपसर्पैश्चरैः॥अपसर्पचरःस्पशइत्यमरः॥ जजागारबुधवान्॥चारमुखेनसर्वदासर्व
मज्ञासीदित्यर्थः॥अत्रकामंदकः॥चारान्विचारयेत्तीर्थेष्वात्मनश्चपरस्यच॥पाखंड्यादीनविज्ञा
नमन्योन्यमितरैरपिचेति॥५१॥नयेति॥ ॥नयमुख्याः कल्याणप्रधानाः नतुविपरीताःप्रत्यवेक्ष्याः

परेषुस्वेषुचक्षिप्तैरविज्ञातपरस्परैः॥ सोपसर्पैर्जजागारयथाकालंस्वपन्नपि॥५१॥
नयमुख्याःसमारंभाःप्रत्यवेक्ष्यानिरत्ययाः॥ गर्भशालिसधर्माणस्तस्यगूढंविपेचिरे॥५३॥

एतावत्कृतेएतावत्कर्तव्यमित्यनुसंधानेनविचारणीयाअतएवनिरत्ययानिर्बाधाः॥गर्भेंतराले
पच्यंतेयेशालयस्तेषांसमधर्माणः समानधर्माणः अतिनिगूढाइत्यर्थः॥धर्मादनिचकेवला
दित्यनिच्प्रत्ययःसमासांतः॥तस्यराज्ञःसमारंभाइतिसमारंभाःकर्माणिगूढंप्रकारकं
प्रकारांविपेचिरेफलिताइत्यर्थः॥फलानुमेयाःप्रारंभास्तस्येत्यर्थः॥५३॥ ॥

अपथेनेति॥ ॥सोतिथिः उपचितोवृद्धिंगतोपिसन्नजातुकदाचिदपिअपथेनामार्गेणन
प्रवृत्तेनप्रवृत्तः मर्यादांनविजहावित्यर्थः॥तथाहिलवणांभसोलवणसागरस्यवृद्धौ
पूरोत्पीडेसत्यांनदीमुखेनैवनदीप्रवेशमार्गेणैवप्रस्थानंनिःसरणंनान्यथेत्यर्थः॥५३॥

अपथेनप्रववृतेनजातूपचितोपिसः॥
वृद्धौनदीमुखेनैवप्रस्थानंलवणांभसः॥५३॥
पित्रासंवर्धितोनित्यंकृतास्त्रःसांपरायिकः॥॥

पित्रेति॥ ॥दंडोदमःसेव्यंवातदृतोदंडवतोदंडसंपन्नस्यतस्यराज्ञःपित्राकुशेननित्यंसं
वर्धितः॥पुष्टः कृतास्त्रःशिक्षितास्त्रःसंपरायोयुद्धं॥युद्धायत्योःसंपरायइत्यमरः॥त
मर्हतिइतिसांपरायिकः॥ ॥

तदर्हतीति ठक्प्रत्ययः ॥ दंडः सैन्यं दंडो यमे मानभेदे लगुडे बलसैन्ययोरिति विश्वः ॥ स्वदेहा
न्न व्यशिष्यत न व्यघत स्वदेहेपि विशेषणानि योज्यानि मूलबलं स्वदेहमिवारक्षदित्यर्थः
५४॥ ॥ दुर्गाणीति ॥ ॥ द्विषां रोद्धुः रोधकस्यापि न तु स्वयं रोध्यस्येत्यर्थः ॥ तस्य राज्ञो दुर्गाणि
परै दुर्धर्षाणि दुर्गाणि महीदुर्गादीन्यासन् ॥ न च निर्भीकस्य किं दुर्गैः दुर्गैरिति किं वाच्यमि

तस्य दंडवतो दंडः स्वदेहान्न व्यशिष्यत ॥ ५४ ॥ दुर्गाणि दुर्ग्रहाण्यासंस्त
स्य रोद्धुरपि द्विषां ॥ न हि सिंहो गजास्कंदी भयाद्गिरिगुहाशयः ॥ ५५ ॥

त्यर्थांतरन्यासमुखेनाह ॥ नहीति ॥ ॥ गजानास्कंदति हिनस्तीति गजास्कंदी सिंहो
भयाद्धेतोर्गिरिगुहासु शेत इति गिरिगुहाशयः ॥ न हि ॥ किं तु स्वभावत इति शेषः ॥ अधि
करणे शेतेरित्यच्प्रत्ययः ॥ अत्र मनुः ॥ धनुर्दुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च ॥ नृदुर्गं गि
रिदुर्गं वा समाश्रित्य वसेद्बुध इति ॥ ५५ ॥

काममिति ॥ ॥ प्रकृतिवैराग्यं प्रजापरागं दैवाद्युत्पन्नमिति शेषः ॥ सद्यः कामं सम्यक् शमयितुं प्र
तिकर्तुं क्षमः शक्तः स राजा यस्य प्रकृतिवैराग्यस्य प्रतीकारः कार्यः कर्तव्यः ॥ अनर्थहेतुकृत्या
दित्यर्थः ॥ तद्वैराग्यं न उदपादयत् ॥ उत्पन्नप्रतीकारादनुत्पादनं वरमिति भावः ॥ अत्र कौ
टिल्यः ॥ क्षीणाः प्रकृतयो लोभं लुब्धा यांति विरागतां ॥ विरक्ता यांत्यमित्रं वा भर्तारं वा घ्नंति स्वयं ॥

कामं प्रकृतिवैराग्यं सद्यः शमयितुं क्षमः ॥ यस्य कार्यः प्रतीकारः स तन्नैवोदपादयत् ॥ ५६
शक्येष्वेवाभवद्यात्रा तस्य शक्तिमतः सतः ॥ समीरणसहायोपि नांभःप्रार्थी दवानलः ॥ ५७ ॥

तस्मात्प्रकृतीनां विरागकारणानि नोत्पादयेदिति ॥ ५६ ॥ शक्येष्विति ॥ ॥ शक्तिमतः शक्तिसं
पन्नस्यापि सतस्तस्य राज्ञः शक्येषु शक्तिविषयेषु स्वस्माधीनबलेषु एव विषयेषु यात्रा दंडयात्राभ
वत् ॥ न तु समधिकेष्वित्यर्थः ॥ तथा हि ॥ समीरणसहायोपि दवानलः अंभःप्रार्थी जलान्वे
षी न दग्धुमिति शेषः ॥ किं तु तृणकाष्ठादिकमेवान्विष्यतीत्यर्थः ॥ अत्र कौटिल्यः ॥ समज्यायो
भ्यां संदधीत हीनेन विगृह्णीयादिति भावः ॥ ५७ ॥

नै।

निति॥ ॥सराजाऽर्थकामाभ्यां धर्मं न बबाधे न नाशितवान्॥ तेन धर्मेण ततो अर्थकामौ अर्थका
मेन कामं वाऽर्थेन न बबाधे॥ एकत्रैवासक्तो नाभूदित्यर्थः। किंतु त्रिषु धर्मार्थकामेषु सदृ
शस्तुल्यवृत्तिरभूदिति शेषः॥५८॥ ॥हीनानीति॥ ॥मित्राणि हीनानि अतिक्षीणानि चेदनुप

न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ॥ नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु॥५८॥
हीनान्यनुपकर्तॄणि प्रवृद्धानि विकुर्वते। तेन मध्यमशक्तीनि मित्राणि स्थापितान्यतः॥५९॥

कारीणि अनुपकर्तॄणि॥ प्रवृद्धानि अतिसमृद्धानि चेद्विकुर्वते विरुद्धं चेष्टंते अपकुर्वंतीत्य
र्थः॥ अकर्मकाच्चेत्यादिना आत्मनेपदं॥ अतः कारणात्तेन राज्ञा मित्राणि सुहृदः मित्रं सुहृ
दि मित्रोऽर्क इति विश्वः मध्यमशक्तीनि नातिक्षीणोच्छ्रितानि यथा तथा स्थापितानि॥५९॥ ॥
य

शक्येष्वेवाभवद्यात्रेत्यादिना उक्तमर्थं सोपस्कारमाह॥ ॥परेति॥ ॥परात्मनोः शत्रोरात्मनश्च शक्त्या
दीनां शक्तिदेशकालादीनां बलाबलं न्यूनाधिकभावं परिच्छिद्य निश्चित्य एभिः शक्त्यादिभिः प
रस्मात् शत्रोर्बलिष्ठः स्वयमतिशयेन बलवांश्चेत्॥ बलशब्दात् मतुबंतादिष्ठन्प्रत्ययः॥ विन्म
तोर्लुगिति मतुपो लुक्॥ ययौ यात्रां चक्रे॥ अन्यथा बलिष्ठश्चेदास्त अतिष्ठत्॥ न ययावित्यर्थः॥ अ

परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलं॥ ययावरीन्विशिष्टश्चे
त्परस्मादास्त सोऽन्यथा॥६०॥ कोशेनाश्रयणीयत्वमिति तस्यार्थसंग्रहः॥

चमनुः॥ यदा मन्येत भावेन हृष्टपुष्टं स्वकं बलं। परस्य विपरीतं च तदा यायाद्रिपुं प्रति॥
यदा तु स्यात्परिक्षीणो वाहनेन बलेन च॥ तदासीत प्रयत्नेन शनकैः सांत्वयन्नरी
निति॥६०॥ कोशेनेति॥ ॥कोशेन अर्थचयेन आश्रयणीयत्वं जननीयत्वं जनवतीति शेषः
इति हेतोस्तस्य राज्ञः अर्थसंग्रहः आसीत्॥ इति शेषः॥ न तु लोभादित्यर्थः॥ ॥

तथाहि॥ अंबुगर्भो यस्य सः॥ अंबुगर्भः जीवनस्य जलस्य मूतः पुटबंधो जीमूतो मेघः॥ मूङ्‌बंध
ने॥ पृषोदरादित्वात्साधुः॥ चातकैः आसमंतादर्द्यते सेव्यते॥ नतु कत्रीरिक्तः॥ अत्र कामंदकः॥ धर्म
हेतोस्तथार्थाय भृत्यानां रक्षणाय च॥ अपदर्थं च संरक्ष्यः कोशो धर्मवता सदेति॥ ६१॥ ॥ परेति
स राजा परेषां कर्माणि सेतुवार्त्तादीन्यपहंतीति परकर्मापहः सन्‌॥ अन्येष्वपि हृपत इत्यपि

अंबुगर्भो हि जीमूतश्चातकैरभिगम्यते॥ ६१॥ परकर्मापहः सोभूदुद्यतः स्वे
षु कर्मसु॥ आवृणोदात्मनो रंध्रं रंध्रेषु प्राहरद्द्विषां॥ ६२॥ ॥छ॥॥

हृपत इत्यपि शब्दसामर्थ्याद्धंतेऽप्रत्ययः॥ स्वेषु कर्मसु उद्यतः उद्युक्तोभूत्‌ किं
चिद्रिपून्प्रहरन्‌ आत्मनो रंध्रं व्यसनादिकं आवृणोत्‌ संवृतवान्‌॥ अत्र मनुः॥ नास्य
छिद्रं परो विंद्याद्विद्याच्छिद्रं परस्य तु॥ गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्मनः॥ ६२॥

तप इति॥ ॥ विघ्नेभ्यस्तपो रक्षन्‌॥ तस्करेभ्यः संपदश्च रक्षन्‌ स राजा आश्रमैर्ब्रह्मचर्यादिभिर्ब्राह्म
णादिभिरपि यथास्वं स्वं स्वमनतिक्रम्य षडंशभाक्‌॥ षष्ठोंऽशः षडंशः तं भजतीति॥ संरक्षणा
द्रक्ष्यवृत्तिविषये पूरयार्थत्वमुक्तं प्राक्‌॥ चक्रे यथाक्रमं आश्रमैस्तपसः वर्णैः संपदां च षष्ठ
शभाक्कृत इत्यर्थः॥ ६३॥ ॥ सर्पस्येति॥ ॥ सर्पस्य शिरोरत्नमिवास्य राज्ञः शक्तित्रयं परः

तपो रक्षन्स विघ्नेभ्यस्तस्करेभ्यश्च संपदः॥ यथास्वमाश्रमैश्चक्रे वर्णैरपि षडं
शभाक्‌॥ ६३॥ सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः॥ स चकर्ष परस्मात्त
दयस्कांत इवायसं॥ ६४॥ वापीष्विव स्रवंतीषु वनेषूपवनेष्विव॥ ॥

शत्रुर्न चकर्ष स तु परस्माच्छत्रोः शक्तित्रयं अयस्कांतो मणिविशेषः॥ आयसं लोह
विकारमिव चकर्ष॥ ६४॥ ॥ वापीति॥ ॥ स्रवंतीषु नदीषु वापीषु दीर्घिकास्विव॥ वनेष्वर
ण्येषूपवनेष्वारामेष्विव॥ वापी तु दीर्घिकेत्यमरः॥ आरामः स्यादुपवनमित्यम ॥

र:॥ अद्रिषु रत्नकीयेषु वेश्मस्विव सार्थाः वणिक्प्रभृतयः॥ स्वैरं स्वेच्छया चेरुः सञ्चरंति स्म॥६५॥
स्वनिभिरिति॥ ॥ धनं मि स्तस्मै राज्ञे रक्षां सदृशीं रक्षणानुरूपं वेतनं हस्तिनं दिदेश ददौ॥ कथं तदाह।
खनिभिराकरैः॥ खनिः स्त्रियामाकरः स्यादित्यमरः॥ रत्नं मणिः स्यादिकं सुषुवे जीजनत्॥ क्षे
त्रैः सस्यं वनैर्गजान् हस्तिनः सुषुवे॥६६॥ ॥ सगुणेति॥ ॥ षण्मुखविक्रमः कुमारपराक्रमः सरा

सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु॥६५॥ खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजा
न्॥ दिदेश वेतनं तस्मै रक्षासदृशमेव भूः॥६६॥ स गुणानां बलानां च षण्णां षण्मुखविक्र
मः॥ बभूव विनियोगज्ञः साधनीयेषु वस्तुषु॥६७॥

जा षण्णां गुणानां संधिविग्रहादीनां बला
नां मूलभृत्यादीनां च साधनीयेषु वस्तुषु साध्येषु अर्थेषु विनियोगं जानातीति विनियोग
ज्ञः इति वा विनियोगज्ञः॥ कर्मविवक्षायामुपपदसमासः॥ अतोनुपसर्गे क इति कप्रत्य
यः॥ शेषविवक्षायां षष्ठीसमासः। इगुपधेत्यादिना कप्रत्ययः॥ बभूव इदमत्र प्रयोक्तव्यं राम॰ १५

इतीति॥ ॥ इति चतुर्विधां सामाद्युपायैरिति शेषः॥ राजनीतिं दंडनीतिं क्रमात् सामादिक्रमादे
व प्रयुंजानः स राजा आतीर्थात् मंत्र्याद्यष्टादशात्मकतीर्थपर्यंत॥ योऽसौ जलावतारे च मंत्र्याद्यष्टा
दशस्वपि। पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादिति हलायुधः॥ तस्याः नीतेः फलमप्रतीघातं अप्रतिबं
धं प्रतिघातो ज्ञानं शो प्राप्तवान्॥ मंत्र्यादिषु यमुद्दिश्य यस्तूपायः प्रयुज्यते स तस्य फलतीत्यर्थः

इति क्रमात् प्रयुंजानो दंडनीतिं चतुर्विधां॥ आतीर्थादप्रतीघातं स तस्याः फलमानशे॥६८
कूटयुद्धविधिज्ञेपि तस्मिन् सन्मार्गयोधिनि॥ भेजे भिसारिकावृत्तिं जयश्रीर्वीरगामिनी॥६९॥

६८॥ ॥ कूटेति॥ ॥ कूटयुद्धविधिज्ञेपि कपटयुद्धप्रकाराभिज्ञेपि सन्मार्गेण योधिनि
धर्मयोधिनि तस्मिन् राज्ञि वीरगामिनी जयश्रीः अभिसारिकावृत्तिं न भेजे॥ कांतार्थिनी तु या
याति संकेतं साभिसारिका॥ इत्यमरः॥ जयश्रीस्तं अन्विष्यागच्छदित्यर्थः॥६९॥ ॥

प्रायइति॥ ॥अरीणांसर्वेषांअपिप्रतापेनतेजसैवभग्नत्वात्तस्यराज्ञः गंधेनमदगंधेनएवभिन्नाअन्या
ऽन्येदंतिनोयेनतस्यगंधद्विपस्येवप्रायःप्रायेणरणोदुर्जनःआसीदितिशेषः॥खलर्थयोगेपिवि
शेषविवक्षायांषष्ठीमिच्छंतीत्युक्तं॥७०॥ ॥प्रवृद्धाविति॥ ॥प्रवृद्धौसत्यांचंद्रोहीयतेसमुद्रोपित
थाविधः॥चंद्रवदेवप्रवृद्धहीयते।प्रवृद्धवापावनः॥सराजातुताभ्यांचंद्रसमुद्राभ्यांसमावृद्धि

प्रायःप्रतापभग्नत्वादरीणांतस्यदुर्जयः॥रणोगंधद्विपस्येवगंधभिन्नान्यदंतिनः॥
७०॥प्रवृद्धौहीयतेचंद्रःसमुद्रोपितथाविधः॥सतुतत्समवृद्धिश्चनचभूत्ताविवक्षयी॥७१॥
संतस्तस्याभिगमनादत्यर्थंमहतःकृशाः॥उदधेरिवजीमूताःप्रापुर्दातृत्वमर्थिनो॥७२॥

श्चाभूत्॥तौचंद्रसमुद्राविवक्षयी॥क्षितेःक्षिवृधीत्यादिनाइनिप्रत्ययः॥नाभूत्॥७१॥ ॥
संतइति॥ ॥अत्यर्थंकृशाःदरिद्राःअतएवअर्थिनोयाचनशीलाः॥संतोविद्वांसोमहतस्तस्य
राज्ञःअभिगमनाउदधेरभिगमनाज्जीमूताइवदातृत्वंप्रापुः॥अर्थिभ्योदानयोग्यपर्याप्तं
धनंप्रायच्छदित्यर्थः॥७२॥ ॥ राम १६

स्तूयमानइति॥ ॥सराजास्तुत्यैस्तोत्रार्हैःएवपन्नदेवसमाचरदतएवस्तूयमानःसन्जिह्राय॥ल
ज्जांचक्रेतथापिक्षीणत्वेपितत्कारिणःस्तोत्रकारिणोद्वेष्टीतितत्कारिद्वेषिणस्तस्यराज्ञःयशः
ववृधे॥गुणाढ्यस्यसतःपुंसःस्तुतौलज्जैवभूषणमितिभावः॥७३॥ ॥दुरितमिति॥ ॥सराजा
उदितःसूर्यइवदर्शनेनदुरितंघ्नन्निवर्त्तयन्।तथास्मर्यते।अग्निश्चित्कपिलासत्रीराजा

स्तूयमानःसजिह्रायस्तुत्यमेवसमाचरन्॥तथापिपप्रथेतस्यतत्कारिद्वेषि
णोयशः॥७३॥दुरितंदर्शनेनघ्नंस्तत्वार्थेननुदंस्तमः॥प्रजाःस्वतंत्रयांचक्रे
शश्वत्सूर्यइवोदितः॥७४॥इंदोरगंतयःपद्मेसूर्यस्यकुमुदेंशवः॥ ॥

भिक्षुर्महोदधिः॥दृष्टमात्रःपुनात्येतेतस्मात्पश्येत्तुसर्वदेतितत्त्वस्यवस्तुतत्वस्यार्थेनप्र
काशेनआत्मज्ञानेनतमोध्वांतंअज्ञानंचनुदन्शाश्वत्प्रजाःस्वतंत्रयांचक्रेस्वाधीनाश्च
कार॥७४॥ ॥इंदोरिति॥ ॥इंदोअंशवःपद्मेऽगतयःप्रवेशरहिताइत्यर्थः॥सूर्यस्यांशवःकुमुदे
अगतयः॥ ॥

रघुवं·टी· १७ गुणिनस्तस्य गुणास्तु विपक्षे शत्रावपि अंतरमवकाशं लेभिरे प्रापुः ॥७५॥ ॥ परेति ॥ अ सर्ग· १७
श्वमेधायाश्वमेधं कर्तुं जिगीषोरस्य पराभिसंधानपरं शत्रुवंचनप्रधानं यदपि विचेष्टितं दि
ग्विजयारूपं तद्धर्म्यं धर्मादनपेतमेव बभूव ॥ धर्मपथ्यर्थन्यायादनपेत इत्यादिना यत्प्रत्य
यः ॥ मंत्रप्रभावोत्साहशक्तिमानपि संदध्यादिति कौटिल्यः ॥७६॥ ॥ एवमिति ॥ एवं शास्त्र

गुणास्तस्य विपक्षेपि गुणिनो लेभिरेंतरं ॥७५॥ पराभिसंधानपरं यद्यप्यस्य
विचेष्टितं ॥ जिगीषोरश्वमेधाय धर्म्यमेव बभूव तत् ॥७६॥ ॥ एवमु
द्यन्प्रभावेन शास्त्रनिर्दिष्टवर्त्मना ॥ वृषेव देवो देवानां राजा राज्ञां बभूव सः ॥७७॥

निर्दिष्टवर्त्मना शास्त्रोपदिष्टमार्गेण प्रभावेन कोशदंडजेन तेजसा ॥ प्रभावश्च प्रतापश्च
यत्तेजः कोशदंडजमित्यमरः ॥ उद्यन्नुद्युंजानो वृषा वासवः देवानां देव इव राज्ञां राम· ७
राजाराजराजो बभूव ॥७७॥ ॥

पंचममिति ॥ ॥ तं राजानं साधर्म्ययोगतो यथाक्रमं लोकसंरक्षणपरोपकारलक्षणधारणसमान
धर्मत्वात् लोकपालानामिंद्रादीनां चतुर्णां पंचममूचुरवोचन् ॥ महतां भूतानां पृथिव्यादीनां
षष्ठं परोपजीव्यत्वादिति भावः ॥ ऊचुः ॥७८॥ ॥ दूरेति ॥ भूपाला राजानः शासनेषु

पंचमं लोकपालानां तमूचुः साम्ययोगतः ॥ भूतानां महतां षष्ठमष्ट
मं कुलभूभृतां ॥७८॥ दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पितां ॥
दधुः शिरोभिर्भूपालाः देवाः पौरंदरीमिव ॥७९॥ ॥ व ॥

पत्रेषु अर्पितामुपन्यस्तां तस्य राज्ञ आज्ञां देवाः पौरंदरीमैंद्रीमाज्ञामिव दूरापव
र्जितच्छत्रैर्दूरत्यक्तातपत्रैः शिरोभिर्दधुः ॥ धारयामासुः चक्रुरित्यर्थः ॥७९॥ ॥

ऋत्विज इति ॥ स राजा महाक्रतौ अश्वमेधे ऋत्विजो याजकान् दक्षिणाभिस्तथा
नर्घ्यं अर्चयामास ॥ अर्चतेर्णौ वादिकाल्लिट् ॥ यथाऽस्य राज्ञो धनदस्य च नाम स

ऋत्विजः स तथानर्च दक्षिणाभिर्महाक्रतौ ॥
यथा साधारणीभूतं नामास्य धनदस्य च ॥ ८० ॥ ॥

धारणीभूतं एकीभूतमुभयोरपि धनदसंज्ञा यथा स्यात्तथा इत्यर्थः ॥ ८० ॥

इंद्रादिति ॥ ॥ इंद्राद्वृष्टिरघोरभूत् यमो नियमिता वारितागदस्य रोगस्योद्रेकवृत्तिर्येन सोऽभूत्
यादोनाथो वरुणो नौचराणां नाविकानां कर्मणि संचाराय शिवजलपथः सुचरजलमार्गोऽ
भूत् ॥ तदनु पूर्वापेक्षी रघुरामादि महिमापेक्षी कुवेरः कोशवृद्धिं विदधे ॥ इत्थं लोकपालाः
इंद्रादयस्तस्मिन् राज्ञि विषये ॥ दंडोपनतस्य शरणागतस्य चरितं वृत्तिं भेजिरे ॥ दुर्बलो ब

इंद्राद्वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोऽभूत् यादोनाथः शिवजलपथः कर्मणे नौचराणां ॥
पूर्वापेक्षी तदनु विदधे कोशवृद्धिं कुबेरस्तस्मिन् दंडोपनतचरितं भेजिरे लोकपालाः ॥
८१ ॥ ॥ इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ अतिथिराज्ये राजनीति
वर्णनं नाम सप्तदशः सर्गः ॥ १७ ॥ ॥

॥ बलवत्सेवाविरुद्धाछंकिता दिशि ॥ बने
तदंडोपनतो मन्नयेवमवस्थितइतिकौ ॥ ल्यटिल्य ॥ ८१ ॥ ॥ इति श्रीमहोपा
ध्यायकोलचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां संजीविनीसमा
ख्यायां सप्तदशः सर्गः ॥ १७ ॥ ॥

:श्रीगणेशायनमः॥ ॥यस्मादपांसुसंपर्कादहल्यासीदपांसुला॥ कारुण्यसिंधवेतस्मैन
मोवैदेहिबंधवे॥१॥ ॥सइति॥ ॥निषिधशत्रुर्निवारितरिपुः॥ सोतिथिर्नैषधस्यनिषिधदे
शाधीश्वरस्यार्थपतेः॥ राज्ञः सुतायांनिषिधान्निषिधाख्यान्नगेंद्रात्सत्ववतादनूनसारंत्र

सनैषधस्यार्थपतेःसुतायामुत्पादयामास निषिधशत्रुः॥ अनूनसारं निषधान्न
रेंद्रात्पुत्रंयमाहुर्निषधाख्यमेव॥१॥ तेनोरुवीर्येणपिता प्रजायैकल्पिष्यमाणे
नननंदयूना॥ सुवृष्टियोगादिवजीवलोकः सस्येनसंपत्तिफलात्मकेन॥२॥

नूनबलंपुत्रंउत्पादयामास॥ यंपुत्रंनिषिधाख्यंनिषिधनामकमाहुः॥१॥ ॥तेनेति॥ ॥उरु
वीर्येणातिपराक्रमेणातेएवप्रजायैलोकरक्षणार्थंकल्पिष्यमाणेनतेनयूनानिषिधेनपि
ताअतिथिःसुवृष्टियोगात्संपत्तिफलात्मकेनपाकोन्मुखेनसस्येनजीवलोकइवननंदसंजहर्ष
॥२॥

शब्दादीनिति॥ ॥कुमुद्वत्याअपत्यंपुमान्कौमुद्वतेयोतिथिः शब्दादिशब्दस्पर्शादिसुखंसुख
साधनंविषयवर्गंनिर्विश्योपभुज्यचिरायतन्निषिधाख्येपुत्रेप्रतिष्ठापितराजशब्दःदत्तरा
ज्यः सन्कुमुद्वदवदातैर्निर्मलैः कर्मभिरश्वमेधादिभिरर्जितांसंपादितांद्यांआरुरोह॥३॥

शब्दादिनिर्विश्यसुखंचिरायतस्मिन्प्रतिष्ठापितराजशब्दः॥ कौमुद्वतेयः कुमुदाव
दातैर्द्यामर्जितांकर्मभिरारुरोह॥३॥ पौत्रः कुशस्यापिकुशेशयाख्यः ससागरांसा
गरधीरचेताः॥ एकातपत्रांभुवमेकवीरः पुरार्गलादीर्घभुजोबुभोज॥४॥ ॥

पौत्रइति॥ ॥कुशेशयाक्षः शतपत्रलोचनः॥ शतपत्रंकुशेशयमित्यमरः॥ सागरधीर
चेताः समुद्रगंभीरचित्तः॥ एकवीरोऽसहायशूरः॥ पुरस्यार्गलाकपाटविष्कंभः॥ तद्विष्कं
भेर्गलंनवेत्यमरः॥ तद्वद्दीर्घभुजः॥ कुशस्यपौत्रःनिषधोपिससागरामेकातपत्रांभुवंबु
भोजपालयामास॥ भुजोनवनेइतिनियमात्परस्मैपदं॥४॥ ॥

तस्येति॥ ॥अनलौजा अनलतुल्यधामा नलाख्यस्तस्य निषिधस्यांतेऽवसाने वंशश्रियं राजलक्ष्मीं
प्राप॥ नलिनाननवक्त्रः यो नलः गजः अनड्वलानीव नड्वलप्रायस्थलानीव॥ नड्शादात् ड्वल
च्प्रत्ययः॥ परेषां बलानि अमृद्नात् ममर्द॥५॥ ॥नभ इति॥ ॥ नभश्चरैर्गंधर्वादिभिः गीत

तस्यानलौजास्तनयस्तदंते वंशश्रियं प्राप नलाभिधानः॥ यो नड्वलानीव गजः परेषां
बलान्यमृद्नान्नलिनाननवक्त्रः॥५॥ नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामत
नुस्तनूजं॥ ख्यातं नभःशब्दमयेन नाम्ना कांतं नभोमासमिव प्रजानां॥६॥ ॥

यशाः स नलः नभस्तलश्यामतनुं कृष्णवर्णं नभःशब्दमयेन नाम्ना तं नभःशब्दसंज्ञकं इ
त्यर्थः॥ नभोमासं श्रावणमासमिव प्रजानां कांतं प्रियं तनूजं पुत्रं लेभे॥६॥ ॥ राम॰ २

तस्मा इति॥ ॥धर्मोत्तरः धर्मप्रधानः॥ स नलः प्रभवे समर्थाय तस्मै नभसे उत्तरकोशलानां
प्रभुत्वं आधिपत्यं विसृज्य दत्वा जरसा जरया उपदिष्टं वार्धके चिकीर्षितं मृगैः अजर्यं तैः सह संगतमि
तिनिपातः॥ पुनर्देहबंधाय पुनर्देहसंबंधनिवृत्तये बबंध॥ मोक्षार्थी वनं गत इत्यर्थः॥ अदेह
बंधायेत्यत्र प्रसज्यप्रतिषेधेपि नञ्समास इष्यते॥७॥ ॥ तेनेति॥ ॥ तेन नभसा द्विपानां पुंड

तस्मै विसृज्योत्तरकोशलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वं॥ मृगैरजर्यं जरसोपदिष्टमदे
हबंधाय पुनर्बबंध॥७॥ तेन द्विपानामिव पुंडरीको राज्ञामजय्योऽजनि पुंडरीकः॥
शांते पितर्याहृतपुंडरीका यं पुंडरीकाक्षमिवाश्रिता श्रीः॥८॥ ॥

रीको दिग्गजविशेष इव राज्ञामजय्यो जेतुमशक्यः॥ क्षय्यजय्यौ शक्यार्थे इति निपा
तनात्साधुः॥ पुंडरीकः पुंडरीकाख्यः पुत्रोऽजनि जनितः॥ पितरि शांते स्वर्गं गते सति आ
हृतपुंडरीका गृहीतश्वेतपद्मा॥ श्रीर्यं पुंडरीकं पुंडरीकाक्षं विष्णुमिवाश्रिता॥८॥ ॥

 सइति॥ ॥अमोघंधनुर्यस्यसोऽमोघधन्वा। धनुषश्चेत्यनुङादेशः समासांतः॥ सपुंडरीकः प्रजा
३ नां क्षेमविधानेदक्षंप्रजापालनचतुरंक्षमयोपपन्नं क्षांतियुक्तंक्षेमंधनुर्यस्यतंक्षेमधन्वानंनाम
पुत्रं॥ वासंज्ञायामित्यनङादेशः॥ क्ष्मांलंभयित्वाप्रापय्यलंभेर्गत्यर्थत्वात् द्विकर्मकत्वं॥ क्षांतत
रोऽत्यंतसहिष्णुःसन्वनेतपः चचार॥ ९॥ ॥अनीकिनीनामिति॥ ॥तस्यक्षेमधन्वानोसमरे

सक्षेमधन्वानममोघधन्वापुत्रंप्रजाक्षेमविधानदक्षं। क्ष्मांलंभयित्वाक्षमयोपपन्नं
वनेतपःक्षामतनुश्चकार॥ ९॥ अनीकिनीनांसमरेऽग्रयायीतस्यापिदेवप्रतिमः सुतो
भूत्॥ व्यश्रूयतानीकपदावसानंदेवादिनामत्रिदिवेपियस्य॥ १०॥ ॥

संग्रामेऽनीकिनीनांचमूनांअग्रयायीदेवप्रतिमः इन्द्रादिकल्पः सुतोभूत् अनीकपदा राम·
वसानंशब्दांतंदेवादिदेवशब्दपूर्वंयस्यनामदेवानीकइतिनामधेयंत्रिदिवेस्वर्गेपिव्यश्रू ३
यतविश्रुतं॥ १०॥ ॥

पितेति॥ ॥सपिताक्षेमधन्वासमाराधनतत्परेणशुश्रूषापरेणतेनपुत्रेणयथापुत्रीबभूव
तथैवसपुत्रोदेवानीकआत्मवत्सलेनतेनपित्रमानबभूव॥ लोकेपितृत्वपुत्रत्वयोःफल
मेनयोरेवासीत्॥ इत्यर्थः॥ ११॥ ॥पूर्वइति॥ ॥गुणानामेकेनिधिर्यज्वाविधिवदिष्टवान्॥

पितासमाराधनतत्परेणपुत्रेणपुत्रीसयथैवतेन। पुत्रस्तथैवाधिकवत्सले
नसतेनपित्रापितृमान्बभूव॥ ११॥ पूर्वस्तयोरात्मसमेचिरोढामात्मोद्भवेवर्ण
चतुष्टयस्य॥ धुरंनिधायैकनिधिर्गुणानांजगामयज्वायजमानलोकं॥ १२॥ ॥

यज्वातुविधिनेष्टवानित्यमरः॥ तयोःपितापुत्रयोःपूर्वःपिताक्षेमधन्वाआत्मसमेस्वतुल्ये
आत्मोद्भवेपुत्रेदेवानीकेचिरोढंचिरंधृतंवर्णचतुष्टयस्यधुरंरक्षाभारंनिधाययजमा
नलोकंयष्टृलोकंजगाम॥ १२॥ ॥

वशीति॥ ॥तस्य देवानीकस्य सुतः वक्ष्यमाणो अहीनगुनामकः॥ वशो वशीकरं मधुरं वदतीति वशं
वदः॥ प्रियंवदो वदः खजिति खच्प्रत्ययः॥ तस्य शावकत्वेन तस्मादिष्टवादित्वात् द्वेषामिव द्विषता
मपीष्टः प्रियआसीत्॥ अथादेवानीकनिर्धारणं लभ्यते॥ तथाहि॥ प्रयुक्तमुच्चारितं माधुर्यगीतं
सकृदेकवारं विविधान् नीतान् अपि हरिणान् ग्रहीतुं वशीकर्तुं इष्टे शक्नोति॥१३॥ ॥अहीनगुरि

वशीसुतस्तस्य वशंवदत्वात्स्वेषामिवासीद्विषतामपीष्टः॥ सकृद्विविग्नानपि हि प्रयुक्तं मा
धुर्यमीष्टे हरिणान् ग्रहीतुं॥१३॥ अहीनगुर्नाम स गां समग्रामहीनबाहुद्रविणः शशा
स॥ यो हीनसंसर्गपराङ्मुखत्वाद्युवाप्यनर्थैर्व्यसनैर्विहीनः॥ १४॥ ॥

ति॥ ॥अहीनबाहुद्रविणः समग्रभुजपराक्रमः॥ यद्वा अहीनेषु वीरेषु बाहुद्रविणं यस्ये
ति वीरविजयी॥ द्रविणं कांचनं वित्तं द्रविणं च पराक्रमः इत्यमरः॥ हीनसंसर्गपराङ्मुखत्वान्नी राम·
चसंसर्गरहितत्वाद्धेतोरनर्थैरनर्थकरैर्व्यसनैः पानद्यूतादिभिर्विहीनो रहितो यः अहीनगुर्ना ५
मदेवानीकसुतः समग्रां सर्वां गां भुवं शशास॥१५॥ ॥

गुरोरिति॥ ॥पुंसामंतरज्ञो विशेषज्ञश्चतुरो निपुणः स अहीनगुश्च गुरोः पितुरनंतरं अवतीर्णो
भुवं प्राप्तः आद्यः पुमान् विष्णुरिव॥ स्खलितैरप्रतिहतैश्चतुर्भिरुपक्रमैः सामाद्युपायैः सामा
दिभिरुपक्रमैरितिमनुः॥ चतुर्दिगीशांश्चतस्रणां दिशाम् ईश्वरो बभूव॥१५॥ ॥तस्मिन्नि
ति॥ ॥अरीणां जेतरि तस्मिन्नहीनगौ परलोकयात्रां प्रयाते प्राप्ते सति उच्चैः शिरस्त्वाडुन्न

गुरोः स चानंतरमंतरज्ञः पुंसां पुमानाद्य इवावतीर्णः॥ उपक्रमैरस्खलितैश्चतुर्भि
श्चतुर्दिगीशश्चतुरो बभूव॥ १५॥ तस्मिन् प्रयाते परलोकयात्रां जेतर्यरीणां तनयं
तदीयं॥ उच्चैःशिरस्त्वाज्जितपारियात्रं लक्ष्मीः सिषेवे किल पारियात्रं॥१६॥ तस्मा
द्बभूवाथ नलाभिधानो दयान्वितः पद्मदलाक्षदृष्टिः॥ ॥

तन्नि रस्कत्वाज्जितः पारियात्रः कुलशैलविशेषो येन तं पारिजात्रं परिजात्रा रव्यं तदी
यं तनयं लक्ष्मीः राज्यलक्ष्मीः सिषेवे॥ १६ ॥ ॥श्रीरामचंद्रायनमः॥ ॥

तस्येति॥ ॥तस्य पारिजातस्योदारशीलो महावृत्तः॥ शीलं स्वभावे सद्वृत्त इत्यमरः॥ शिलापट्टवि
शालवक्षाः शिलः शिलाख्यः सूनुरभवत्॥ यः सूनुः शिलीमुखैर्बाणैः॥ अलिबाणौ शिली

कुंदाग्रदंतो रिपुरंतिसिंहः पतिः पृथिव्याः कुलकैरवेंदुः॥ १६॥ तस्याभवत्सूनु
रुदारशीलः शिलः शिलापट्टविशालवक्षाः॥ जितारिपक्षोपि शिली
मुखैर्यः शालीनतामव्रजदीड्यमानः॥ १७॥ ॥ श्रीराम॥ ॥

मुखावित्यमरः॥ जितारिपक्ष ईड्यमानः सन् शालीनतां अधृष्टतां लज्जामव्रजत्॥
अगमत्॥ स्यादधृष्टे तु शालीनमित्यमरः॥ शालीनकौपीने अधृष्टकार्ययोरिति निपातः॥ राम. ५
॥१७॥

तमिति॥ ॥अनिंदितात्मा अगर्हितस्वभावः॥ आत्मसंपन्नं बुद्धिसंपन्नं॥ आत्मा जीवो धृतिर्बुद्धिः स्व
भावो ब्रह्म वर्ष्म चेत्युभयत्राप्यमरः॥ युवानं तं शिलं युवराजानं कृत्वा एव सुखान्यभुंक्त॥ न
तु कृत्वैव कारार्थः॥ किमर्थं युवराजशब्दकरणं इत्याशंक्यान्यथा सुखोपभोगो दुर्लभ इत्या
ह॥ सुखेति॥ ॥हि यस्मात् राज्ञां वृत्तं प्रजापालनादिरूपं सुखोपरोधि ब कृत्वा तत्सुखप्रतिबंध

तमात्मसंपन्नमनिंदितात्मा कृत्वा युवानं युवराजमेव॥ सुखानि सोऽभुंक्त
सुखोपरोधि वृत्तं हि राज्ञामुपरुद्धवृत्तं॥ १८॥ तं रागबंधि
ष्ववितृप्तमेव भोगेषु सौभाग्यविशेषभोग्यं॥ ॥ ॥

मत एव॥ परुद्धवृत्तं उपरुद्धस्तद्दशामित्यर्थः॥ उपरुद्धस्य कारादिबद्धस्येव स्वयमूढभा
रस्य च सुखं नास्तीति भावः॥ १८॥ ॥ तमिति॥ ॥ रागं प्रीतिं बध्नंतीति रागबंधिनो रागप्रवर्त
कास्तेषु भोगेषु विषयेषु अवितृप्तमेव संतं॥ किंच विलासिनीनां उत्कीर्णां सौभाग्यविशेषे
ण सौंदर्यातिशयेन हेतुना भोग्यं भोगार्हां च भोः॥ ॥

कुविष्यतोरितिकुलं॥ तेषु पारिजातेष्वरतिक्षमानगतीतिअरतिक्षमापिअत एव रथ्यामत्सरिणीरतिक्ष
मासुविलासिनीष्वित्यर्थः॥ जराजहारवशीचकार॥१८॥ ॥ उन्नाभइति॥ ॥तस्यशीलस्यउन्नाभइति
उन्नाभइतिउक्ततनामधेयः प्रसिद्धनामाऽयथार्थंयथातथाउन्नतं नाभिरंध्रंयस्यसगंभीरनाभिरि
त्यर्थः॥ तदुक्तं॥ स्वरःसत्वंचनाभिश्चगंभीरस्त्रिषुशस्यते॥ पंकजनाभिवल्यः विष्णुसदृशः कृत्स्न

विलासिनीनामरतिक्षमापिजरारथ्यामत्सरिणीजहार॥१९॥ हित्वाथभोगानूतपसोत्तमेन
त्रिविष्टपंप्राप्यवतिक्षितीशे॥ तदात्मजः सागरधीरचेताः शशासपृथ्वीं सकलांनसो
मः॥१९॥ उन्नाभइत्युक्ततनामधेयस्तस्यायथार्थोन्नतनाभिरंध्रः॥ आसीत्सुतःपं
कजनाभकल्पः कृत्स्नस्यनाभिर्नृपमंडलस्य॥२०॥

स्यनृपमंडलस्यनाभिःप्रधानं॥
भिःप्रधानेकस्तूरीमदेपिक्वचिदीरित इतिविश्वः॥ सुतोऽभवत्॥ अचूप्रत्यनुअवपूर्वात्
सामलोम्नइत्यत्रे अचूइतियोगविभागात्तूउन्नाभवत्पद्मनाभादयःसिद्धाः॥२०॥ ॥

ततइति॥ ॥ततःपरंवज्रधरप्रभावः ईदृक्तेजाः संयतिसंग्रामेवज्रघोषोऽशनितुल्यध्वनिर्वज्र
नाभोनामतस्योन्नाभस्यात्मजः वज्राणांहीराणामाकराःखनयएवभूषणानियस्यास्तस्याः
पृथिव्याःपतिर्बभूवकिलखलु॥ वज्रंत्वस्त्रीकुलिशशास्त्रयोः॥ मणिवेधेरत्नभेदेप्यशना
वासनांतरे इतिकेशव॥२१॥ ॥तस्मिन्निति॥ ॥तस्मिन्वज्रनाभेसुकृतोपलब्धांसुधर्मां

ततःपरंवज्रधरप्रभावस्तदात्मजःसंयतिवज्रघोषः॥ बभूववज्राकरभूषणायाः
पतिःपृथिव्याःकिलवज्रनाभः॥२३॥ तस्मिन्गतेद्यांसुकृतोपलब्धांतत्संभवंशंखणन
मर्णवांता॥ उत्खातशत्रुंवसुधोपतस्थेरत्नोपहारैरुदितैःखनिभ्यः॥२२॥

र्भितांद्यांस्वर्गंगतेसतिउत्खातशत्रुमुद्धृतारिंशंखणंनामतत्संभवंतदात्मजंअर्णवांता॥ व
सुधाखनिभ्यःआकारेभ्यो॥ उदितैरुत्पन्नैरत्नोपहारैः उत्कृष्टवस्तुसमर्पणैरुपतस्थेसि
षेवे॥ जातौजातौयदुत्कृष्टंतद्रत्नमभिधीयतेइत्यमरः॥ २२॥ ॥

तस्येति॥ ॥तस्य खंडनस्यावसाने अंते हरिदश्वधामा सूर्यतेजा अश्विनोरिव रूपमस्येत्यश्विरूपो
तिसुंदरस्तत्पुत्र इतिशेषः॥ पित्र्यमिति संबंधपदं साम ध्यात् पित्र्यं पदं प्रपेदे॥ वेलातटेषू
षिता निविष्टाः सैनिकाश्चाः यस्य तमन्वर्थनामानं यं पुत्रं पुराविदो रघ्वः व्युषिताश्वमाऊः
२३॥ ॥आराध्येति॥ ॥तेन क्षितीश्वरेण व्युषिताश्वेन विश्वेश्वरं काशिपतिं आराध्य गैठ पास्य

तस्यावसाने हरिदश्वधामा पित्र्यं प्रपेदे पदमश्विरूपः॥ वेलातटेषूषितसैनिकाश्वं पु
राविदो यं व्युषिताश्वमाऊः॥२३॥ आराध्य विश्वेश्वरमीश्वरेण तेन क्षितेर्विश्वसहो
धिजज्ञे॥ पातुं सहो विश्वसखः समग्रां विश्वं नरामात्मजमूर्तिरात्मा॥ २४॥ ॥

विश्वसहो नाम विश्वसखः समग्रां गां सर्वां विश्वं नरां पातुं रक्षितुं सहत इति सहः क्षमः॥ प
चाद्यच्॥ आत्मजमूर्तिः पुत्ररूप्यात्मा स्वयमेव॥ आत्मा वै पुत्रनामासीति श्रुतेः॥ विजिते
सुषुवे विपूर्वो जनिर्गर्भविमोचने वर्त्तते॥ यथाह भगवान् पाणिनिः॥ समांसमां विजाय
ते इति॥ २४॥

अंश इति॥ ॥नयज्ञो नीतिज्ञः स विश्वसहः हिरण्याक्षरिपोर्विष्णोरंशो हिरण्यनाभेनाम्नि तन
ये जाते सति तरूणां सानिलो हिरण्यरेताः कृतयुगि वद्विषां सुतरां असह्यो अभूत्॥२५॥ ॥
पितेति॥ ॥पितृणां अनृणः निवृत्तपितृऋणः इत्यर्थः॥ प्रजाया पितृभ्य इति श्रुतेः॥ अत

अंशो हिरण्याख्यरिपोः स जाते हिरण्यनाभे तनये नयज्ञः॥ द्विषामसह्यः सुतरां
तरूणां हिरण्यरेता इव सानिलो भूत्॥ २५॥ पिता पितृणामनृणस्तमंते वयस्यनं
तानि सुखानि लिप्सुः॥ राजानमाजानुविलंबिबाहुं कृत्वा कृती वल्कलवान्बभूव॥२६॥

एवं कृती कृतकृत्यः॥ पिता विश्वसहः॥ अंते वयसि वार्धके ऽनंतानि अविनाशानि सुखा
नि लिप्सुर्मुमुक्षुरित्यर्थः॥ आजानुविलंबिबाहुं दीर्घबाहुं भाग्यसंपन्नमिति भावः॥ तं
हिरण्यनाभं राजानं कृत्वा वल्कवान् बभूव वनं गत इत्यर्थः॥ २६॥ ॥बू॥ ॥

कोशल्य इति॥॥ उत्तरकोशलानां पत्युः पतंगान्वयभूषणस्य सूर्यवंशभूषणस्य सोमसुतः सोमं सु
नवतः यज्वन इत्यर्थः॥ सोमे सुञ् इति क्विप्॥ तस्य हिरण्यनाभस्य द्वितीयः सोमश्चंद्र इव नेत्रो
त्सवो नयनानंदकरः कौशल्य इति प्रसिद्धः॥ औरसो धर्मपत्नीजः सुतोऽभूत॥२७॥ ॥यशोभि
रिति॥ ॥आब्रह्मसभायाः आब्रह्मसभं ब्रह्मसदनपर्यंतं॥ अभिविधावव्ययीभावः॥ यशोभिः

कौशल्य इत्युत्तरकोशलानां पत्युः पतंगान्वयभूषणस्य॥ तस्यौरसः सोमसुतः सु
तोऽभूत्नेत्रोत्सवः सोम इव द्वितीयः॥२७॥ यशोभिराब्रह्मसभं प्रकाशः स ब्रह्मभू
यं गतिमाजगाम॥ ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतं॥२८॥॥

प्रकाशः प्रसिद्धः स कौशल्योऽतिशयेन ब्रह्मवंतं ब्रह्मिष्ठं ब्रह्मविदमित्यर्थः॥ ब्रह्मशब्दान्मतु
बंतादिष्ठन्प्रत्यये विन्मतोर्लुगिति मतुपो लुक्॥ नस्तद्धित इति टिलोपः॥ ब्रह्मिष्ठाख्यं स्वतनुप्र
सूतं स्वात्मजमेव निजे स्वकीयेऽधिकारे प्रजापालनकृत्ये आधाय निधाय ब्रह्मणो भावो ब्र
ह्मभूयं ब्रह्मत्वं तदेव गतिस्तां जगाम मुक्तोऽभूदित्यर्थः॥ स्याद्ब्रह्मभूयं ब्रह्मत्वमित्यमरः॥ भु
वो भावे क्यप्॥२८॥

तस्मिन्निति॥ ॥कुलापीडनिभे कुलशेखरतुल्ये॥ वैकक्षकं तु तत्तिर्यक्क्षिप्तमुरसि॥ शिखास्वा
पीड शेखरावित्यमरः॥ सुप्रजसि सत्संताने सति॥ असिच् प्रत्ययः समासांतः॥ तस्मिन्प्रजेशे प्रजे
श्वरे ब्रह्मिष्ठे शासनचिह्नां महीं विपीडं निर्बाधं सम्यक् यथा शासति सति आनंदजलाविलाक्ष्यः
आनंदबाष्पाकुलनेत्राः प्रजाश्चिरं ननंदुः॥२९॥ तस्येति॥॥ तस्य पुत्राख्यस्य पत्नी पौष्यां पुष्यन

तस्मिन्कुलापीडनिभे विपीडं सम्यङ्महीं शासति शासनांकां॥ प्रजाश्चिरं सुप्रजसि प्रजे
शे ननंदुरानंदजलाविलाक्ष्यः॥२९॥ तस्य प्रभानिर्जितपद्मरागं पौष्यां तिथौ पुष्यमसू
त पत्नी॥ यस्मिन्नपुष्यन्नुदिते समग्रां पुष्टिं जनाः पुष्य इव द्वितीये॥३०॥ ॥

क्षत्रयुक्तायां पौर्णमास्यां तिथौ॥ पुष्ययुक्ता पौर्णमासी पौषीत्यमरः॥ नक्षत्रेण युक्तः काल
इत्यण्प्रत्ययः टिड्ढाणञित्यादिना ङीप्॥ प्रभया निर्जितः पुष्परागो मणिविशेषो येन तं॥
पुष्यं पुष्याख्यं पुत्रमसूत॥ द्वितीये पुष्ये पुष्य इव नक्षत्र इव तस्मिन्नुदिते सति जनाः समग्रां
पुष्टिं वृद्धिं अपुष्यन्॥३०॥ ॥

पात्रीति॥॥गुरुसेवनेनपित्रादिशुश्रूषयापात्रीकृतात्मायोग्यीकृतात्मा॥योग्यभाजनयोःपा
त्रमितिविश्वः॥पुष्करपत्रनेत्रःपद्मदलाक्षः॥पुत्रःपुष्करपत्राख्योराजायद्वापुत्रशब्देनैव
नीयःपुत्राख्यःपुत्रःसुतःतंश्लिष्टंपुत्रिणांप्रशस्तपुत्रवतांअग्रसंख्यामग्रगण्यंसमारोप

पात्रीकृतात्मागुरुसेवनेनस्पृष्टाकृतिःपत्ररथेन्द्रकेतोः॥पुतंत्रिणांपुष्करपत्रने
त्रःपुत्रःसमारोपयदग्रसंख्यां॥३१॥महींमहेच्छपरिकीर्यसूनौमनीषिणेजै
मिनयेर्पितात्मा॥तस्मात्सयोगादधिगम्यविद्यामजन्मनेकल्पतजन्मभीरुः॥३२॥

यतत्वकार॥३१॥ ॥महीमिति॥॥महेच्छोमहाशयः॥महेच्छस्तुमहाशयइत्यमरः॥ज
न्मभीरुःसंसारभीरुःसपुत्रःसूनौमहींपरिकीर्यविसृज्यमनीषिणेब्रह्मविद्यांअधि
गम्याजन्मनेजन्मनिवृत्तयेमोक्षायकल्पतसमपद्यताकर्मभिःसंपद्यमानेचतुर्थीवक्तव्या॥
मुक्तोभूदित्यर्थः॥३२॥

ततइति॥॥ततःपरंसपुष्यःप्रभवःकारणंयस्यसःतत्प्रभवस्तदात्मजः॥ध्रुवेणौत्तानपादिना
उपमेयःध्रुवश्चौत्तानपादिःस्यादित्यमरः॥ध्रुवसंधिरुर्वींप्रपेदे॥ज्यायसिश्रेष्ठेसत्यसंधेसत्यप्र
तिज्ञे॥यस्मिन्ध्रुवसंधौसन्नमतांअनुधतानांअरीणांसंधिःसंधानंध्रुवःस्थिरोभूत्॥अतःसा
र्थनामेत्यर्थः॥३३॥वंशेति॥॥स्पृशंपतेइतिस्पर्शाःविषयास्तेभ्योनिवृत्तोत्मास्यःनिवृत्तत्मा॥तए

ततःपरंतत्प्रभवःप्रपेदेध्रुवोपमेयोध्रुवसंधिरुर्वीं॥यस्मिन्नभूज्ज्यायसिसत्यसंधेसंधि
र्ध्रुवःसन्नमतांनृपाणां॥३३॥वंशस्थितिंवंशकरेणतेनसंभाव्यभावीससखा
मघोनः॥उपस्पृशन्स्पर्शनिवृत्तलौल्यस्त्रिपुष्करेषुत्रिदशत्वमाप॥३४॥

वमघोनइंद्रस्यसखाभित्रंभावीभविष्यन्स्वर्गंजिगमिषुरित्यर्थः॥सब्रह्मिष्ठोवंशकरोणवंशप्र
वर्तकेनतेनपुत्रेणवंशस्थितिंकुलप्रतिष्ठांसंभाव्यसंपाद्यत्रिषुपुष्करेषुतीर्थेषुतीर्थविशेषेषुदि
क्संख्येसंज्ञायामितिसमासः॥उपस्पृशन्स्नानंकुर्वन्त्रिदशत्वंदेवत्वमापप्राप॥पुष्क
रंद्वीपतीर्थाहिखगराजौषधांतरे॥तूर्यास्येसिफलेकांडशुंडाग्रेखेजलेंबुजइतिहैमः॥३४॥

सुत इति॥॥ मृगायताक्षो विशालनेत्रो नृसिंहः पुरुषश्रेष्ठः स ध्रुवसंधिः दर्शात्ययेऽप्रतिमे
प्रतिपच्चंद्रनिभे सुदर्शनाख्ये सुते शिशावसत्येव मृगयाविहारी सन् सिंहात् विपदं मरणमवा
पव्यसनासक्तिरनर्थावहेति भावः॥३५॥ ॥स्वरिति॥॥स्वर्गामिनः स्वर्यातस्य तस्य ध्रुवसंधे

सुते शिशावेव सुदर्शनाख्ये दर्शात्ययेंदुप्रियदर्शने सः॥ मृगायताक्षो मृगयाविहा
री सिंहादवापद्विपदं नृसिंहः॥३५॥ स्वर्गामिनस्तस्य तमैकपुत्रममात्यवर्गः कुल
तंतुमेकं॥ अनाथदीनाः प्रकृतीरवेक्ष्य साकेतनाथं विधिवच्चकार॥३६॥॥

रमात्यवर्गः अनाथाः नाथहीनाः अत एव दीनाः शोच्याः प्रकृतीः प्रजाः अवेक्ष्य कुल
तंतं कुलावलंबनं एकमद्वितीयं तं सुदर्शनं विधिवत् साकेतनाथमयोध्याधीश्वरमैकम
त्याच्चकार॥३६॥ ॥

नवेति॥॥अप्रौढनरेंद्रं तद्रघोः कुलं नवेंदुना बालचंद्रेण नभसा व्योम्ना शावः शिशुरेकः सिं
हो यस्मिन्॥ पृथुकः शावकः शिशुरित्यमरः॥ तेन काननेन कुड्मलावस्थं पंकजं यस्मिन् तेन
तोयेन चोपमेयमुपमातुमर्हमासीत्॥ नवेंद्वाद्युपमानेन तस्य वर्धिष्णुता शौर्यश्रीमत्तानि

नवेंदुना तन्नभसोपमेयं शावैकसिंहेन च काननेन॥ रघोः कुलं कुड्मलपुष्करे
ण तोयेन चाप्रौढनरेंद्रमासीत्॥३७॥ लोकेन भावी पितुरेव तुल्यः संभावितो मौलिप
रिग्रहात्सः॥ दृष्टो हि वृण्वन्कलभप्रमाणोप्याशाः पुरोवातमवाप्य मेघः॥३८॥

स्वचितानि॥३७॥ लोकेनेति॥॥ स बालः मौलिपरिग्रहात्किरीटस्वीकाराद्धेतोः पितुस्तु
ल्यः॥ पितृस्वरूप एव भावी भविष्यतीति लोकेन जनेन संभावितः कल्पितः॥ तथा हि कलभप्र
माणः कलभमात्रोपि मेघः पुरोवातमवाप्य आशाः दिशो विवृण्वन् आच्छादयन् दृ
ष्टो हि॥३८॥

तमिति॥ ॥राजवीथ्यां राजमार्गे॥ अधिहस्ति हस्तिनि विभक्त्यर्थेऽव्ययीभावः॥ यंतं गच्छंतं हस्ति
नमारुह्य गच्छंतमित्यर्थः॥ आधोरणालंबितं निःशंकत्वात् सादिनागृहीतं॥ अग्र्यवेषमुदा
रनेपथ्यं॥ षड्वर्षाणि भूतः षड्वर्षः॥ तद्धितार्थेत्यादिना समासः॥ तमधीष्टो भृतो भूतो॥

तेराजवीथ्यामधिहस्ति यंतमाधोरणालंबितमग्र्यवेषं॥
षड्वर्षदेशीयमपि प्रभुत्वात्प्रैक्षंत पौराः पितृगौरवेण॥३९॥

वीत्यधिकारे चित्तवति नित्यमिति तद्धितस्य लुक्॥ ईषदसमाप्तः षड्वर्गः॥ षड्वर्ष
देशीयः॥ ईषदसमाप्तादिना देशीयप्रत्ययः॥ तं षड्वर्षदेशीयमपि बालमपि तं सुद
र्शनं पौराः प्रभुत्वात् पितृगौरवेण प्रैक्षंत पितरि यादृक् गौरवं तादृशेन वदृदृशुरित्यर्थः॥
॥३९॥

काममिति॥ ॥स सुदर्शनः पैतृकस्य सिंहासनस्य कामं सम्यक् प्रतिपूरणाय नाकल्पत॥ बा
लत्वाद्व्याप्तुं न पर्याप्त इत्यर्थः॥ चामीकरपिंजरेण कनकगौरेण तेजोमहिम्ना पुनस्तेजः सं
पदा तु दृप्तात्मा विस्तारितदेहः सन् तत्सिंहासनं व्याप व्याप्तवान्॥४०॥ ॥तस्मादिति॥ ॥

कामं न सोऽकल्पत पैतृकस्य सिंहासनस्य प्रतिपूरणाय॥ तेजोमहिम्ना पुनरावृता
नेतद्व्याप चामीकरपिंजरेण॥४०॥ तस्मादधः किंचिदिवावतीर्णावसंस्पृशंतौ तप
नीयपीठं॥ सालक्तकौ भूपतयः प्रसिद्धैर्ववंदिरे मौलिभिरस्य पादौ॥४१॥

तस्मात् सिंहासनात् अपादानादधोऽधोदेशं प्रति किंचिदिवावतीर्णौ ईषल्लंबौ तपनीय
पीठं कांचनपीठमसंस्पृशंतौ अकल्पत्वादप्राप्तौ सालक्तकौ लाक्षारसासिक्तौ अस्य सु
दर्शनस्य पादौ भूपतयः प्रसिद्धैरुन्नतैर्मौलिभिर्मुकुटैर्ववंदिरे प्रणेमुः॥४१॥ ॥

मणाविति ॥ ॥ अल्पप्रमाणेपिमणौ इंद्रनीलेप्रत्नावा नैजेष्टत्वाधेतीमहानीलइतिशब्दोयथा
मिथ्यानिरर्थकोनतथैवार्नकेत्रिंशोअपितस्मिन्सुदर्शनेप्रतीःप्रसिध्देमहाराजइतिश
ब्दोमिथ्यानयुयुजो ॥ ४२ ॥ ॥ पर्यंतेति ॥ ॥ पर्यंतयोःपार्श्वयोःसंचारितेचामरेयस्यतस्य
बालस्यसंबंधिनःकपोलयोर्लोलौ उभौ काकपक्षौयस्यतस्मादाननाडुद्धारितोविवादो
मणौमहानीलइतिप्रत्नावादल्पप्रमाणेपियथानमिथ्या ॥ शब्दोमहाराजइतिप्रयु
क्तस्तथैवतस्मिन्नप्रयुयुजेर्नकेपि ॥ ४२ ॥ पर्यंतसंचारितचामरस्यकंपोललोलोभयका
कपक्षात् ॥ तस्याननाडुच्चरितोविवादश्चस्खालवेलास्वपिनार्णवस्य ॥ ४३ ॥
वचनेअर्णवानांवेलास्वपिनचस्खाल ॥ शिशोरपितस्याननांगोनासादित्यर्थः ॥ चप
लसंसर्गेपिमहांतोनचलंतीतिध्वनिः ॥ उभयकाकपक्षादित्यत्रद्वित्वविषयेउभयपु
त्रइतिवडुभयशब्दस्थानेउभयशब्दप्रयोगइत्युक्तंप्राक् ॥ ४३ ॥ ॥ राम° १२
निर्वृत्तइति ॥ ॥ निर्वृत्तजातातांबुनदपट्टशोभाकनकमुकुटकांतिर्यस्मितस्मिन्कृतकनकपट्ट
बंधेललाटेन्यस्तंतिलकंदधानः ॥ स्मेरमुखःस्मितमुखःसराजाईश्वरिसुंदरीणांमुखानितेनैव
तिलकेनैवशून्यानिचकार ॥ अखिलमपिरात्रुवर्गंस्त्रवधीदितिभावः ॥ ४४ ॥ ॥ न्यस्तेति ॥ ॥ अक्ष
रभूमिकायांअक्षरलेखनस्थलेपीगादौन्यस्ताक्षरांरचिताक्षरपंक्तिरेखान्यासांलिपिंयंचार्श
निर्वृत्तजांबूनदपट्टबंधेन्यस्तंललाटेतिलकंदधानः ॥ तेनैवशून्यान्यरिसुंदरीणांमुखा
निसस्मेरमुखश्चकार ॥ ४४ ॥ न्यस्ताक्षरामक्षरभूमिकायांकार्त्स्न्येनगृह्णातिलिपिंनया
वत् ॥ तावत्फलानिक्रतवृधयोगाद्यक्रान्युपायुंक्तसदंडनीतेः ॥ ४५ ॥ ॥ ॥
दण्डस्मिकांमातृकार्त्स्न्येनियावन्नगृह्णातिसःसुदर्शनस्तावत्श्रुतंवृधयोगाद्विद्यावृधसंस
र्गात्त्रिवाणिदंडनीतेर्नीतिविद्यास्त्रफलानिउपायुंक्तअन्वभूत ॥ प्रागेववृधफलस्यतस्यप
श्चादस्यसमानंशास्त्रंसंवादार्थमिवाभवदितिभावः ॥ ४५ ॥ ॥

शिरीषेति ॥ शिरीषपुष्पाधिकसौकुमार्यः कोमलांगोऽतएवसराजा भूषणेनापिखेदश्रमंयायात्प्राप्नुयात् ।
एवंभूतंसन्नितांतगुर्वीमपिधरित्र्याःधुरंभुवोभारंअनुभावात्सामर्थ्यात्बिभरांबभूवबभार ॥
भीह्रीभृहुवांश्लुवच्चेतिविकल्पादाम्प्रत्ययः ॥ ४६ ॥ उरसीति ॥ ॥ उरस्यपर्याप्तोनिवेशभा
गोनिवासावकाशोयस्याःसाऽतएवप्रौढीभविष्यंतंवर्धिष्यमाणंउदीक्षमाणाप्रौढवपुष्का

शिरीषपुष्पाधिकसौकुमार्यःखेदंसयायादपिभूषणेन ॥ नितांतगुर्वीमपिचानुभावा
धुरंधरित्र्याबिभरांबभूव ॥ ४६ ॥ उरस्यपर्याप्तनिवेशभागाप्रौढीभविष्यंतमुदीक्ष
माणा ॥ संजातलज्जेवतमातपत्रच्छायाच्छलेनोपजुगूहलक्ष्मीः ॥ ४७ ॥ ॥

भूकदाभविष्यतीतिप्रतीक्ष्यमाणालक्ष्मीःसंजातलज्जेवसाक्षादालिंगितुंलज्जितेवं
तंसुदर्शनमातपत्रच्छायाच्छलेन ॥ पजुगूहआलिलिंगछत्रच्छायालक्ष्मीरूपेतिप्र राम·
सिद्धिः ॥ प्रौढांगनायाःप्रौढपुरुषालाभेलज्जाभवतीतिध्वनिः ॥ ४७ ॥ ॥ १३

अनश्नुवानेनेति ॥ ॥ युगोपमानंयुगसादृश्यंअनश्नुवानेनाप्राप्नुवता ॥ अबद्धमनुत्पादितंमौ
र्वीकिणोज्याघातग्रंथिरेवलांछनंयस्यतेन ॥ अस्पृष्टःखड्गत्सरुःखड्गमुष्टिर्येनतेन ॥ त्स
रुःखड्गादिमुष्टौस्यादित्यमरः ॥ एवंविधेनापितस्यसुदर्शनस्यभुजेनभूमिःरक्षावतीआसी

अनश्नुवानेनयुगोपमानमबद्धमौर्वीकिणलांछनेन ॥ अस्पृष्टखड्गत्सरुणापिचा
सीद्रक्षावतीतस्यभुजेनभूमिः ॥ ४८ ॥ नकेवलंगच्छतितस्यकालेययुःशरीराव
यवाविवृद्धिं ॥ वंश्यागुणाःखल्वपिलोककांताःप्रारंभसूक्ष्माःप्रथिमानमापुः ॥ ४९

तच्छिरोरपितस्यतेजस्याद्दगितिभावः ॥ ४८ ॥ ॥ नेति ॥ ॥ कालेगच्छतितस्यकेवलंशरी
रावयवाएववृद्धिंप्रसारंनययुःकिंतुवंशेभवावंश्यालोककांताःजनप्रियाःप्रारंभे
आदौसूक्ष्मास्तस्यगुणाःशौर्यौदार्यादयोपिप्रथिमानंस्थूलत्वमापुःखलु ॥ ४९ ॥ ॥

रघुवं० टी०
१४

सर्ग० १८

स इति ॥ ॥ स सुदर्शनिः पूर्वस्मिन्जन्मांतरे जन्मविशेषे दृष्टपाराः स्मरन्निव गुरूणामक्लेशाक
रः सन् त्रयाणां धर्मार्थकामानां वर्गः त्रिवर्गः तस्याधिगमस्य प्राप्तेर्मूलं तिस्रो विद्याः ॥ त्रयीवा
र्त्तादंडनीतिः ॥ पित्र्याः पितृसंबंधिनीः प्रकृतीः प्रजाश्च जग्राह स्वायत्तीचकार ॥ अत्र कोटि

स पूर्वजन्मांतरदृष्टपाराः स्मरन्निवाक्लेशकरो गुरूणां ॥ तिस्र
स्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥५०॥

ल्यः ॥ धर्माधर्मौ त्रय्यामर्थानर्थौ वार्त्तायां नयानयौ दंडनीत्यामिति ॥ अत्र दंडनीतिर्नपिश्च
राकाममूलमिति द्रष्टव्यं ॥ आन्वीक्षिक्या अनुपादानं त्रय्यंतर्भावपक्षमाश्रित्य ॥ यथाह
कामंदकः ॥ त्रयीवार्त्तादंडनीतिस्तिस्रो विद्या मनोर्मते ॥ त्रय्या एव विभागोयं येनसान्वी
क्षिकी मतेति ॥५०॥ ॥

राम०
१८

वृत्त्येति ॥ ॥ शास्त्रे धनुर्विद्यायां विनीयमानः ॥ शिक्ष्यमाणोऽत एवोत्तरार्धं पूर्वकायं किंचि
दिवव्यूत्य विन्यस्य स्थितः ॥ उन्नधचूडः ऊर्ध्वमुत्कृष्य बधकेशः ॥ अंचितमाकुंचितं सव्यं
जानु यस्य सः ॥ आकर्णमाकृष्टसबाणं धनुर्धन्व यायेन स तथोक्तः सन् व्यरोचत ॥ शो

व्यूत्य स्थितः किंचिदिवोत्तरार्धमुन्नधचूडोंचितसव्यजानुः ॥ आकर्ण
माकृष्टसबाणधन्वा व्यरोचतास्त्रेषु विनीयमानः ॥५१॥ अथ मधुव
नितानां नेत्रनिर्वेशपेयं मनसिजतरुपुष्पं रागबंधिप्रवालं ॥ ॥

नत ॥५१॥ ॥ अथेति ॥ ॥ अथ सुदर्शनो वनितानां नेत्रैर्निर्वेशनीयं भोग्यं नेत्रपेयमित्यर्थः ॥
निर्वेशो भृतिभोगयोरित्यमरः ॥ मधुक्षोभं रागबंधोऽनुरागसंतान एव प्रवालः पल्लवो य
स्य तत् मनसिजएव तरुस्तस्य पुष्पं पुष्पभूतं ॥ ॥

अकृतकविधि अकृत्रिमसंपादनं सर्वांगीणं व्याप्नोतीति सर्वांगीणं ॥ तत्सर्वादेरित्यादिना खप्रत्ययः ॥ आ
कल्पजातं आभरणसमूहः तं आद्यं विलसितपदं विलासस्थानं यौवनं प्रपेदे ॥ विशिष्टमधुपुष्पाक
ल्पजातविलासपदत्वेन यौवनस्य चतुर्थकरणात् सविशेषणमालारूपकमेतत् ॥ ॥ प्रतीति ॥ दू
तीभिः कन्यापरीक्षार्थं प्रेषिताभिः संदर्शिताभ्यो दूतिसंदर्शिताभ्यः प्रतिकृतीनां तूलिकादिलिखि

अकृतकविधि सर्वांगीणमाकल्पजातं विलसितपदमाद्यं यौवनं सप्रपेदे ॥ ५२ ॥ प्रतिकृ
तिरचनाभ्यो दूतिसंदर्शिताभ्यः समधिकतररूपाः शुद्धसंतानकामैः ॥ अधिविविदु
रमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥ ५३ ॥ ॥

तकन्याप्रतिमानां रचनाभ्यो विन्यासेभ्यः ॥ पंचमी विभक्त इति पंचमी ॥ समधिकतररूपाः चि
त्रनिर्माणादपि रमणीयनिर्माणा इत्यर्थः ॥ शुद्धसंतानकामैरमात्यैराहृता आनीता राजक
न्या यूनस्तस्य सुदर्शनस्य संबंधिन्यो प्रथमपरिगृहीते प्रथमस्वीकृते श्रीभुवौ श्रीश्च भूश्च ते अधिवि
विदुः अधिविन्नाः आत्मना सपत्नीस्ताश्चक्रुः ॥ कृतसपत्नीकाऽध्यूढाऽधिविन्ना इत्यमरः ॥ ५३ ॥

इति पदवाक्यप्रमाणपारावारीण श्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचिता

इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदास
कृतौ वंशवर्णनो नामाष्टादशः सर्गः ॥ १८ ॥ ॥

यां रघुवंशटीकायां संजीविनीसमाख्यायामष्टादशः सर्गः ॥ १८ ॥ ॥ श्री ॥

राम॰
१६

॥श्रीगणेशाय नमः॥ ॥मनसो मनसंसारबंधमुच्छेत्तुमिच्छतः॥रामचंद्रपदांभोजयुगलं निग
डायतां॥१॥ ॥अग्निवर्णमिति॥ ॥कृतवतां श्रुतसंपन्नानां अपश्चिमः॥प्रथमो वशी पतेः रघोरा
घवः सुदर्शनः पश्चिमे वयसि नाथके स्वपदे स्थाने ऽग्नितेजसं अग्निवर्णं तनयं अभिषिच्य नैमि

अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसं॥शिश्रिये श्रुतवतामपश्चिमः
पश्चिमे वयसि नैमिषं वशी॥१॥ तत्र तीर्थसलिलेन दीर्घिकास्तल्पमंतरितभूमि
भिः कुशैः॥सौधवासमुटजैः स विस्मरन् संचिकाय फलनिस्पृहस्तपः॥ २॥

षं नैमिषारण्यं शिश्रिये श्रितवान्॥१॥ ॥तत्रेति॥ ॥तत्र नैमिषे तीर्थसलिलेन दीर्घिकाः॥विहा
रवापीः अंतरितभूमिभिः कुशैः तल्पं शय्यां॥ उटजे पर्णशालायां सौधवासं विस्मृतो विस्म
तवान्॥सः कर्तरि क्तः॥फले स्वर्गादौ निःस्पृहः तपः संचिकाय संचितवान्॥ २॥

राम॰ १

लब्धेति॥ ॥ततः सुदर्शनिपुत्रोऽग्निवर्णः लब्धपालनविधौ लब्धस्य राज्यस्य पालनकर्मणि खेदं
नाप॥अक्लेशेनापालयदित्यर्थः॥कुतो हि यस्माद्भुजनिर्जितद्विषा गुरुणा पित्रा मेदिनी अस्मा
ग्निवर्णाय भोक्तुमेव कल्पिता रचिता॥प्रसाधयितुं न॥प्रसाधनं कंटकशोधनमलंकृतिश्चेति
तथा च यथालंकृता नीता युवतिः केवलमुपभुज्यते तद्वदिति भावः॥३॥ ॥स इति॥ ॥अभिकः का

लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी॥भोक्तुमेव भुजनिर्जितद्विषा
न प्रसाधयितुमस्य कल्पिता॥सोऽधिकारमभिकः कुलोचितं काश्चन स्वयमवर्तय
त्समाः॥तन्निवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोऽभवत्॥४॥ ॥

मुकः॥अनुकाभिकाभीकः कमितेति निपातः॥ कम्रः कामयिताभीकः कमनः कामनो
ऽभिक इत्यमरः॥सोऽग्निवर्णः कुलोचितमधिकारं प्रजापालनं काश्चन समाः कतिचित्॥वत्स
रान् स्वयमवर्तयत् अकरोत् ततः परं सचिवेषु तं निवेश्य निधाय स्त्रीविधेयं स्त्र्यधीनं नवयौ
वनं यस्य सोऽभवत्॥स्त्र्यासक्तोऽभूदित्यर्थः॥४॥

कामिनीति ॥ ॥ कामिनीसहचरस्य कामिनस्तस्य मृदंगनादवत्सु वेश्मस्वधिकर्धिः पूर्वस्मादधिकसंचारः उत्तरः उत्सवः ऋधिमंतं साधनसंपन्नं पूर्वमुत्सवमपोहत् ॥ अपानुदत् ॥ उत्तरोत्तराधिकात्सोत्सवपरंपराऽहन्नेत्यर्थः ॥ ५ ॥ ॥ इंद्रियेति ॥ ॥ ॥ सः अग्निवर्ण इंद्रि

कामिनीसहचरस्य कामिनस्तस्य वेश्मसु मृदंगनादिषु ॥ ऋधिमंतमधिकर्धिरुत्तरः पूर्वमुत्सवमपोहडुत्सवः ॥ ५ ॥ इंद्रियार्थपरिशून्यमक्षमः सोढुमेकमपि स क्षणांतरं ॥ अंतरेचविहरन् दिवानिशं न व्यपेक्षत समुत्सुकाः प्रजाः ॥ ६ ॥

यार्थपरिशून्यं शब्दादिविषयरहितमेकमपि क्षणांतरं क्षणभेदं सोढुमक्षमोऽशक्तः सोऽग्निवर्णः दिवानिशमंतरेच विहरन् समुत्सकाः ॥ दर्शनाकांक्षिणीः प्रजान व्यपेक्षत नापेक्षितवान् ॥ ६ ॥ ॥

गौरवादिति ॥ ॥ जातु कदाचिन्मंत्रिणां गौरवात्कुरुत्वा मान्यत्वाद्धेतो मंत्रिवचनानुरोधादित्यर्थः ॥ प्रकृतिभिः प्रजाभिः कांक्षितं यदपि दर्शनं ददौ ॥ तदपि गवाक्षविवरालंबिना केवलेन चरणेन चरणमात्रेण कल्पितं संपादितं न तु मुखावलोकनप्रदानेनेत्यर्थः ॥ ७ ॥

गौरवाद्यदपि जातु मंत्रिणां दर्शनं प्रकृतिकांक्षितं ददौ ॥ तद्गवाक्षविवरावलंबिना केवलेन चरणेन कल्पितं ॥ ७ ॥ तं कृतप्रणतयोनुजीविनः कोमलात्मनखरागरूषितं ॥ भेजिरे नवदिवाकरातपस्पृष्टपंकजतुलाधिरोहणं ॥ ८ ॥ ॥

तमिति ॥ ॥ ॥ कोमलेन मृदुलेन आत्मनखानां रागेण आरुण्येन रूषितं छुरितमत एव नवदिवाकरातपेन स्पृष्टं व्याप्तं यत्पंकजं तस्य तुलां साम्यं तामधिरोहतीति तं चरणमुपजीविनः ॥ कृतप्रणतयः कृतनमस्काराः संतो भेजिरे सिषेविरे ॥ ८ ॥ ॥

यौवनेति ॥ ॥ विगाढमन्मथः ॥ प्रौढमदनः सोऽग्निवर्णः ॥ यौवनेन हेतुना उन्नतानां विलासिनीस्तना
नां क्षोभेण आघातेन लोलानि चंचलानि कमलानि यासां तास्तदंबुभिस्तासां दीर्घिकाणां अंबु
भिः गूढानि अंतर्हितानि मोहनगृहाणि सुरतभवनानि यासु तादीर्घिकाः व्यगाहत ॥ स्त्रीभिः स
ह दीर्घिकासु विजहारेत्यर्थः ॥ ९ ॥ ॥ तत्रेति ॥ ॥ तत्र दीर्घिकासु अंगनाः सेकेन हृतं लोचनांज

यौवनोन्नतविलासिनीस्तनक्षोभलोलकमलाश्च दीर्घिकाः ॥ गूढमोहनगृहास्तदंबु
भिः स व्यगाहत विगाढमन्मथः ॥ ९ ॥ तत्र सेकहृतलोचनांजनैर्धौतरागपरिपाट
लाधरैः ॥ अंगनास्तमधिकं व्यलोभयन्नर्पितप्रकृतिकांतिभिर्मुखैः ॥ १० ॥ नेनेव कज्जलं येषां

तैः रज्यतेऽनेनेति रागो रागद्रव्यं लाक्षादि रागस्य परिपाटलो गुणः ॥ गुणोऽशुक्लादयः पुंसीत्यमरः ॥
धौतो रागपरिपाटलो येषां तैस्तथोक्ता अधरा येषां तैर्निर्हृतसांक्रमिकरागैरित्यर्थः ॥ अत एवार्पितप्र
कृतिकांतिभिरभिव्यंजितस्वाभाविकरागैरित्यर्थः ॥ एवंभूतैर्मुखैस्तमग्निवर्णं अधिकं व्यलोभयन्
प्रलोभितवत्यः ॥ १० ॥

घ्राणेति ॥ ॥ प्रियासखः सोऽग्निवर्णः घ्राणकांतेन घ्राणतर्पणेन मधुगंधेन कर्षिणीर्मनोहारि
णीः रच्यंते इति रचनाः पानभूमय एव रचनाः ॥ रचिताः पानभूमय इत्यमरः ॥ वासितास
खः करिणीसहचरः ॥ वासिता करिणी स्त्रियोरित्यमरः ॥ द्विपः पुष्पिताः कमलिनीरिवाभ्य
पद्यताभिगतः ॥ ११ ॥ ॥ सातिरेकेति ॥ ॥ अंगना रहो रहसि सातिरेकस्य सातिशयस्य मदस्य

घ्राणकांतमधुगंधकर्षिणीः पानभूमिरचनाः प्रियासखः ॥ अभ्यपद्यत स वासिता
सखः पुष्पिताः कमलिनीरिव द्विपः ॥ ११ ॥ सातिरेकमदकारणं रहस्तेन दत्तमभिले
षुरंगनाः ॥ ताभिरप्युपहृतं मुखासवं सोऽपिबद्बकुलतुल्यदोहदः ॥ १२ ॥

मदनस्य कारणं तेनाग्निवर्णेन दत्तं मुखासवमभिलेषुः ॥ बकुलेन तुल्यदोहदस्तुल्याभिला
षः ॥ अथ दोहदं इच्छा कांक्षा स्पृहेहा तृडित्यमरः ॥ बकुलद्रुमस्यांगनामद्यार्थित्वात्त
त्तुल्याभिलाषत्वं ॥ सोऽपि ताभिरंगनाभिरुपहृतं दत्तं मुखासवमपिबत् ॥ १२ ॥ ॥

न्नंकमिति ॥ अंकपरिवर्त्तनोचिते उत्संगविहारार्हे उभे तस्याग्निवर्णस्यांकं अशून्यतां पूर्णतां निन्यतुः ॥
के उभे ॥ हृदयंगमस्वना मनोहरध्वनिर्वल्लकी वीणा च वल्गुवाक् मधुरभाषिणी वामलोचना वामाक्षी
हृदयंगच्छतीति हृदयंगमेति खच् प्रकरणे सुप्युपसंख्यानात् खच्प्रत्ययः ॥ अंकाधिरोपितयोर्वी
णावामाक्ष्योर्वादित्रगीताभ्यामरंस्तेत्यर्थः ॥१३॥ स इति ॥ कृती कुशलः स्वयं प्रहतपुष्करो

अंकमंकपरिवर्त्तनोचिते तस्य निन्यतुरशून्यतामुभे ॥ वल्लकी च हृदयंगमस्वना व
ल्गुवागपि च वामलोचना ॥१३॥ स स्वयंप्रहतपुष्करः कृती लोलमाल्यवलयो हरन्म
नः ॥ नर्त्तकीरभिनयातिलंघिनीः पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥१४॥ ॥

वादितवाद्यमुखः ॥ लोलानि माल्यानि वलयानि च यस्य स तथोक्तः ॥ मनो हरन् नर्त्तकीनामि
ति शेषः ॥ सोग्निवर्णः अभिनयातिलंघिनीः अभिनयेषु स्खलंतीरित्यर्थः ॥ नर्त्तकी लासिका शि
ल्पिनि ष्वुन्निति ष्वुन्प्रत्ययः ॥ षिद्गौरादिभ्यश्चेति ङीष् ॥ नर्त्तकी लासिके समे इत्यमरः ॥ गुरुषु नाट्या
चार्येषु पार्श्ववर्त्तिषु समीपस्थेषु सत्सु एव अलज्जयत् लज्जामगमयत् ॥१४॥ ॥

चाविति ॥ चारु सुंदरं नृत्यविगमे लास्यावसाने परिश्रमान्नर्त्तनप्रयासात् स्वेदेन भिन्नतिलकं तन्मु
खं प्रेम्णा दत्तवदनानिलः प्रवर्त्तितमुखमारुतः पिबन् चुंबनं कुर्वन् ॥ अमराणाम् अलकायाश्चेश्वरौ वि
ष्णुकुबेरौ अत्यजीवत् अतिक्रम्याजीवत् ॥ ततोप्युत्कृष्टजीवित आसीदित्यर्थः ॥ इंद्रादेरपि दुर्लभमाहरे
सौभाग्यमिति भावः ॥१५॥ तस्येति ॥ उपसृत्यान्यत्र गत्वा काम्यवस्तुषु श्राव्यादौ प्रियार्थेषु से

चारु नृत्यविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ॥ प्रेमदत्तवदनानिलः पिबन्न
त्यजीवदमरालकेश्वरौ ॥१५॥ तस्य सावरणदृष्टसंधयः काम्यवस्तुषु नवेषु सं
गिनः ॥ वल्लभाभिरुपसृत्य चक्रिरे सामिभुक्तविषयाः समागमाः ॥१६॥ ॥

गिनः आसक्तिमतस्तस्य सावरणाः प्रच्छन्नाः दृष्टाः प्रकाशाश्च संधयः साधनानि येषु ते स
मागमाः वल्लभाभिः प्रेयसीभिः सामिभुक्तविषयाः अर्धोपभुक्तेंद्रियार्थाश्चक्रिरे ॥ अत्र गोनर्दीयः
संधिर्द्विविधः ॥ सावरणः प्रकाशश्च सावरणोभिक्षुकादिना ॥ प्रकाशः स्वयमुपेत्य केनेति इतः स्वयमु
पसृत्य विशेषार्थीत्रस्थितोनुपजयं स्वयं संधेय इति वात्स्यायनः ॥ अन्यत्र न तः कथं चित् संधा

पुनरनुपगमाय ॥ धृष्टयोगेनानि इत्यन्ततश्चक्रुरित्यर्थः ॥ १६ ॥ ॥ अंगुलीति ॥ ॥ सोग्निवर्णः प्रण
यिनीः प्रेयसीर्वंचयन् अन्यत्र गछन् ॥ अंगुल्यः किसलयानीव तासामग्राणि तैस्तर्जनं भ्रूवि
भंगेन कुटिलं वक्रं वीक्षितं वीक्षणं चासकृन्मेखलाभिर्बंधनं चावाप ॥ अपराधिनो दंड्या इति
भावः ॥ १७ ॥ ॥ तेनेति ॥ ॥ सुरतस्य वारो वासरस्तस्य रात्रिषु दूतीभिर्विदितं यथा पृष्ठतः प्रि

अंगुलीकिसलयाग्रतर्जनं भ्रूविभंगकुटिलं च वीक्षितं ॥ मेखलाभिरसकृच्च बंधनं
वंचयन्प्रणयिनीरवाप सः ॥ १७ ॥ तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवा
ररात्रिषु ॥ शुश्रुवे प्रियजनस्य कातरं विप्रलंभपरितांकिनो वचः ॥ १८ ॥ ॥

यजनस्य पश्चाद्भागे निषेदुषा स्थितवता तेन अग्निवर्णेन विप्रलंभपरितांकिनो विह
रहशंकिनः प्रियश्चासौ जनश्च प्रियजनस्तस्य कातरं वचः प्रियानयनेन मां पाहीत्ये
वं मादिदीनं वचनं शुश्रुवे श्रुतं ॥ १८ ॥ ॥

लौल्यमिति ॥ ॥ गृहिणीपरिग्रहात् राज्ञीभिः समागमाद्धेतोर्नर्तकीषु वेश्यासु सुलभासु सतीषु
लौल्यमौत्सुक्यमेत्य प्राप्यांगुल्योः क्षरणेन स्वेदनेन सन्निवर्तिकः ॥ विगलितशलाकः ॥ सो
ऽग्निवर्णः तासां नर्तकीनां वपुस्तद्वपुः आलिखन् वर्तते स्मा वर्त्तत ॥ १९ ॥ ॥ प्रेम्णेति ॥ ॥ प्रेम्णा
स्वविषये प्रियस्यानुरागेण हेतुना गर्विते विपक्षे सपत्नीजने मत्सराद्द्वेषादायताद्दीर्घाच्च

लौल्यमेत्य गृहिणीपरिग्रहान्नर्तकीष्वसुलभासु तद्वपुः ॥ वर्तते स्म स कथंचिदालिख
न्नंगुलीक्षरणसन्नवर्तिकः ॥ १९ ॥ प्रेमगर्वितविपक्षमत्सरादायताच्च मदनान्महा
क्षितं ॥ निन्युरुत्सवविधिछलेन तं देव्य उज्झितरुषः कृतार्थतां ॥ २० ॥ ॥

दनाच्च हेतोर्देव्यो राज्यः उज्झितरुषः त्यक्तरोषाः सत्यः तं महीक्षितं उत्सवविधिछलेन
महोत्सवकर्मव्याजेन कृतोऽर्थः प्रयोजनं येन सः ॥ कृतार्थस्तस्य भावः कृतार्थता तां
निन्युः ॥ मदनमहोत्सवव्याजानीतेन तेन स्वमनोरथं कारयामासुरित्यर्थः ॥ २० ॥ ॥

प्रातरिति॥॥सअग्निवर्णः प्रातरेत्यागत्य परिभोगशोभिना दर्शनेन हेतुना॥ हृ्ग्रोण्यंतापस्फुट॥
कृतास्वंडनव्यथायाभिस्तास्तयोक्ताः खंडिता इत्यर्थः॥ज्ञातेन्यासंगे विकृते खंडितेर्ष्याकषा
यितेति॥प्रणयिनीः प्रियाः प्रांजलिः प्रसादयन्॥ तथापि प्रणयमंथरः॥ प्रणयेनानन्तकाग
तेनमंथरोऽलसोऽत्रशिथिलप्रयत्नः सन्नित्यर्थः पुनरङ्गनोत्पपर्यतापपत॥२१॥ ॥स्वप्नेति॥

प्रातरेत्य परिभोगशोभिना दर्शनेन कृतखंडनव्यथाः॥ प्रांजलिः प्रणयिनीः प्रसाद
यन्सोऽङ्गनोत्कहृणमंथरः पुनः॥२१॥स्वप्नकीर्तितविपक्षमंगनाः प्रत्यभेत्सुरवदंत
एव ताः॥प्रच्छदांतगलिताश्रुबिंदुभिः क्रोधभिन्नवलयैर्विवर्तनैः॥२२॥ ॥

स्वप्नेकीर्तितो विपक्षः सपत्नीजनो येन तमग्निवर्णमवदंत्य एव तया गोत्रस्खलनं कृतमि
त्यनुपालंभमाना एव प्रच्छदस्यास्तारणपदस्यांतेमध्ये गलिता अश्रुबिंदवो येषु तैः क्रोधे
न भिन्नानि भग्नानि वलयानि येषु तैर्विवर्तनैः पराङ्मुखलुंठनैः प्रत्यभैत्सुः प्रतिचक्रुस्तिरस्च
क्रुरित्यर्थः॥२२॥

क्लृप्तेति॥ ॥सोग्निवर्णः दूतीभिः कृतमार्गदर्शनैः सन् क्लृप्तपुष्पशयनान्लतागृहानेत्यावरोधादंतः
पुरजानाभयेनयोवेपथुः कंपस्तदुत्तरं प्रधानं तत्प्रधानंयथातथापरिजनांगनारतं दासीरतंअन्व
भूत॥ परिजनश्चासावंगना चेति विग्रहः॥ अत्रडीबंतस्यापि दूतीशब्दस्य छंदोभंगभयाध्रस्वं कृतं॥
अपिमाषंमषंकुर्यात् छंदोभंगंत्यजेद्गिरामित्युपदेशात्॥२३॥ ॥नोमेति॥॥ मयातेवल्लभजनस्यप्रियज

क्लृप्तपुष्पशयनांल्लतागृहानेत्यदूतिकृतमार्गदर्शनः॥अन्वभूत्परिजनांगनारतं सोवरो
धभयवेपथूत्तरं॥२३॥ नामवल्लभजनस्य तेमया प्राप्यभाग्यमपि तस्यकांक्ष्यते॥लो
लुपं बत मनो ममेति तं गोत्रविस्खलितमूचुरंगनाः॥२४॥

नस्यनामप्राप्य तन्नाम्नाआह्वानं लब्धपि तस्य वल्लभजनस्य भाग्यं तत्परिहासकारणमितिशेषः॥तदपि कांक्ष्यते बत हंत मेमममनः लोलुपं गृध्नु इत्यनेन प्रकारेण गोत्रे नाम्नि विस्खलितं स्खलितवंतमग्निवर्णमूचुः॥गोत्रं नाम्नि कुले चलेइत्यादवः॥ तन्नाम्नलाभे सति तद्भाग्यमपि कांक्षिणो मनसोऽहो तस्सेतिसोल्लुंठवमुपालब्धवत्यर्थः॥२४॥॥

चूर्णेति॥ ॥चूर्णैर्बभ्रु चूर्णैर्म्लानतकरणेऽधोमुखावस्थितायाः स्त्रियाश्चिकुरमलितैः कुंकुमादिर्व
भ्रुपिंगलं॥ बभ्रुः स्यात्पिंगले त्रिष्वित्यमरः॥ लुलितस्रगाकुलं॥ करिपदाख्यबंधे स्त्रियाः भूमिगतम
स्तकतया पतितानि लुलितस्रग्भिराकुलं छिन्नमेखलं हरिविक्रमकरणे स्त्रियाः उच्छितैकचरणत्वात्
छिन्नमेखलमित्यर्थः॥ अलक्तकांकितं धेनुकबंधे भूतलनिहितकांताचरणलाक्षारागरूषितं शय
नं कर्तउत्थितस्य शयनादिति शेषः॥ विलासिनस्तस्याग्निवर्णस्य विभ्रमरतानि लीलारतानि सुर

चूर्णबभ्रुलुलितस्रगाकुलं छिन्नमेखलमलक्तकांकितं॥ उत्थितस्य शयनं विलासिनस्त
स्य विभ्रमरतान्यपावृणोत॥ २५॥

तबंधविशेषानित्यर्थः॥ अपावृणोत् स्फुटीचकार॥ ध्यानेता
दीनां लक्षणं रतिरहस्ये॥ ध्यानतं रतमिदं यदि प्रिया स्यादधोमुखचतुःपदाकृतिः॥ तत्करिंस
मधिरुह्य वल्लभः स्याद्वृषादिपशुसंस्थितं स्वरः॥१॥ भूगतस्तनभुजास्यमस्तकसुन्नतः स्वयमधोमुखी
स्त्रियं॥ कामतिस्वकरमृष्टमेहनो वल्लभः करिपदं तदुच्यते॥२॥ योषिदेकचरणे समुच्छिते नायते हि
हरिविक्रमाह्वयः॥ न्यस्तहस्तयुगलानिजे पदे योषिदेकटितिरूढवल्लभा॥३॥ अग्रतो यदि शनैरधोमु
खी धेनुकं वृषवदुन्नते प्रिये इति॥ २५॥ ॥

स इति॥ ॥ सोऽग्निवर्णः स्वयमेव योषितां चरणयो रागं लाक्षारसमादधे अर्पयामास किंच स्रस्तांशुकैः प्रि
यांगस्पर्शादिति भावः॥ नितंबिभिः नितंबवद्भिः॥ जघनैः पश्चान्नितंबः स्त्रीकट्याः॥ क्लीबे तु जघ
नं पुर इत्यमरः॥ लोभ्यमाननयनः॥ आकृष्यमाणदृष्टिः सन् तथा समाहितो ऽवहितो न अनन्याद
धेययास्य अग्रागरचनास्यादिति शेषः॥ तासां जघनदर्शने विक्लवत्वाद्यथा कथंचिहेदरंजप

स स्वयं चरणरागमादधे योषितां न तु तथा समाहितः॥ लोभ्यमाननयनः श्लथांशु
कैर्मेखलागुणपदैर्नितंबिभिः॥२६॥ चुंबने विपरिवर्तिताधरं हस्तरोधि रसना
विघट्टने॥ विघ्नितेच्छमपि तस्य सर्वतो मन्मथेंधनमभूद्वधूरतं॥ २७॥ ॥

दिति भावः॥२६॥ ॥ चुंबन इति॥ ॥ चुंबने प्रवृत्ते सति विपरिवर्तिताधरं परिहृतोष्ठं॥ रशा
नाया विघट्टनेऽपि विस्रंसने प्रसक्ते सति॥ हस्तं रुणद्धि वारयतीति हस्तरोधि॥ इत्थं स
र्वतः सर्वत्र विघ्नितेच्छं प्रतिहतमनोरथमपि वधूनां रतं सुरतं तस्याग्निवर्णस्य मन्मथेंधनं
कामोद्दीपनमभूत्॥२७॥

दर्पणेष्विति ॥ ॥ सोऽग्निवर्णः दर्पणेषु परिभोगदर्शिनीः संभोगचिह्नानि पश्यंतीः वधूर्नर्मपूर्वं
परिहासपूर्वं अनुपृष्ठं तासां पृष्ठभागे संस्थितः सन् स्मितेन मनोज्ञया छायया दर्पणगतेन स्व
प्रतिबिंबेन ह्रीनिमीलितमुखी लज्जावनतमुखीश्चकार तमागतं दृष्ट्वा लज्जिता इत्यर्थः ॥२८॥
कंठेति ॥ ॥ प्रियाः शयनादुत्थितं तमग्निवर्णं कंठसक्तं कंठार्पितं मृदुबाहुबंधनं यस्मिंस्त

दर्पणेषु परिभोगदर्शिनीर्नर्मपूर्वमनुपृष्ठसंस्थितः ॥ छायया स्मितमनोज्ञया वधू-
र्ह्रीनिमीलितमुखीश्चकार सः ॥२८॥ कंठसक्तमृदुबाहुबंधनं न्यस्तपादतलमग्रपा-
दयोः ॥ प्रार्थयंत शयनोत्थितं प्रियास्तं निशात्ययविसर्गचुंबनं ॥ २९॥ ॥

दग्रपादयोः स्वकीययोः न्यस्ते पादतले यस्मिंस्तं निशात्यये विसर्गो विसृज्य गमनं तत्र च
चुंबनं तत्प्रार्थयंत ॥ दुहियाचीत्यादिना द्विकर्मकत्वं ॥ अत्र गोनर्दीयः ॥ रतावसाने यद्
चुंबनादि प्रयुज्यया पान्मदनोऽस्य वासइति ॥२९॥ ॥

प्रेक्ष्यति ॥ ॥ युवा सोऽग्निवर्णः अतिशाक्यं यथा तथा शोभमानं अतिशयशोभिनं दर्पणतलस्थं मुकु
रसंक्रांतं राजवेषं प्रेक्ष्य तथा न पिप्रिये ॥ न तु तोषं ययौ यथा व्यक्तलक्ष्म प्रकटचिह्नं परिभोगमंडनं
सुरतमंडनं नखक्षतादिकं प्रेक्ष्य पिप्रिये ॥३०॥ ॥ मित्रेति ॥ ॥ मित्रकृत्यं सुहृत्कार्यं अपदिश्य
व्याजीकृत्य पार्श्वतः प्रस्थितं अन्यतो गंतुमुद्युक्तं ॥ अनवस्थितं अवस्थातुमक्षमं तमग्निव

प्रेक्ष्य दर्पणतलस्थमात्मनो राजवेषमतिशक्रशोभिनं ॥ पिप्रिये न स तथा युवा यथा व्य
क्तलक्ष्मपरिभोगमंडनं ॥ ३०॥ मित्रकृत्यमपदिश्य पार्श्वतः प्रस्थितं तमनवस्थितं प्रि
याः ॥ विद्म हे शठ पलायनच्छलान्यंजसेति रुरुधुः कचग्रहैः ॥ ३१॥ ॥

प्रियाः हे शठ अप्रियकारिन् ॥ गूढविप्रियकृत् शठ इति दशरूपके ॥ ॥ तव पलायनस्य छ
लानि अंजसा तत्त्वेन ॥ तत्त्वे त्वंजसा द्वयमित्यमरः ॥ विद्मः जानीमः ॥ विदो लटो वेति वैके
मादेशः ॥ इत्युक्तेतिशेषः ॥ ॥ कचग्रहैः केशाकर्षणैः रुरुधुः ॥ अत्र गोनर्दीयः ॥ कृतुमा

जिगमनेमित्रकार्येतथापदि॥त्रिषुतेषुप्रियतमःक्षंतव्योवारगम्ययेति॥विरक्तलक्षणप्रस्ता
वेवात्स्यायनःमित्रेरुत्संचापदित्यान्यत्रशोतइति॥३१॥ ॥तस्येति॥ ॥निर्दयरतिश्रमेणाल
सानिश्चेष्टायोषिताःकंठसूत्रमालिंगनविशेषमपविध्यव्याजीकृत्यपीवरस्तनाभ्यांवि
लुप्तचंदनं॥प्रमृष्टांगरागंतस्याग्निवर्णस्यबृहद्भुजांतरंहृदयमध्यशेरत॥वक्षःस्थ

तस्यनिर्दयरतश्रमालसाःकंठसूत्रमपविध्ययोषितः॥
अध्यशेरतबृहद्भुजांतरंपीवरस्तनविलुप्तचंदनं॥३२॥

लेशेरतेस्म॥कंठसूत्रलक्षणं॥यत्कुर्वतेवक्षसिवल्लभस्यस्तनाभिघातंनिबिडोपगूह्य।
परिश्रमार्थंशनकैर्विदग्धास्तत्कंठसूत्रंप्रवदंतिसंतः॥१॥इदमेवरतिरहस्ये॥स्तनालिंगन
मित्युक्तं॥तथाहि॥उरसिकमितुरुच्चैरादिशंतीवरांगीस्तनयुगमुपधत्तेयत्स्तनालिंगनं
तदिति॥३२॥

संगमायेति॥ ॥संगमायसुरतार्थंनिशिगूढंयदमज्ञातंचरतीतिङ्ग्रहंगच्छतीतिगूढचारीतं
चारदूतिकथितंचरंतीतिचाराः॥गूढचारिण्यः॥ज्वलितसंकेतेभ्योणइतिणप्रत्ययः॥च
राश्चदूत्यश्चचारदूत्यस्ताभिःकथितंनिवेदितंतमग्निवर्णंअंगनाःपुरोऽग्रेगताःअवरुध्य

संगमायनिशिगूढचारिणंचारदूतिकथितंपुरोगताः॥
वंचयिष्यसिकुतस्तमोवृतःकामुकेतिचकृषुस्तमंगनाः॥३३॥
योषितामुडुपतेरिवार्चिषांस्पर्शनिर्वृतिमसावनाप्नुवन्॥

र्गाःसत्यइत्यर्थः॥हेकामुकतमसावृतोगूढःसन्कुतोवंचयिष्यसिइत्युपालभ्येतिशेषः।
चकृषुःस्ववासंनिन्युरित्यर्थः॥३३॥ ॥योषितामिति॥ ॥उडुपतेरिंदोरर्चिषांभासामिव॥ज्वाल
नासोनुंस्पर्शनिर्वृतिंस्पर्शसुखंअनाप्नुवन्॥ ॥

किंच रात्रिषु जागरपरो विनिद्रः॥ दिवा दिवसेषु शेते स्वपितीति दिवाशयः॥ अधिकरणे शेतेरि
त्यच् प्रत्ययः॥ असावग्निवर्णः कुमुदाकरस्योपमां साम्यं आरुरोह प्राप॥२४॥ वेणुनेति॥ ॥द
शनैः पीडिताधरा दष्टोष्ठाः॥ नखपदैर्नखक्षतैरंकितोरवः श्रिक्कितोत्संगाः॥ व्रणिताधरोरुत्वाद
क्षमा इत्यर्थः॥ तथापि वेणुना वीणया चेत्युभयेनाधरोरुपीडाकरेणेत्यर्थः॥ वेजिताः पीडिताः

आरुरोह कुमुदाकरोपमां रात्रिजागरपरो दिवाशयः॥२४॥
वेणुना दशनपीडिताधरा वीणया नखपदांकितोरसः॥ शि
ल्पकार्य उभयेन वेजितास्तं विजिह्मनयना व्यलोभयन्॥२५॥

शिल्पं वेणुवीणावाद्यादिकं कुर्वंतीति शिल्पकार्यो गायकाः॥ कार्मण्यपणित्यण्॥ टिड्ढाणञि
त्यादिना ङीप्॥ विजिह्मनयनाः कुटिलदृष्टयः॥ स्वं चेष्टितं जानन्नपि वृपानः पीडयतीति सा
भिप्रायं पश्यंतीत्यर्थः॥ तं व्यलोभयन्॥ तथाविधालोकनमपि तस्याकर्षकमेवाभूदित्यर्थः॥२५॥ राम·
१०

अंगेति॥ ॥अंगं हस्तादि॥ सत्वमंतःकरणं वचनं गेयं चाश्रयः कारणं यस्य तदंगसत्ववचनाश्र
यं॥ आंगिकसात्विकवाचिकरूपेण त्रिविधमित्यर्थः॥ यथाह भरतः॥ सामान्याभिनयो नाम ज्ञे
यो वागंगसत्वज इति॥ नृत्यमभिनयं मिथो रहसि स्त्रीषु नर्तकीषु उपधाय निधाय दर्शय
न्मित्रसन्निधौ सहचरसमक्षं प्रयोगे अभिनये निपुणैः कृतिभिरभिनयाचार्यैः सह संजह

अंगसत्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन्॥ स प्रयोगनिपुणैः प्रयो
क्तृभिः संजहर्ष सह मित्रसन्निधौ॥३६॥ अंसलंबिकुटजार्जुनस्रजस्तस्य नीपरजसां
गरागिणः॥ प्रावृषि प्रमदबर्हिणेष्वभूत्कृत्रिमाद्रिषु विहारविभ्रमः॥३७॥ ॥

र्षकृतवान्॥३६॥ इतः प्रभृति तत्रहतूचितविहारप्रकारमाह॥ ॥अंसेति॥ ॥प्रावृषि अं
सलंबिन्यः कुटजानामर्जुनानां ककुभानां च स्रजो यस्य तस्य नीपानां कदंबकुसुमानां र
जसा अंगरागिणो रागवतः तस्याग्निवर्णस्य प्रमदबर्हिणेषु मत्तमयूरेषु कृत्रिमाद्रिषु वि
भ्रमोऽभवत् विहारे रागविभ्रमो विलासः॥३७॥ ॥ शू

विग्रह ॥ टेति ॥ प्राद्दषिद्दत्यनुषज्यते ॥ सोग्निवर्णो विग्रहात्प्रणयकलहाछ्छायनेपराङ्मुखीर
बला[illegible] तुं न तत्वरे ॥ न्त्वरितवान् ॥ किंतु घनशब्देन गर्जितेन विक्लवाश्चकिता अत एव विद्द
[illegible] नवामिसुखीर्स्वयं तु जो तरं विशंती : प्रविशती ॥ आछीनघीवुमितिनुमागमविकल्प : ॥
बला आचकांक्षयं ग्रहा देवसासुरम्मेछदित्यपः ॥ ३८ ॥ ॥ कार्त्तिकीष्विति ॥ ॥ कार्त्तिकस्येमा

विग्रहाच्छ्रायनेपराङ्मुखीर्नानुनेतुमबलाः स तत्वरे ॥ आचकांक्ष घन शब्दविक्लवास्ता
विद्दत्य विशतीर्भुजांतरं ॥ ३८ ॥ कार्त्तिकीषु सवितानहर्म्यभाक्यामिनीषु ललितांगनाः
सखः ॥ अन्वभुक्त सुरतक्रमापहां मेघमुक्तविशदां स चंद्रिकाः ॥ ३९ ॥ ॥

कार्त्तिक्यः ॥ तस्येदमित्यण्प्रत्ययः ॥ तासुयामिनीषु शरत्रात्रिष्वित्यर्थः ॥ सवितानानि उपरि
वस्त्रीवृत्तानि ॥ हर्म्याणि भजतीति सवितानहर्म्यभाक् ॥ भजेर्ण्विप्रत्ययः ॥ हिमनिवारणार्थं
सवितानमुक्तं ॥ ललितांगनासखः सोग्निवर्णः सुरतश्रमापहां मेघमुक्ताचेसाविशदा चेति
बहुलग्रहणात्समविशेषयासमासः चंद्रिकामन्वभुंक्त ॥ ३९ ॥

सैकतमिति ॥ ॥ हंसा एव मेखला यस्य तत्सैकतं पुलिनं श्रोणिबिंबमिव विद्दएवंतीमतएवस्वप्रि
याविलसितानि अनुकरोतीति तद्विधां सरयुं नदीं सौधस्य हर्म्यस्य जालानि गवाक्षास्तान्येव विव
राणि अवकाशास्तैर्व्यलोकयत ॥ ४० ॥ ॥ मर्मरैरिति ॥ ॥ मर्मरैः संस्कारविशेषाछब्दायमानैः
अयं मर्मरः स्वनितेवस्त्रपर्णानामित्यमरः ॥ अगरुधूपगंधिभिः व्यक्तहेमरशनैर्लोल्याद्य

सैकतं च सरयूं विवृण्वतीं श्रोणिबिंबमिव हंसमेखलं ॥ स्वप्रियाविलसितानुकारिणीं सौधजालविवरैर्व्यलोकयत् ॥ ४० ॥ मर्मरैरगरुधूपगंधिभिर्व्यक्तहेमरसनास्त
मेकतः ॥ जह्रे कुराग्रथनमोक्षलोलुपं हेमनैर्विवसनैः सुमध्यमाः ॥ ४१ ॥ ॥

क्ष्यमाणकनकमेखलागुणो हेमनैर्हेमंतेभवैः ॥ सर्वत्राणश्चतल्लोपश्चेति हेमंतशब्दा
दणप्रत्ययस्तल्लोपश्च ॥ निवसनैरंशुकैः सुमध्यमाः स्त्रिय एकतो नितंबैकदेशे ग्रथ
नमोक्षयोर्नीवीबंधविस्रंसनयोर्लोलुपमासक्तं तं जह्रुराचकर्षु ॥ ४१ ॥ ॥

अर्पितेति॥ ॥ निवातरहिताः कुक्षयोऽभ्यंतराणि येषां तेषु गर्भवेश्मसु रहोगृहेषु अर्पिताः दत्ता
स्तिमिता निवातत्वान्निश्चलाः दीपा एव दृष्टयो यासां ताः॥ अत्रानिमेषदृष्टित्वं च गम्यते॥ सर्वसु
रतांतरक्षमास्तापस्वेदापनोदत्वात् दीर्घकालत्वाच्च सर्वेषां सुरतभेदानां क्षमाः क्रियार्हाः
शिशिररात्रयः तस्याग्निवर्णस्य साक्षितां ययुः॥ विविक्तकालदेशत्वाद्यथेष्टं विजहारेत्य

अर्पितस्तिमितदीपदृष्टयो गर्भवेश्मसु निवातकुक्षिषु॥ तस्य सर्वसुरतांतरक्षमाः साक्षितां
शिशिररात्रयो ययुः॥४२॥ दक्षिणेन पवनेन संभृतं प्रेक्ष्य चूतकुसुमं सपल्लवं॥
अन्वनैषुरवधूतविग्रहास्तं दुरुत्सहवियोगमंगनाः॥४३॥ ॥

र्थः॥४२॥ ॥ दक्षिणेनेति॥ ॥ अंगनाः दक्षिणेन पवनेन मलयानिलेन संभृतं जनितं स
पल्लवं चूतकुसुमं प्रेक्ष्य अवधूतविरोधास्त्यक्तवैराः सत्यः दुरुत्सहवियोगं दुःसहविर
हं तं अन्वनैषुः॥ तद्विरहमसहमानाः स्वयमेवानुनीतवत्य इत्यर्थः॥४३॥ ॥

ता इति॥ ॥ ता अंगनाः स्वमंकं स्वकीयमुत्संगं अधिरोप्य परिजनेनापविद्धया प्रेषितया दोल
या मुक्तरज्जु त्यक्तदोलासूत्रं यथा तथा प्रेंखयन् चालयन्॥ भयच्छलात् पतनभयमिषाद्बा
हुभिरंगनाभुजैर्निबिडं दृढं कंठबंधनमवाप॥ स्वयंग्रहाश्लेषसुखमन्वभूदित्यर्थः॥४४॥

ताः स्वमंकमधिरोप्य दोलया प्रेंखयन्परिजनप्रविद्धया॥ मुक्तरज्जु निबिडं भयच्छला
त्कंठबंधनमवाप बाहुभिः॥४४॥ तं पयोधरनिषिक्तचंदनैर्मौक्तिकग्रथित
चारुभूषणैः॥ ग्रीष्मवेषविधिभिः सिषेविरे श्रोणिलंबिमणिमेखलैः प्रियाः॥४५॥ ॥

तमिति॥ ॥ प्रियाः पयोधरेषु स्तनेषु निषिक्तं रूक्षितं चंदनं येषु ते॥ मौक्तिकैः ग्रथितानि प्रोता
नि चारुभूषणानि येषु ते मुक्ताप्रायाभरणैरित्यर्थः श्रोणिलंबिनो मणिमेखला मणिप्रचु
ररशनाः येषु तैः ग्रीष्मवेषविधिभिः ग्रीष्मोचितनेपथ्यकरणैः शीतलोपायैरित्यर्थः॥ तमग्निवर्णं
सिषेविरे॥४५॥ ॥

यदिति॥ ॥सोऽग्निवर्णः नग्नः सहकारभूतपल्लवो यस्मिंस्तं रक्तपाटलस्य पाटलकुसुमस्य सम
मागमो यस्य तं आसवं मद्यं पपाविति यत्तेनासवपानेन मधुनिर्गमाद्वसंतापगमात् कृशोऽमं
दवीर्यः तस्य चित्तयोनिः कामः पुनर्नवः प्रबलोऽभवत्॥४६॥ ॥एवमिति॥ ॥एवमनंगवा

यत्ननग्नसहकारमासवं रक्तपाटलसमं सेवतास कृत। तेन तस्य मधुनिर्गमात्
कृशश्चित्तयोनिरभवत्पुनर्नवः॥४६॥ एवमिंद्रियसुखानि निर्विशन्नन्यकार्यविमु
खः स पार्थिवः। आत्मलक्षणनिवेदितानृतूनत्यवाहयदनंगमोहितः॥४७॥ ॥

हितः कामप्रेरितोऽन्यकार्यविमुखः स पार्थिवः इंद्रियाणां सुखांतराणि शब्दादीनि निर्वि
शन्ननुभवन् आत्मनो लक्षणैः कुटजस्कंधारणादिचिह्नैर्निवेदितान् अयमृतुरिदानीं व
र्ततीति ज्ञापितानृतूनवपदीनत्यवाहयत अगमयत्॥४७॥ ॥

तमिति॥ ॥प्रमत्तं व्यसनासक्तं अपि तं नृपं अन्यपार्थिवा आक्रमितुं अभिभवितुं न शेकुर्न शक्ताः ब
भूवुः॥ रतिरागसंभवः आमयो व्याधिः स तु क्षयरोग इत्यर्थः॥ दक्षस्य दक्षप्रजापतेः शापात्संभ
मिवाक्षिणोत् अकर्षयत्॥ शापोऽपि रतिरागसंभव इति॥ अत्र दक्षः किलाग्न्याः स्वकन्या उपेक्ष्य रो
हिण्यामेव रममाणं राजानं सोमं शशाप॥ स शापश्चाद्यापि क्षयरूपेण तं क्षिणोतीत्युपाख्यान

तं प्रमत्तमपि न प्रभावतः शेकुराक्रमितुमन्यपार्थिवाः। आमयस्तु रतिरागसंभवो द
क्षशाप इव चंद्रमक्षिणोत्॥४८॥ दृष्टदोषमपि तन्न सोऽत्यजत्संगवस्तु भिषजामनाश्रवः।

ते॥४९॥ ॥दृष्टेति॥ ॥भिषजां वैद्यानां अनाश्रवः॥ वचने स्थित आश्रवः इत्यमरः॥ अवि
धेय इत्यर्थः॥ दृष्टदोषमपि रोगजननादिति शेषः॥ संगस्य वस्तु संगवस्तु स्त्रीमद्यादि
कं वस्तुना त्यजच्च॥ तथाहि इंद्रियगणः स्वादुनिर्विषयैः हृतस्तु हृतश्चेन्नतस्तेभ्यो वि

रघुवं॰टी॰ १५ षयेभ्योऽडःखेनकृच्छ्रेणवार्यतेहि॥ यदिवार्यतेइतिशेषः॥ इन्द्रियजाः खलुविषयाइत्य सर्ग॰१९
र्थः॥४९॥॥ तस्येति॥ ॥तस्य राज्ञः पांडुवदनाअल्पभूषणापरिमिताभरणा साव
लंबं दासादिहस्तावलंबनसहितं गमनं यस्याः सा मृदुस्वना हीनस्वरा राज्ञः सोमस्य यक्ष्मा
स्याऽलिंगिश्च विषयिकृतस्ततोऽडःखमिंद्रियगणो हि वार्यते॥४९॥ तस्य पांडुवदनाल्पभू
षणा सावलंबगमना मृदुस्वना॥ राजयक्ष्मपरिहानिराययौ कामयानसमवस्थया तु
लां॥५०॥
राजयक्ष्माक्षयरोगस्तेन या परिहानिरात्मनः क्षीणावस्था कामयानशब्दात्से
धीनादिश्चेति॥ तस्य समवस्थया कामुकावस्थया तुलां साम्यमाययौ प्राप॥ का राम॰ १५
लकृतो विशेषोऽवस्था विशेषः कालिकोऽवस्था इत्यमरः॥५०॥ ॥

व्योमेति॥ ॥राज्ञि क्षयातुरे सति तत्कुलं रघुकुलं पश्चिमकलायां स्थित इंदुर्यस्मिंस्तत्॥ कला
वशिष्टेंदु व्योम वा व्योमेव॥ वा शब्द इवार्थे॥ यथाहदंडी॥ इववद्वायथा शब्दा इति॥ पंकशेषं घ
र्मपल्वलमिव॥ वामनार्चिरल्पशिखं दीपभाजनमिव दीपपात्रमिवाभवत्॥५१॥ ॥बाढ
व्योमपश्चिमकलास्थितेंदुवत्पंकशेषमिव घर्मपल्वलं॥ राज्ञि तत्कुलमभूत्
क्षयातुरे वामनार्चिरिव दीपभाजनं॥५१॥ बाढमेषु दिवसेषु पार्थिवकर्मसाध
पति पुत्रजन्मने॥ इत्यदर्शितरुजोस्य मंत्रिणः शश्वदूचुरघशंकिनीः प्रजाः॥५२॥
मिति॥॥ बाढं सत्यं एषु दिवसेषु पार्थिवः पुत्रजन्मने पुत्रोदयार्थं कर्म इष्ट्यादिकं साध
यतीत्येवमदर्शितरुजो निगूहितरोगाः संतोऽस्य राज्ञो मंत्रिणः अघशंकिनीर्व्यसनशं
किनीः प्रजाः शश्वदूचुः॥५२॥॥

सइति ॥ ॥ सोऽग्निवर्णोऽनेकवनितासखः सन्नपि पावनीं पितृऋणमोचनीं संततिमनवलोक्य पुत्र
मप्राप्येत्यर्थः ॥ वैद्ययत्नपरिभाविनं गदं रोगं प्रदीपो वायुमिव नात्यगात् ॥ नातिचक्राम ममा
रेत्यर्थः ॥ ५३ ॥ ॥ तमिति ॥ ॥ पश्चिमक्रतुविदा अंत्येष्टिविधिज्ञेन पुरोधसा संगताः समेताः

स त्वनेकवनितासखोऽपि सन् पावनीमनवलोक्य संततिं ॥ वैद्ययत्नपरिभाविनं गदं
न प्रदीप इव वायुमत्यगात् ॥ ५३ ॥ तं गृहोपवन एव संगताः पश्चिमक्रतुविदा पुरो
धसा ॥ रोगशांतिमपदिश्य मंत्रिणः संभृते शिखिनि गूढमादधुः ॥ ५४ ॥ ॥

मंत्रिणः गृहोपवने एव गृहारामे एव ॥ आरामः स्यादुपवनमित्यमरः ॥ रोगशांतिमप
दिश्य शांतिकर्म व्यपदिश्य तमग्निवर्णं सम्भृते दीप्ते शिखिनि अग्नौ गूढमप्रकाशं आद
धुर्निदधुर्निदधुरग्निसंस्कारं चक्रुरित्यर्थः ॥ ५४ ॥ ॥

तैरिति ॥ ॥ आशु शीघ्रं कृतः प्रकृतिमुख्यानां पौरजनपदप्रधानानां संग्रहः सन्निपातनं यैस्तैर्मं
त्रिभिः साधु निपुणं दृष्टशुभगर्भलक्षणा परीक्षितशुभगर्भचिह्ना तस्याग्निवर्णस्य सहधर्म
चारिणी प्रिया नराधिपश्रियं प्रत्यपद्यत राज्यलक्ष्मीं प्राप ॥ ५५ ॥ ॥ तस्या इति ॥ ॥ तथाविधया

तैः कृतप्रकृतिमुख्यसंग्रहैराशु तस्य सहधर्मचारिणी ॥ साधुदृष्टशुभगर्भलक्ष
णा प्रत्यपद्यत नराधिपश्रियं ॥ ५५ ॥ तस्यास्तथाविधनरेंद्रविपत्तिशोकादु
ष्णैर्विलोचनजलैः प्रथमाभितप्तः ॥ निर्वापितः कनककुंभमुखोज्झितेन
वंशाभिषेकविधिना शिशिरेण गर्भः ॥ ५६ ॥ ॥ नरेंद्रपत्न्याः यः शोकस्तस्मा
दुष्णैर्विलोचनजलैः प्रथमममभितप्तस्या गर्भः कनककुंभानां मुखैर्द्वारैरुज्झितेन
त्यक्तेन शिशिरेण सुखकरेण वंशाभिषेकविधिना वक्ष्यमाणया अभिषेकजलेन निर्वा
पितः आप्यायितः ॥ ५६ ॥ ॥

तमिति ॥ ॥ प्रसवो गर्भविमोचनफलं च विवक्षितं ॥ स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरः
तस्य यः समयस्तदाकांक्षिणीनां प्रजानां श्रेयसे भूतये ॥ भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजं
तुषु इति यादवः ॥ क्षितिरंतर्गूढं नक्तो बीजमुष्टिमिव श्रावणमासि उप्तो बीजमुष्टिरिति भावः ॥
मुष्टिशब्दो द्विलिंगः ॥ अञ्जली बीजमुष्टिमुस्तकवितियादवः ॥ अंतर्गूढं अंतर्गतं गर्भं दधाना हेमसि

तं भावार्थं प्रसवसमयाकांक्षिणीनां प्रजानामंतर्गूढं क्षितिरिव नभो बीजमुष्टिं दधा
ना ॥ मौलैः सार्धं स्थविरसचिवैर्हेमसिंहासनस्था राज्ञी राज्यं विधिवदशिषद्भ
र्तुरव्याहताज्ञा ॥५७॥

हासनस्था अव्याहताज्ञा राज्ञी मौलैर्मूले नवै मूलादागतैर्वाप्त्रै
त्रैरित्यर्थः ॥ स्थविरसचिवैर्वृद्धामात्यैः सार्धं भर्तुः राज्यं विधिवद्धिधर्महं यथाशास्त्रं इत्यर्थः
आहार्ये वति प्रत्ययः ॥ अशिषत् शास्ति स्म सार्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः ॥ शा
स इदङ् हलोरिति ईकारः ॥५७॥ ॥

इति श्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविर
चितायां रघुवंशटीकायां संजीविनीसमाख्यायामेकोनविंशतितमः सर्गः

इति श्री रघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ अग्नि
वर्णशृंगारवर्णनो नाम एकोनविंशतिमः सर्गः समाप्तः ॥१९॥

१९ ॥ ॥ समाप्तोयं रघुवंशसंजीवनीटीका ॥ ॥श्रीरस्तु ॥ ॥श्री॥

करकृतमपराधंक्षंतुमर्हंतिसंतः इतिवैवस्वतमनोर्व्वंशो दिलीपो नृपोत्तमः ॥ र
घुवंशोमहाकाव्यंकालिदासप्रशोवपुः ॥१॥ रघुश्चाजोदशरथः श्रीरामश्चकुशो
तिथिः ॥ अतिथेर्निषधोजातोनलस्तस्मान्नलान्नभः ॥२॥ पुंडरीकः क्षेमधन्वादेवा
नीकस्ततः परं ॥ अहीनगुः पारियात्रोदलः शीलमहीपतिः ॥३॥ उन्नाभो नृपति
स्तस्माद्वज्रनाभोनवेत्ततः ॥ खंडनोहरिदश्वोष्ठस्ततोविश्वसहः स्मृतः ॥४॥
हिरण्यनाभौकौशल्योब्रलिष्टः पुष्पसंयुतः ॥ ध्रुवसंधिर्ध्रुवंतस्माध्रुवश्चैवसु
दर्शनिः ॥५॥ सुदर्शनोग्निवर्णश्चइत्येतेरघुवंशजाः ॥ दीलिपाद्यामही
पालाः कालिदासेनकीर्तिताः ॥ ६॥ ॥ श्रीमनुः ॥ दीलिपः ॥ रघुः ॥ अ

जः ॥ दशरथः ॥ रामः ॥ कुशः ॥ अतिथिः ॥ निषधः ॥ नलः ॥ नभः ॥ पुंडरीकः ॥ क्षे
मधन्वा ॥ देवानीकः ॥ अहीनगुः ॥ पारियात्रः ॥ उन्नाभः ॥ वज्रनाभः ॥ विश्व

९६	७५	७०	९५	७६	८६	७१	९८	९३	८७
१	२	३	४	५	६	७	८	९	१०
११	१२	१३	१४	१५	१६	१७	१८	१९	श्री
९३	१०५	८३	८७	१०४	८८	८१	५५	५७	श्री

सह ॥ हिरण्यनाभः ॥ कौशल्याः ॥ पुष्पः ॥ ध्रुवः ॥ सुदर्शनिः ॥ अग्निवर्णः ॥ ॥
इमेसूर्यवंशीयाः ॥१॥ ॥ भग्नपृष्टिकटिग्रीवाबधदृष्टिरधोमुखं ॥ कष्टेनलिखि

तोग्रंथोयत्नेनपरिपालयत्॥१॥यावल्लवणसमुद्रोयावन्नक्षत्रमंडितोमेरुः॥या
वच्चंद्रादित्यौतावदिदंपुस्तकंजयतु॥२॥तैलाद्रक्ष्यंजलाद्रक्ष्यंरक्ष्यंशिथिल
बंधनात्॥मूर्षहस्तात्तदारक्ष्यंनैवंसीदतिपुस्तकं॥१॥अविसर्गतिपूर्वाधि
स्तवर्गेतरपंचमः॥स्कतिलिद्ववर्जितःश्लोकःशाकनेषुशुभावहः॥२॥
संभृष्यंसदपत्यवत्परकराद्रक्ष्यंचसुक्षेत्रवत्संशोध्यंव्रणितांगवत्प्रतिदि
नंवीक्ष्यंचसन्मित्रवत्॥बध्यंबध्यवदश्लथंनहिपुनःस्मर्यंहरेर्नामवन्नैवं
सीदतिपुस्तकंकिलकलाप्येतद्गुरूणांवचः॥ ॥श्रीकृष्णायनमः॥ ॥